

शिक्षाशास्त्रि 2017-19

शिक्षावाहिनी 2018-2019

ISSN NO : 2278-6163

# शिक्षावाहिनी

Vol. 8 Issue 1 २०१८-२०१९


**सम्पादकः**

**डा. के. गिरिधर रावः**

सहायकाचार्यः (शिक्षाशास्त्रविभागः)

**सहसम्पादकः**

**डा. इ. वेङ्कटेश्वर्लु**

सहायकाचार्यः (अंशकालिकः)



## शिक्षाशास्त्रविभागः

राष्ट्रियसंस्कृतसंस्थानम्

(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा ए श्रेण्यां प्रत्यायितम्)

गुरुवायूर् परिसरः, पुरनाट्टुकरा, तृश्शूर्

केरलम् - ६८० ५५१

# शैक्षिकसत्रस्य चित्रमालिका






























ISSN NO : 2278-6163

# शिक्षावाहिनी

## (SHIKSHA VAHINI)

(VOLUME - 8) (ISSUE - 1)

२०१८-१९

सम्पादकः

**डा के. गिरिधर रावः**

सहायकाचार्यः

सहसम्पादकः

**डा इ. वेङ्कटेश्वर्लु**

सहायकाचार्यः (अंशकालिकः)

# शिक्षाशास्त्रविभागः

**राष्ट्रियसंस्कृतसंस्थानम्**

(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा “ए” श्रेण्यां प्रत्यायितम्)

**गुरुवायूर् परिसरः, पुरनाट्टुकरा, तृश्शूर्**

केरलम् - ६८० ५५१

शिक्षावाहिनी SHIKSHA-VAHINI

(VOLUME - 8) (ISSUE - 1)

# (Journal in Education)

© ALL RIGHTS RESERVED

| | | |
|---|---|---|
| **ISSN** | : | **2278 - 6163** |
| **First Impression** | : | **2019** |
| **No. of Copies** | : | **150** |

| | | |
|---|---|---|
| **Chief Editor** | : | **Dr. K. GIRIDHARA RAO**<br>Asst. Professor of Education<br>Rashtriya Sanskrit Sansthan,<br>Guruvayoor Campus,<br>Puranattukara, Thrissur,<br>Kerala - 680551 |
| **Sub Editor** | : | **Dr. E. VENKATESWARLU**<br>Asst. Professor (Guest)<br>Dept., of Education<br>Rashtriya Sanskrit Sansthan,<br>Guruvayoor Campus,<br>Puranattukara, Thrissur,<br>Kerala - 680551 |
| **Editorial Board** | : | **Dr. K. K. Harsha Kumar**<br>**Dr. D. Venugopala Rao**<br>**Dr. P. Vidyadhar**<br>**Dr. Mahesh Kumar Panigrahi**<br>**Sri Lalit Mohan Pantola** |

| | | |
|---|---|---|
| **Typed by** | : | Smt. G. Naga Swati &<br>Sri Lalit Mohan Pantola |
| **Type Setting** | : | Dr. K. Girdhara Rao |
| **Cover Design** | : | Smt Ajitha K. P. |
| **Published by** | : | **Susana Xerox & Printers**<br>Tirupati |

# सम्पादकीयम्

वर्तमानकाले संस्कृतभाषां विद्यालयेषु महाविद्यालयेषु विश्वविद्यालयेषु च भाषारूपेण उत विषयरूपेण पाठ्यते इति विचारयामश्चेत् संस्कृतभाषा विषयरूपेण पाठ्यते इति अवगन्तुं शक्नुमः। परन्तु अन्याः सर्वाः भाषाः भाषारूपेण पाठ्यन्ते इति कारणतः वर्षद्वयाभ्यन्तरे सहजतया तस्यां भाषायां सम्भाषणं कर्तुं समर्थाः भवन्ति छात्राः । पञ्च अथवा सप्तवर्षाणि पठित्वा अपि छात्राः संस्कृतभाषायां शुद्धतया सहजतया च सम्भाषणं कर्तुं न शक्नुवन्ति । न केवलं छात्राणाम् एतादृशीस्थितिः अपि तु अध्यापकानां स्थितिरपि ईदृशी एव । यतोहि कक्ष्यायाम् अनुवादमाध्यमेन पठनं पाठनञ्च भवति । एतस्य मूलकारणं भवति संस्कृतं संस्कृतमाध्यमेन पठनाभावः पाठनाभावश्च। कक्ष्यायां संस्कृतमयवातावरणस्य अभावः । भाषाकौशलानां प्रयोगाभावः । कक्ष्यायां छात्राः संस्कृतभाषायाः श्रवणं भाषणञ्च न कुर्वन्ति । संस्कृतभाषां भाषारूपेण पाठयितुम् अध्यापकानाम् उत्तरदायित्वम् अत्यधिकं वर्तते । अध्यापकाः कक्ष्यायां स्वविषयाध्यापने स्वतन्त्राः भवन्ति । तत्र संस्कृतमाध्यमेन पाठयितुम् अध्यापकाः विभिन्नविधीन्, प्रविधीन्, उपागमान्, कौशलानि च प्राप्नुयुः । आधुनिकतन्त्रज्ञानस्य प्रयोगोऽपि ज्ञेयः । कक्षायां विषयाध्यापनेन सह प्रतिदिनं पञ्च निमेषाः सम्भाषणपाठः, भाषाक्रीडाः, संस्कृतकथाकथनम्, संस्कृतगीतगानम्, हास्यकणिकाः, संस्कृतचलनचित्रदर्शनम्, वाक्यनिर्माणम् इत्याद्याः विभिन्नाः गतिविधयः समायोजनीयाः । क्रमशः छात्रेषु संस्कृतभाषायाम् अभिरुचिम् उत्पाद्य भाषाविकासः सम्पादनीयः। एवम् अध्यापकानां परिश्रमेण दीक्षया छात्राः संस्कृतभाषायां सहजतया वक्तुं पठितुञ्च शक्नुयुः ।

छात्रेभ्यः भाषाकौशलदानेन वयं तान् स्वतन्त्रान् कुर्मः । भाषासामर्थ्याभावे अद्य तथाकथितसंस्कृतज्ञेषु बहवः पङ्गुतां, मूकताञ्च अनुभवन्ति । न्यूनातिन्यूनं भाविसंस्कृतज्ञाः एवं मा भवन्तु । तेभ्यः अद्य एव भाषां दद्मः । तदा एव संस्कृतभाषायाः भाषात्वं सिध्यति । संस्कृतविश्वविद्यालयानां मुख्यमुद्देश्यं भवति संस्कृतभाषासंरक्षणम् । एतदुद्देश्यं मनसि निधाय संस्कृतविश्वविद्यालयेषु शिक्षाशास्त्रविभागाः संस्थापिताः । तत्र भाषया सह विषयः, विषयेन सह भाषा च अत्यन्तमनिवार्ये भवतः इति विचिन्त्य राष्ट्रियसंस्कृतसंस्थानस्य परिसरेषु शिक्षाशास्त्रेण साकं भाषायै अपि समप्राधान्यं दीयत इति मोदावहोऽयं विषयः ।

संस्कृतशिक्षायाः विकासाय नैकेषु क्षेत्रेषु च संस्कृतभाषायाः प्रसाराय भारतसर्वकारेण राष्ट्रियसंस्कृतसंस्थानस्य स्थापना कृता । संस्थानस्य परिसरेषु अन्यतमोऽयं परिसरः गुरुवायूर् परिसरः । परिसरेऽस्मिन् शिक्षाशास्त्रविभागेन प्रतिवर्षमिव अस्मिन्नपि वर्षे **शिक्षावाहिनी** इति

विभागीया शोधपत्रिका ISSN - 2278-6163 संख्यया युक्ता अष्टमकुसुमत्वेन (Volume-8) प्रकाश्यत इति महतः प्रमोदस्य विषयः। अस्यां पत्रिकायां विभागीयाध्यापकानां शोधप्रबन्धाः, च्छात्राणाञ्च लेखाश्च शिक्षालोककल्याणाय उपकुर्युरिति आशास्महे।

राष्ट्रियसंस्कृतसंस्थानस्य संस्कृतभाषायाश्च विकासाय निरन्तरम् अकुण्ठितदीक्षादक्षेभ्यः कुलपतिभ्यः शिक्षाशास्त्रपारङ्गतेभ्यः **आचार्येभ्यः परमेश्वरनारायणशास्त्रिवर्येभ्यः**, कुलसचिवेभ्यः दर्शनशास्त्रपारङ्गतेभ्यः **आचार्येभ्यः यस्. सुब्रह्मण्यशर्मवर्येभ्यः** च सन्दर्भेऽस्मिन् साधुवादान् समर्पयावः।

शिक्षावाहिनी पत्रिकायाः सम्पादकरूपेण अवसरं प्रदाय पत्रिकायाः गुणवत्तावर्धनाय मार्गदर्शनेन आशीर्भिश्च अनुगृहीतवद्भ्यः राष्ट्रियसंस्कृतसंस्थानस्य शिक्षासङ्कायप्रमुखेभ्यः परिसरप्राचार्येभ्यः **आचार्येभ्यः चल्ला लक्ष्मीनारायणशर्मवर्येभ्यः,** समये समये समुचितमार्गदर्शनेन प्रोत्साहितवद्भ्यः विभागाध्यक्षेभ्यः **डा. के. के. हर्षकुमारवर्येभ्यः,** प्रबन्धानां संशोधनकर्मणि सहकृतवद्भ्यः विभागीयाध्यापकेभ्यः डा. डि. वेणुगोपालराववर्येभ्यः, डा. प्रभल विद्याधरवर्येभ्यः, डा.महेशकुमार् पाणिग्राहिवर्येभ्यः, श्री ललितमोहनपन्तोलावर्येभ्यः च धन्यवादान् वितन्वः । प्रबन्धानां टङ्कनकर्मणि सहकृतवद्भ्यः श्रीमत्यै जि. नागस्वातिमहोदयायै, श्रीललितमोहनपन्तोलामहोदयाय च साधुवादान् समर्पयावः । अत्यन्तसुन्दररूपेण मुखपुटं सज्जीकृतवत्यै श्रीमत्यै के. पि. अजितामहोदयायै, पत्रिकायाः सुचारुमुद्रणं कृतसंस्थायै सुसनामुद्रणालयप्रतिनिधिभ्यश्च धन्यवादान् वितन्वः।

इत्थम्

सम्पादकौ

**डा के. गिरिधररावः**

**डा इ. वेङ्कटेश्वर्लु**

# शुभाशंसा

राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायूर् परिसरे शिक्षाशास्त्रविभागेन प्रतिवर्षं प्रकाश्यमाना वार्षिकी **शिक्षावाहिनीति पत्रिका** ऐषमः डा. के. गिरिधरराव् महोदयस्य सम्पादकत्वे प्रकाश्यत इति विदित्वा मोमुदीति मे चेतः ।

शिक्षाविषये विशिष्य संस्कृतशिक्षाविषये अध्ययनेन अनुभवेन च रचितानां लेखानां सम्पादनं प्रकाशनञ्च नातीव सुकरं कार्यम् । लेखेषु प्रयुक्तानां पदानां वाक्यानाञ्च उद्दिष्टार्थप्रकाशनसामार्थ्यं विवेचनीयं परिष्करणीयञ्च । अन्यथा वाचकाः तेषां लेखानामर्थावगमने क्लेशमनुभवेयुः । संस्कृतभाषायाः विषये मातृभाषायाः प्रभावः सर्वेषु प्रदेशेषु चिन्त्य एव । केरलीयानां लेखेषु मलयालभाषायाः प्रभावः विचारणीयः । मलयालभाषायां क्रियापदानां पुरुषवचनभेदाभावात् संस्कृतेऽपि तथैव प्रयोगः कदाचित् दृश्यते । अहं गच्छति (गच्छामि), वयं गच्छति (गच्छामः), त्वं गच्छति (गच्छसि), यूयं गच्छति (गच्छथ) इति प्रयोगः नैसर्गिकः । मलयालभाषायाम् एतेषु स्थलेषु ‘पोकुन्नु’ इत्येकमेव क्रियापदं प्रयुज्यते । वर्तमानकाले एतदेवं भवति, भूतभविष्ययोरपि एतदेवमेव स्यात् । सम्पादकाः तत्र तत्र अपेक्षितं परिष्कारं कुर्युः ।

केषाञ्चित् पदानां प्रयोगेऽपि मलयालभाषायाः प्रभावो दृश्यते । केचित् संस्कृतशब्दाः मलयालभाषायाम् अन्येष्वर्थेषु प्रयुज्यन्ते । यथा - तामसम् = वासः, विलम्बः, क्षणम् = आह्वानम्, आग्रहम् = कामना, शेखरणम् = समाहरणम्, विडम्बरम् = प्रकटनम्, फलितम् = हास्यम्, पटम् = चलनचित्रम्, राज्यम् = देशः, संस्थानम् = राज्यम्, राष्ट्रियम् = राजनीतिः, भरणपक्षः = अधिकारपक्षः इति । एतेषां शब्दानामर्थं केरलीयाः सरलतया अवगच्छेयुः । परन्तु अन्यराज्यीयाः नावगच्छेयुः । अतः सम्पादकाः एतादृशशब्दानां स्थाने योग्यान् संस्कृतशब्दान् योजयेयुः । सम्पादकसमित्या पत्रिकायाः सम्पादनात् परं समीक्षकमण्डल्यापि समीक्षिता स्यात् । तदा पत्रिकायाः गौरवं वर्धेत ।

महत्येतस्मिन् कार्ये परिश्रान्तवद्भ्यः सर्वेभ्यः भगवान् गुरुवायुपुरेश्वरः आयुरारोग्यसम्पत्सौभाग्यं प्रयच्छेदिति कामयमानः ...........

भवदीयः

**आचार्यः चल्ला लक्ष्मीनारायणशर्मा**



**Prof. P.N. Shasthri**
Vice Chancellor




**Prof. S. Subrahmanya Sarma**
Registrar (I/C)



**Prof. Ch. L.N. Sarma**
Principal
Dean Faculty of Education

# FACULTY MEMBERS



**Dr. K.K. Harshakumar**
H.O.D. Shiksha Shastri



**Dr. K. Giridhara Rao**
Asst. Professor



**Dr. D. Venugopala Rao**
Asst. Professor (Cont.)



**Dr. P. Vidyadhar**
Asst. Professor (Cont.)



**Dr. Mahesh Kumar Panigrahi**
Asst. Professor (Cont.)



**Dr. E. Venkateswarlu**
Asst. Professor (Guest)



**Sri Lalit Mohan Pantola**
Asst. Professor (Guest)



**Sri. K.M. Bhaskaran**
Executive (Lab)



**Sri. Vineesh P.V.**
Peon (Adhoc)

# विषयानुक्रमणिका


सम्पादकीयम्

आशीः

विभागीयाध्यापकाः

| क्र.सं. | विषयः | लेखकः | पृष्ठसंख्या |
|---|---|---|---|
| 1. | न्यायदर्शन-मनोविज्ञानयोराधारेण संज्ञानात्मकज्ञान निर्मितिवादस्य विमर्शः | आचार्यः चल्ला लक्ष्मीनारायणशर्मा | 1 |
| 2. | TEACHER AS A MENTOR | Dr K. K. HARSHA KUMAR | 2 |
| 3. | TEACHER EDUCATION AND ITS DEVE LOPMENT IN POST INDEPENDENCE INDIA | Dr K. GIRIDHARA RAO | 4 |
| 4. | आचार्य राममूर्तिशिक्षासमितिः शैक्षिकविचाराश्च | डा. डि. वेणुगोपालरावः | 8 |
| 5. | विशिष्ट-एकीकृत-समावेशीशिक्षा- इत्येतासां परिचयः | डा. प्रभल विद्याधरः | 15 |
| 6. | अधिकरणम् | डा. महेशकुमारपाणिग्राही | 19 |
| 7. | भाषाधिगमे संरचनोपागमः | डा. इक्कुर्ति वेङ्कटेश्वर्लु | 26 |
| 8. | EVALUATION AND VARIOUS ASPECTS | Sri LALIT MOHAN PANTOLA | 31 |
| 9. | मूल्याङ्कने प्रतिपुष्टिः | रोजालिन् मोहराणा | 34 |
| 10. | भारतीयमूल्यस्रोतांसि | अर्चना पात्र | 36 |
| 11. | बौद्धकालीनशिक्षा | रञ्जिता कण्डि | 38 |
| 12. | वैदिककालीनशिक्षा | मञ्जुलता साहु | 42 |
| 13. | शिक्षा | प्रतीक्षा के. पि. | 44 |
| 14. | व्यक्तित्वनिर्माणे सामाजिकमूल्यम् | अमृता बारिक् | 45 |
| 15. | शिक्षाक्षेत्रे धार्मिक-मूल्यशिक्षयोः प्रासङ्गिकता | भानुमती दास | 47 |
| 16. | समाजनिर्माणे मूल्यशिक्षायाः भूमिका | बिस्मिनी प्रधान् | 49 |
| 17. | शास्त्रसंरक्षणम् | सस्मिता मिश्रः | 52 |
| 18. | स्त्रीणाम् अधिकारः | रोजालिन् बिश्वाल् | 54 |
| 19. | विद्यालयस्तरे पाठ्यचर्यायाः महत्त्वम् | प्रस्वसिनी साहु | 56 |
| 20. | समाजशास्त्रे शिक्षा | शुभश्री बारिक् | 58 |
| 21. | संस्कृतस्य महत्त्वम् | जयश्री प्रधानः | 60 |
| 22. | प्राचीनार्वाचीनकाले शान्तिशिक्षा | स्मिताराणी समाल् | 62 |
| 23. | समावेशात्मकशिक्षायां राष्ट्रियशिक्षानीतयः | जशोदा दास् | 64 |
| 24. | बौद्धशिक्षा | भाग्यश्री मण्डल् | 67 |

| | | |
|---|---|---|
| 25. वैदिकयुगे नारीशिक्षा | सुनीता पात्र | 68 |
| 26. जनतन्त्रीयमूल्यानि | स्वागतिका दास् | 70 |
| 27. मुस्लिमशिक्षा | सौभाग्यमञ्जरी साहु | 73 |
| 28. स्वामिविवेकानन्दस्य मते शिक्षा | मायाकृष्णन् | 74 |
| 29. संस्कृतमाध्यमेन संस्कृतशिक्षणम् | निव्या बाबू | 76 |
| 30. भारतीयदर्शनानि | शरण्या के. आर्. | 77 |
| 31. साम्प्रतिकसमाजे सदाचारः | मनस्मिता राउत | 79 |
| 32. परिसरविज्ञानम् | लीतु थामस् | 80 |
| 33. प्रौढशिक्षायाः आवश्यकता | प्रवीणा सुरेष् | 81 |
| 34. विद्यालयसङ्घटनं स्वास्थ्यशिक्षा च | शरण्या सी. के. | 83 |
| 35. योगः विद्याभ्यासश्च | ज्योत्स्ना पी. वी. | 84 |
| 36. कः भाषाध्यापकः ? | मिधुनः एम्. एस्. | 85 |
| 37. त्रिभाषासूत्रं संस्कृतं च | हरिप्रिया पि. एच्. | 87 |
| 38. वेदाङ्गानि | अंजना सुमन् | 88 |
| 39. पाठ्यचर्या | मुक्तिकान्त जेना | 90 |
| 40. पाठ्यचर्यापाठ्यक्रमयोर्मध्ये अन्तरम् | सारदा प्रसाद नाथ | 91 |
| 41. वैदिकशिक्षायां गुरुशिष्यसम्बन्धः | सहदेव प्रधान् | 93 |
| 42. अनुबन्धचतुष्टयनिरूपणम् | नरेन्द्र कुमार जेना | 96 |
| 43. आदर्शवादः शिक्षा च | टोनि प्रियदर्शनी सोरेन् | 97 |
| 44. व्याकरणशास्त्रम् | राणाप्रतापपण्डा | 99 |
| 45. अन्तर्जालम् | सन्तोष कुमार सर्दार | 100 |
| 46. विवेकानन्दस्य मते गुरोः योग्यता | अभिनन्द् सि. के. | 103 |
| 47. भाषाबोधने उपयुज्यमानाः विविधाः पठनसामग्र्यः | अभिजित् राजेन्द्रन् | 104 |
| 48. संस्कृतशिक्षणे नाटकशिक्षणस्य प्राधान्यम् | गलील् .टि | 106 |
| 49. संस्कृतं संस्कृतिश्च | शारदा भारती | 108 |
| 50. बौद्धशिक्षा | सस्मिता कुमारि साहु | 110 |
| 51. प्राचीन - अर्वाचीन साक्षरमहिलाः | स्वातिलक्ष्मी के. यु. | 111 |
| 52. समाजे मूल्यशिक्षायाः आवश्यकता | रुद्रनारायणमहापात्रः | 113 |
| 53. छात्रेभ्यः अनुशासनस्य महत्त्वम् | पूर्णिमा परिडा | 116 |
| 54. स्त्रीशिक्षा | तापस् मिश्रः | 119 |
| 55. सांख्यदर्शनस्य परिचयः | देवयानी रथः | 122 |
| 56. व्यक्तित्वम् | श्वेता महन्ति | 125 |
| 57. संस्कृतशिक्षकः | रम्या के. आर्. | 127 |

| | | |
|---|---|---|
| 58. पाठ्यचर्या | एलिना राय् | 129 |
| 59. सज्जनानां सान्निध्यम् | जागृति आढ्या | 132 |
| 60. दलशिक्षणम् | सुषमा मिश्रः | 134 |
| 61. विद्या | एलिना जेना | 136 |
| 62. सामाजिकपरिवर्तने शिक्षायाः भूमिका | सस्मिता बिसोइ | 137 |
| 63. आदर्शवादे शिक्षकछात्रयोः सम्बन्धः | स्वागतिका चम्पति | 139 |
| 64. त्रिभाषासूत्रे संस्कृतभाषायाः महत्त्वम् | राज्यलक्ष्मी बिश्वाल् | 141 |
| 65. पर्यावरणप्रदूषणनिवारणोपायाः | मीनकेतन माझी | 143 |
| 66. संस्कृतशिक्षणे श्रवणकौशलम् | राजेन्द्र कुमार साहु | 146 |
| 67. संस्कृतशिक्षणे यन्त्रांशोपागमः | मनोरमा अगस्ति | 149 |
| 68. संस्कृतशिक्षणस्य सामान्यसिद्धान्ताः | श्रद्धाञ्जली सेनापतिः | 150 |
| 69. मूल्यशिक्षा | सुभद्रा दास | 152 |
| 70. भारतीयन्यायदर्शनम् | देवश्री श्वाई | 153 |
| 71. गणतन्त्रशिक्षायाः महत्त्वम् | मामा जेना | 155 |
| 72. संस्कृतभाषायाः भाषावैज्ञानिकं महत्त्वम् | सुस्मिता पल्हार् | 156 |
| 73. स्वस्थपर्यावरणं समाजश्च | गायत्री महन्ती | 159 |
| 74. स्वामिदयानन्दस्य शिक्षादर्शनम् उद्देश्यानि च | निधि आर्या | 161 |
| 75. वेदकालीन नारीशिक्षा | शाश्वती शुभदर्शिनी परिडा | 163 |
| 76. भाषोत्पत्तिसिद्धान्ताः | अर्पिता अनुपमा | 164 |
| 77. अन्तर्दर्शनविधिः | आशालता दाश् | 166 |
| 78. प्रजातन्त्रशिक्षा | सुचित्रा बेहरा | 167 |
| 79. स्वच्छतायै संस्कृतशिक्षा | यंग् चन्द् ओझा | 169 |
| 80. भारते मूल्यशिक्षायाः आवश्यकता | मिता पधानः | 170 |
| 81. शिक्षाक्षेत्रे नवमाध्यमानां प्रसारः | ज्योति ए. के. | 172 |
| 82. मनोविज्ञाने मानवव्यवहारस्य अध्ययनपद्धतयः | अनुपमा मोहान्ति | 173 |
| 83. शिक्षायाम् आदर्शवादस्य प्रभावः | कल्पना नन्दः | 174 |
| 84. बालपर्यावरणशिक्षा | प्रज्ञापरमिता जेना | 176 |
| 85. समावेशात्मकशिक्षा | बासन्ति हंसदा | 177 |
| 86. बुद्धेः स्वरूपं सिद्धान्तश्च | स्मिताराणी मिश्र | 179 |
| 87. महर्षि अरविन्दस्य योगशिक्षादर्शनम् | मनीष् कुमार् तिवारी | 181 |
| 88. सङ्गणाकाधारितशिक्षा | मामालि राउत | 182 |
| 89. महात्मागान्धिमहोदयस्य शैक्षिकविचारः | लिस्ना सि. जेम्स. | 184 |
| 90. पर्यावरण शिक्षा | विनोदिनी नायकः | 185 |

| | | |
|---|---|---|
| 91. साम्प्रतिकयुगे संस्कृतशिक्षणस्य महत्त्वम् | सुश्रीस्मिता खुण्टिआ | 187 |
| 92. शिक्षायाम् अनुशासनस्य आवश्यकता | स्मृतिमञ्जरी राउत | 188 |
| 93. गणतन्त्रक्षेत्रे मनोवैज्ञानिकनिरीक्षणम् | रङ्कनिधि कन्दपान् | 190 |
| 94. मूल्यशिक्षा-श्रीनारायणगुरुदेवस्य योगदानम् | प्रसन्ना .ई. के. | 192 |
| 95. पर्यावरणस्वास्थ्ययोः सुरक्षा | रस्मिरेखा पात्र | 194 |
| 96. शिक्षाक्षेत्रे  मार्गदर्शनम् | राघवेन्द्र नरसिंह गावंकरः | 195 |

# न्यायदर्शन-मनोविज्ञानयोराधारेण संज्ञानात्मकज्ञाननिर्मितिवादस्य विमर्शः

**आचार्यः चल्ला लक्ष्मीनारायणशर्मा**

प्राचार्यः, शिक्षासङ्कायप्रमुखश्च

[भूमिका – न्यायदर्शने वर्णितायाः प्रत्यक्षज्ञानस्य प्रक्रियायाः, संज्ञानात्मकज्ञाननिर्मितिवादे प्रतिपादितायाः वस्तुसंज्ञानप्रक्रियायाश्च साम्यमनुभूयते। मनोवैज्ञानिकाः आत्मानं नाङ्गीकुर्वन्ति। तत्स्थाने मस्तिष्कमाधारत्वेन स्वीकुर्वन्ति।]

भारतीयेषु दर्शनेषु यथार्थज्ञानस्य प्राप्तेः विभिन्नाः प्रक्रियाः प्रदर्शितास्सन्ति। तत्र न्यायदर्शने वस्तूनां प्रत्यक्षे प्रत्यक्षमिति प्रमाणमङ्गीकुर्वन्ति। तत्र प्रक्रिया एवं प्रदर्शिता वर्तते - ‘आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन, ततः प्रत्यक्षम्’ इति। यदि आत्मनः स्थाने मस्तिष्कं संस्थाप्य घट प्रत्यक्षं वर्ण्यते तर्हि सा सूचनासंसाधनप्रक्रिया एवं भवति –

| | | | |
|---|---|---|---|
| | **रूपम्** | **चक्षुः** | |
| | **रसः** | **जिह्वा** | |
| **घटः** | **गन्धः** | **नासिका** | **मनः - मस्तिष्कम्** |
| | **स्पर्शः** | **त्वक्** | |
| | **शब्दः** | **कर्णः** | |

चक्षुरादीनि ज्ञानेन्द्रियाणि वातावरणात् घटादीनां विभिन्नाः सूचनाः मनः प्रापयन्ति। मनः मस्तिष्केण संयुज्य पूर्वानुभवानामाधारेण वस्तुनः रूपादिगुणान् संयोज्य घटादिद्रव्यप्रत्यक्षं साधयति।

**संज्ञानात्मकज्ञाननिर्मितिवादः** – संवेदनशीलः मानवः वातावरणात् उद्दीपकान् सङ्केतान्, सूचनाः वा प्राप्य प्रतिक्रियां करोति। मस्तिष्कं इन्द्रियाणां माध्यमेन प्राप्ताः सूचनाः पूर्वानुभवाधारेण विश्लिष्य प्रत्यक्षीकरणं साधयति। ज्ञानेन्द्रियम् उद्दीपकस्य सम्पर्कं प्राप्य प्रभावितं भवति। उद्दीपकस्य सूचनाः ऊर्जारूपेण स्नायुतन्त्रं प्रविशन्ति। तदा स्नायुतन्त्रेषु रसायनसम्बद्धानि परिवर्तनानि सम्भवन्ति। ततः परमेताः सूचनाः स्नायोः आवेगरूपेण मस्तिष्कं प्रविशन्ति। तदा पूर्वानुभवानामाधारेण मस्तिष्के उद्दीपकानां संज्ञानं भवति।

संज्ञानात्मकज्ञाननिर्मितिवादस्य संज्ञानप्रक्रियायां संवेदन - प्रत्यक्षीकरण -प्रतिमाधारण - प्रत्यास्मरण - चिन्तन - तर्क - समस्यासमाधानप्रभृतयः मानसिकप्रक्रियाः सम्मिलिताः भवन्ति।

नेयिस्सर् (Neisser - 1967) महोदयेन संज्ञानमेवं व्याख्यातम् – 'संवेदितसूचनानां (Sensory Information) ग्रहणं कृत्वा विस्तरणेन, सङ्ग्रहणेन, प्रत्यास्मरणेन, समुचितप्रयोगेण च संज्ञानं भवति' इति।

उपसंहारः – न्यायदर्शनोक्त-प्रत्यक्षप्रक्रियायाः, संज्ञानात्मकज्ञाननिर्मितिवादस्य वस्तुसंज्ञान-प्रक्रियायाश्च विमर्शनेन ज्ञायते यत् प्रक्रियानिरूपणे यद्यपि भेदो वर्तते तथापि ज्ञानेन्द्रियैः वस्तूनां ज्ञानं सम्भवति। तत्र मनसः मस्तिष्कस्य च स्थानं प्रधानं भवति। पूर्वज्ञानं, स्मृतिः, चिन्तनं, तर्कः, निश्चयः इत्यादयः मानसिकप्रक्रियाः प्रत्यक्षज्ञाने सहायिकाः भवन्तीत्येतद्विषये समानता दृश्यते।

## TEACHER AS A MENTOR

**Dr K. K. HARSHA KUMAR**
Associate Professor

RTE considers the teacher as a 'mentor'. Mentoring has much relevance and significance in the present scenario. The teacher - student relationship has undergone significant changes. A teacher should function not as a person who distributes/ dispenses knowledge, but as a facilitator who co-ordinates the various opportunities of students to gain knowledge .In reality, school are a second home for the child and teachers are the members of his/her family. A teacher should understand that all children do not receive love, consideration, security, appreciation and recognition etc equally at home. The responsibility of a teacher becomes complete only when he/she realises this and is able to express these feelings accordingly to each child. Only then will a school become a home. Only when a teacher becomes a mentor and a facilitator who helps gain learning outcomes, he/she will be a teacher of the new era.

Teachers who prepare themselves as mentors increase their potential to enhance student growth and development, help students maximize education experiences, and enrich their own teaching experience and professional development. Mentors often report that they gain exposure to new and diverse perspectives, improve coaching and listening skills, find work more meaningful and satisfying, hone desired leadership skills, and often become reengaged professionally.

When the teacher becomes a co-guardian, children get guidance, advice, support and opportunity to improve. The teacher as mentor should make interventions in the role of an experienced predecessor. Assistance for awareness and counselling are part of this. An effective mentor can bring out the hidden talents of a child. Through mentoring:

- The teacher and the student enjoy proper learning experiences.

- The knowledge-area of the child and the teacher widens.
- The bond between the student and the school is strengthened.
- Personality development and learning development of the child are ensured.
- Collective thinking, decision- making and collective effort are made possible.
- The relationship between parents and school is strengthened and an overall view of the learner's learning process is created.

***Mentoring skills***

A skill is a learned, observable behavior you perform that indicates how well you can do something. The set of skills described constitutes overall ability to mentor and be mentored is known as mentoring skills. Some of them are

- Listening Actively. Active listening is the most basic mentoring. ...
- Building Trust. ...
- Encouraging. ..
- Open mindedness….
- Exhibits Enthusiasm in the Field
- Demonstrates a Positive Attitude and Acts as a Positive Role Model
- Identifying Goals and Current.
- Instructing/Developing Capabilities. ...
- Providing Corrective Feedback. ...
- Inspiring....

The strategies for promoting effective learning in a mentoring relationship are congruent with those used to facilitate student learning:( Lois J. Zachary)

- Ask questions. The questions can open a learning conversation or shut it down.
- Reformulate statements.
- Summarize. Summarizing reinforces the learning and is a reminder of what has transpired.
- Listen for the silence. Silence provides an opportunity for learning.
- Listen reflectively. When you listen reflectively, hold up a mirror for the mentee.
- Provide consistent feedback.

Mentoring has become increasingly necessary in today’s time. It is being used for both Personal and Professional development. Mentoring helps to build a positive and concrete change in individuals and to boost the transfer of knowledge from the mentor to the individual.

**References:-**

1) Kerala School Curriculum 2013 Higher Secondary Level.
2) Phillips-Jones ,L.(2003). *Skills for successful Mentoring : Competencies of Outstanding Mentors and Mentees.*
3) Zachary, L. The Mentor’s Guide: Facilitating Effective Learning Relationships. San Francisco: Jossey-Bass, 2000.

**R. S. SANSTHAN (DU), GURUVAYUR CAMPUS, PURANATTUKARA,**
**THRISSUR – 680 551, KERALA**

# TEACHER EDUCATION AND ITS DEVELOPMENT IN POST INDEPENDENCE INDIA

**Dr K. GIRIDHARA RAO**
Assistant Proessor in Edn.,

Quality and excellence in the education sector is one of the major initiatives of the Government of India in its plans. To achieve the outcome of enhanced quality at all levels of education, Govt. of India has been focusing its attention on quality and excellence in higher education and teacher education. It is well known that teachers have a pivotal role in the development of an inclusive education system. Highly motivated, qualified, and trained teachers are important factor for ensuring meaningful access to education. Teacher education is the process for the development of proficiency and competence of teachers which in turn enable and empower them for meeting the requirements and challenges of the profession in present times.

After independence, several committees, commissions, documents and policy papers were prepared time to time and brought into force to review and suggest progress and achievements in every aspect of education, including teacher education. These were-

**University Education Commission (1948-49)** was the first education commission set up in Independent India. It critically examined the existing courses in teacher training programme and suggested that these courses must be flexible and adaptable to local circumstances. It recommended that teacher education courses should be remodeled, suitable schools to be taken for practical training and more time to be given to school practice, and replaced the term 'teacher training' with 'teacher education.'

**Secondary Education Commission (1952-53)** suggested that during one year of training graduate teacher should be trained in methods of teaching in at least two subjects. The practical part of teacher training should consist practice in teaching, observation, demonstration and criticism of lessons; it should also include the construction and administration of scholastic tests, organization of supervised study and "student's societies" , conducting library periods and maintenance of cumulative records.

**Ford Foundation Term (1954)** – was an International team of experts appointed by Government of India, to examine in detail the major recommendations of Secondary Education Commission. It recommended that the teacher training institutions should include demonstration or laboratory schools where experiments are made in curriculum construction and progressive methods of teaching are used.

**Pires Committee (1956)** recommended that practical aspect should be given more weightage than the theory portion in teacher training. The examination papers should be reduced to four viz.-

1. Principles of Education and School Organization

2. Educational Psychology and Health Education
3. Methods of Teaching Two School Subjects
4. Current Problems in Indian Education.

**Education Commission of 1964-66** (Kothari Commission) observed that a sound programme of professional education for teachers was essential for the qualitative improvement in education at all levels of teacher education to meet the requirements of the national education system.

**National Policy Statement on Education (1968**) emphasized that among all the factors which determine the quality of education and its contribution to national development, teacher is undoubtedly the most important. Teacher, must therefore, be accorded an honoured place in society. Teachers emoluments and service conditions should be adequate and satisfactory with respect to their qualifications and responsibilities.

**First Asian Conference on Teacher Education** (1971) held at Bangalore and jointly sponsored by Association of Teacher Educators (IATE) and the International Council on Education for Teaching (ICET) recommended that the programs of school education and teacher education in each country should be modified to meet the new challenges.

**Efforts of Indian Association of Teacher Educators (IATE)–**The Indian Association of Teacher Educators, formerly All India Association of Training Colleges, the only national organization of teachers of training institutions, have been organizing annual conferences beginning with their first meet at Baroda in 1950. IATE constituted a study group popularly known as Baroda Study Group towards revitalizing the B. Ed. Programme.

**National Commission on Teachers- I** (for school teachers) of **1983-85** suggested a 4 year training course after senior secondary, or preferably a 5 year course leading to graduation and training. For elementary teachers it suggested a two year training course after Class XII. It recommended that an integrated 4 year curriculum of a degree in education should consist of general education and professional preparation. Training curriculum for elementary teachers should emphasize on mastering of language and communication skills.

The teacher educators in colleges of education should be from disciplines of various school subjects like psychology, sociology, philosophy etc. The minimum qualification for a teacher educator should be PG degree in the subject and a B.Ed., preferably a M.Ed. degree. The minimum qualification for a teacher educator for the elementary training institutes should be a PG degree with B.Ed. training. This commission also suggested that the practice teaching should be replaced by the word Internship.

**The National Policy of Education (NPE)** in 1986 recommended that teacher education is a continuous process and its pre-service and in-service components are inseparable. NPE 1986 and its Programme of Action 1992 advocated for improving the quality of teacher

education as it was the prerequisite to improve the quality of school education. As result, some training schools were upgraded to District Institutes of Education and Training (DIETs), Colleges of Teacher Education (CTEs) and Institutes of Advanced Studies in Education (IASEs).

**Acharya Ramamurti Committee (1990)** observed that an internship model for teacher training should be adopted because "…the internship model is firmly based on the primary value of actual field experience in a realistic situation, on the development of teaching skills by practice over a period of time."

**Yashpal Committee (1993)** noted that inadequate programme of teacher preparation leads to unsatisfactory quality of learning in school. Therefore, the B.Ed. programme should offer the possibility of specialization in secondary or elementary or nursery education. The duration of the programme should either be one year after graduation or four years after higher secondary. The contents of the programme should be restructured and be relevant to the changing needs of school education. The emphasis should be on enabling the trainees to acquire the ability for self-learning and independent thinking. The statutory NCTE prescribed a Curriculum Framework (1998) to provide guidelines for the content and methodology of teacher education. As a result, many universities and state governments revised the courses of teacher education.

**The National Curriculum Framework (NCF) 2005** for school education made recommendations about curriculum, school, exams and many more. It stated that teacher quality is an outcome of several factors: teachers status, remuneration and conditions of work, besides teachers academic and professional education.

**National Knowledge Commission (2007)** suggested that there should be adequate monitoring of the teacher education programmes by private institutes, the budgetary allocations should be increased, and the state level training system along with DIETs should be revamped.

**National Curriculum Framework for Teacher Education (NCFTE) 2010** highlighted that the education and training of a prospective teacher will be effective enough be delivered by competent and professionally qualified teacher educators. To improve the quality of teacher education, the National Council for Teacher Education (NCTE) took up several initiatives jointly with National Assessment and Accreditation Council (NAAC) to bring quality.

**Teacher Education in different Five Year Plans**–Fourth and Fifth 5 year plans provided correspondence courses to thousands of elementary and secondary teachers as in-service programmes. B.Ed. course was started as correspondence mode by Himachal Pradesh University, Jaipur University and several South Indian universities with assistance of NCERT. NCERT Regional Colleges were started at Ajmer, Mysore, Bhubaneswar and

Bhopal. NCTE Act was passes in 1993 by the Parliament and NCTE was given the responsibility to look after the Teacher Education of the country.

The Eleventh plan was a boost for education sector. It focused on-

- Strengthening Teacher Education.
- Augmenting teacher education capacity in SC/ST and minority areas.
- Professional development of teacher through training programmes.
- Professional development of teacher educators through Refresher Courses and Fellowship programmes.
- Technology in teacher education.
- Integrating elementary teacher education with higher education.

In the Twelth 5 year plan, the thrust area is to integrate technology in teacher education to promote openness for adaptability to new technology for developing professionalism.

**Conclusion:** The success of the educational process depends to a rigid extent on the characteristics and ability of the teacher who is the corner stone of the arch of education. The expansion of teacher education was observed in terms of quantitative and qualitative aspects. All the above described commissions and report emphasis on the quality of teachers in general and teacher educator in specific. At present teachers are not the mere transmitters of information but facilitators in the path of students urge for more knowledge. All These efforts resulted a significant growth of teacher education in the nation.

References :-


- NCERT (1978): Teacher Education Curriculum a Framework. New Delhi, NCERT.
- The National Policy on Education, "Challenge of Educational policy perspective, Ministry of Education," Govt. of India, 1985.
- NCTE (1988): National curriculum Framework for Teacher Education, New Delhi.
- J. Reddy, "National Policy on Education," Review Committee Human Resource Development (HRD), 1992.
- Aggrawal, J.C. (1996), Teachers and Education in a Developing Society, New Delhi, Vikas Publishing House Pvt.
- National Council for Teacher Education (1998): Curriculum Framework for Quality Teacher Education, New Delhi, NCTE.
- डा प्रह्लाद् रा जोशी, अध्यापकशिक्षा, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, 2007.
- डा जि. सि. भट्टाचार्य, अध्यापकशिक्षा, श्रीविनोद पुस्तकमन्दिर, आगरा, 2010.

- पि. डि. पाठक, भारतीयशिक्षा और उसकी समस्याए, अग्रवाल पब्लिकेशन्स्, आगरा, 2012.
- रवीन्द्र अग्निहोत्री, आधुनिक भारतीयशिक्षा समस्याए और समाधान, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर्, 2013.


**R. S. SANSTHAN (DU), GURUVAYUR CAMPUS, PURANATTUKARA,**
**THRISSUR – 680 551, KERALA**

## आचार्य राममूर्तिशिक्षासमितिः & शैक्षिकविचाराः

**डा. डि. वेणुगोपालरावः**
सहायकाचार्यः (संविदा)

स्वातन्त्र्योत्तरशिक्षाविचारेषु राष्ट्रियशिक्षानीतिः (१८६८) अत्यन्तप्रधाना। राज्याङ्गे विद्यमानस्य ४६ प्रकरणस्यानुदेशनानुगुणं निश्शुल्कनिर्बन्धशिक्षायाः विषये निर्दिष्टविधिविधानानि प्रकटितानि। प्राथमिकस्तरादारभ्य विश्वविद्यालयशिक्षापर्यन्तं शिक्षाविधाने भाषायाः विचारः त्रिभाषासूत्रानुगुणं व्यवस्थितः स्यादिति . . इत्येवं बहवः विचाराः प्रोक्ताः। तदनु पञ्चवर्षाभ्यन्तरे एकवारं शिक्षाव्यवस्थायाः पुनर्वीक्षणं कुर्यादित्यपि निर्णयः स्वीकृतः। परन्तु निर्णयानुगुणं पुनः शिक्षायाः विषये अपेक्षितरूपेण पर्यवेक्षणं न जातम्। पश्चात् **पि. वि. नरसिंहारावः** यदा मानवसंसाधनशाखामन्त्रिरूपेण आसीत् तदा नवशिक्षानीतिः - १९८६ इति नाम्ना पुनः उत्तमशिक्षाव्यवस्थायाः अध्ययनं अकरोत्। अत्र नवोदयविद्यालयस्थापनम्, विद्यालयस्तरे गुणात्मकशिक्षा, सामाजिकन्यायः - समानशिक्षा, शिशुकेन्द्रितशिक्षा, कृत्याधारितशिक्षा, साङ्केतिकशिक्षा, श्यामफलकयोजना, अनौपचारिकशिक्षाव्यवस्था, सार्वत्रिकविद्यालयाः, वृत्तिशिक्षा इत्यादिषु बहुषु नवीनविषयेषु विचाराः प्रदत्ताः। नवशिक्षानीतिः - १९८६ विधानेन प्रतिपादितानां विषयाणां कार्यान्वयनं तथा तेषां फलितानि कानि इति ज्ञातुं समीक्षायै **आचार्य राममूर्ति** महोदयस्याध्यक्ष्ये १९९० तमे वर्षे काचित् समितिः निर्दिष्टा। सैव समितिः राष्ट्रियशिक्षानीतेः पुनर्निरीक्षणसमितिः इति प्रसिद्धा।

“Universal education upto the matriculation standard plus a sound grounding in a vocation is a goal we should work for. But for the present we have decided to lay stress on elementary education up to class VIII. This is

the minimum level every boy and girl in India should be enabled to attain."(Report of the Committee for Review of National Policy on Education (NPE),1986 p.XI.

सैव तन्नाम्ना आचार्य राममूर्तिशिक्षासमितिः इति नाम्ना प्रसिद्धा। समितिरयं स्वनिवेदनां १९९१ तमे वर्षे **केन्द्रसर्वकाराय** प्रादात्।

**सङ्घटितसमितेः सदस्याः -**

१ आचार्य राममूर्ति महोदयः - समितेः अध्यक्षाः पो.खादि ग्राम, जि.मुँगेर्, बिहार।

२ प्रो. सि. एन्. आर्. रावः - सदस्यः, निर्देशकः (Indian Institute of science)।

३ डा. सुखदेवः - सदस्यः, कुलपतिः (कृषिविश्वविद्यालयः), मध्यप्रदेशः।

४ डा. एम्. सनतप्पा - सदस्यः, भूतपूर्वकुलपतिः - मद्रासविश्वविद्यालयः।

इत्थं डा. आबायड सिद्धिकी, डा.भास्कर रे चौधरी, श्री.राम. जी. भाटवाडेकर्, प्रो. ऊषा मेहता, प्रो. सच्चिदानन्द मूर्तिः, डा. अनिल सदगोपालः, डा.टी.वी. कुन्नकल, प्रो. मृणाल मिरी, डा. विद्या निवास मिश्रा, श्री. एस्. एस्. काजिम, श्री. वेदव्यासः, श्री. मनुभाई पचोली, श्री.एस्. गोपालन् इत्यादयः सदस्याः आसन्।

**समितेः कार्यक्षेत्राणि -** प्रधानतया त्रीणि कार्याणि सन्ति। तत्र

१. राष्ट्रियशिक्षानीतेः पुनर्वीक्षणम् तथा तस्याः क्रियान्वयनविचारः।

२. नीतेः संशोधनावसरे उत्तमविचारप्रदानं तथैव विमर्शः।

३. तथैव संशोधितनीतिविचाराणां क्रियान्वयनाय विचारविमर्शप्रदानम्।

**राममूर्तिशिक्षासमितेः संसूचनानि - (Suggestions of Committee)**

**अ. पूर्वप्राथमिकच्छात्रसंरक्षणं तथा शिक्षा - (Early Childhood Care and Education (ECCE)**

१. प्रत्येकं प्रान्तस्य प्राथमिकमाध्यमिकविद्यलयानां समीपे प्रभावात्मकी शिक्षासम्बन्धिनी च काचित् उत्तमशिक्षासेवासंस्था सम्पादनीया।

२. येषां जनानां कृते शैक्षिकसौविध्यता नास्ति, तेषां वर्गीयाणां सम्बन्धबालकानां कृते प्राधान्यमत्र कल्पयेत्।

३. शिशुसंरक्षककेन्द्राणि, तेषां समयव्यवस्था च विद्यलयव्यवस्थानानुगुणं समयानुगुणं च साधयेत् येन बालिकाः उत्तमसमये आगत्य शिक्षां च प्राप्तुं शक्नुवन्ति।

४. अङ्गणवाडी इति शिक्षाव्यवस्थायाः रूपरेखा निर्दिष्टा भवेत्। तदनु प्रादेशिकतामनुसृत्य पाठ्यप्रणाली संरचनीया। तन्निमित्तं प्रोत्साहनं च प्रदेयम्।

**आ. अनुसूचितजनानां – अनुसूचितजनजातिजनानां कृते शिक्षाव्यवस्था -**

१. येषु प्रदेशेषु विद्यालयाः न सन्ति, तेषु प्रदेशेषु अष्टमपञ्चवर्षप्रणाल्यभ्यन्तरे विद्यालयाः स्थापनीयाः।

२. येषु प्रदेशेषु विविधजनजाति – अनुसूचितजाति - सम्बन्धजनसंख्या अधिकतया वर्तते, तेषु प्रदेशेषु विद्यालयनिर्माणेन सह अनौपचारिकशिक्षाकेन्द्राणि च स्थापनीयानि।

३. विविधजनजाति – अनुसूचितजाति – सम्बन्धजनैः सह ये शिक्षाप्राप्तये अशक्ताः सन्ति तेभ्यः उपचारात्मकशिक्षाप्रदानाय व्यवस्था कल्पनीया।

४. येषु क्षेत्रेषु उपर्युक्तोभयप्रकारकजनसंख्या अधिकतया वर्तते तत्र ग्रन्थालयव्यवस्था च कल्पनीया वर्तते।

५. विज्ञानं, गणितं, भाषणलेखनादि अभिव्यक्तीकरणकैशलानि, इतिहासः, समाजशास्त्रं तथैव विविधजनजाति – अनुसूचितजाति – सम्बन्धजनानां च इतिहासः, समाजशास्त्रं, राष्ट्रयजागरणे तेषां योगदानं किम्? एतद्वर्गीयाणां स्त्रियः, तासां विकासक्रमः, विकासाय योगदानं इत्यादि विषयेषु प्राधान्यं दद्यात्।

**इ. प्रारम्भिकशिक्षायाः सार्वभौमिकीकरणम् - (Universalisation of Elementary Education)**

१. शिक्षायाः सार्वभौमिकनामाङ्कनं तथा प्राथमिकशिक्षायां गुणवत्ततासम्पादनम्।

२. सेवाकार्यक्रमाणां सीमावधिः तथा विद्यालयसमाजयोः मध्ये सम्बन्धस्थापना।

३. शैक्षिकयोजनासु तथा शैक्षिकप्रबन्धनादिषु विकेन्द्रीकरणं सम्पादनीयम्।

४. प्राथमिकशिक्षायाः सार्वभौमीकरणावसरे समस्यात्मकक्षेत्रेषु दृष्टिरधिका सारणीया।

**ई. प्रौढशिक्षा - (Adult Education)**

१. प्रौढशिक्षायाः आधारः तु वयस्कानां विकाससम्बद्धः स्यात्।

२. प्रौढशिक्षायै जनाभियानस्य तथा महिलासमाख्यानामकविचाराणां त्यागः करणीयः।

३. मानवसंसाधनविकासमन्त्रालयस्य शिक्षाविभाग: ग्रामीणविकासविभाग: तथा श्रामिकविभाग: इत्यनयो: सहयोगेन व्यावसायिककौशलानां विकासाय प्रौढशिक्षायोजना: संरचनीया:।

**उ. शिक्षाया: व्यावसायीकरणम् - (Vocationlization of Education)**

१. नवमीकक्षात: द्वादशकक्षापर्यन्तं व्यावसायिकशिक्षायै निश्चितप्रतिकृत्याधारेणैव चयनप्रक्रिया समाचरणीया।

२. व्यावसायिकशिक्षाया: विचार: तमिलनाडु प्रदेशस्थ: इव सर्वत्र स्यात्।

३. ये छात्रा: औपचारिकरूपेण माध्यमिकशिक्षास्तरे न पठितवन्त:, तेभ्य: छात्रेभ्य: अनौपचारिकरूपेण व्यावसायिकशिक्षा प्रदातव्या।

**ऊ. उच्चशिक्षा - (Higher Education)**

१. विश्वविद्यालयशिक्षा स्नातकस्नातकोत्तरानुसन्धानशिक्षापर्यन्तं विशाला स्यात्।

२. विश्वविद्यालयशिक्षाव्यवस्थायां चयनात्मकप्रवेशप्रणाली न स्यात्।

३. विश्वविद्यालयानुदानायोगस्य पुनर्वीक्षणविचारा: स्वायत्तशिक्षासंस्थानां विषये अनुकूला: स्यु:। तदनु अस्य विश्वविद्यालयानुदानायोगस्य पुनस्सङ्घटनं स्यात्।

४. कृषिविश्वविद्यालयै: स्वीयकार्यप्रणालीं कृषिसम्बन्धरूपेण संरचनीया भवति। राज्यसर्वकारविश्वविद्यालया: ग्रामीणकृषिकार्यविकासाय कठिबद्धा: स्यु:। राष्ट्रियपरीक्षणसेवा परीक्षानिर्वहणात्मिका काचित् समितिरेव न, सा विकासात्मकाभिकरणत्वेनापि स्यात्।

५. शिक्षकाणां विकासाय विश्वविद्यालयेषु तेषां प्रवेशानन्तरं प्रशिक्षणव्यवस्था कल्पनीया भवति।

**ऋ. प्राविधिकशिक्षा प्रबन्धनशिक्षा च - (Technical and Management Education)**

कालेऽस्मिन् प्राविधिकशिक्षायै नैका: सस्था: स्थापिता:। बहुविधकार्याणि अपि कृतानि। विकासक्रम: अपि गणनीय: आसीत्। प्राय: नियतानियतशिक्षाप्रणाल्याभ्यां शिक्षा प्रदीयमाना आसीत्। अनौपचारिकशिक्षया प्राय: पञ्चसप्तत्यधिकच्छात्राणां कृते प्रवेशाय अवसर: अपि कल्पित:। तदनु IIT, IIMS, IISC, NITIE, ISM, SPA, NIFFT, NID इत्यादि संस्था: स्थापिता:। एताभ्य: विभिन्नसूचना: प्रदत्ता:। ता: -

१. एस्. एस्. काँबाग् आध्यक्ष्ये सामूहिकराजनैतिकजागरणसमित्या प्रदत्तानुदेशानां कार्यारम्भः करणीयः।
२. AICTE इति संस्थायाः वैधानिकस्वरूपं निर्मीय, तन्निमित्तं कार्यालयस्थापना अपि करणीया।
३. सततमूल्याङ्कनव्यवस्था अनुपालनीया। सर्वदा पुनर्वीक्षणं करणीयम्।
४. विद्यालयेषु वैज्ञानिकतायाः विकासः करणीयः। प्राविधिकशिक्षायै तथा व्यावसायिकशिक्षायै च छात्रप्रवेशः गुणवत्ताधारितः स्यात्।
५. अखिलभारतीयस्तरे स्पर्धाधाररूपेण शिक्षकाणां नियुक्तिः करणीया।
६. प्राविधिकशिक्षासंस्थासु प्रायोगिककार्याय अधिकबलं प्रदेयम्। शिक्षकाणां गुणवत्ताविकासाय अध्ययनावकाशः तथा विरामकालिकप्रशिक्षणव्यवस्था च स्यात्।
७. सङ्गणकव्यवस्था अवश्यं स्यात्। दृश्यश्रव्योपकरणानां सौविध्यं स्यात्। ग्रन्थालयविकासे प्रगतिः स्यात्।
८. अधिगमसंसाधनकेन्द्रं स्यापनीयम्। छात्राणां तथा शिक्षकाणां कृते आवासव्यवस्था अपेक्षितरूपेण स्यात्।

**ए. शिक्षकशिक्षा - (Teacher Education)**

वर्तमानशिक्षकशिक्षाव्यवस्था सर्वा सिद्धान्तपक्षतः प्रधाना वर्तते। अत्र विद्यालयाः, महाविद्यालयाः, विश्वविद्यालयाः समाजात् पृथक् सन्ति। शिक्षकप्रशिक्षणाभ्यासः तथा तस्यावधिः च शिक्षकानुभवे अनुपयुक्तः वर्तते। विद्यालयेषु प्रशिक्षणावसरे यानि उपकरणानि क्रियन्ते, तानि विद्यालयवास्तविकपक्षतः सम्बद्धानि न भवन्ति। आदर्शप्रशिक्षणाभ्यासः प्रशिक्षणसंस्थाधीनः नास्ति। मूल्याङ्कनप्रणाली सुव्यवस्थिता नास्ति। इत्येवं विविधांशेषु परिवर्तनाय समित्या कतिपयविचाराः कृताः सन्ति। ते तु –

१. प्रशिक्षणकार्यक्रमः दक्षताधारितः स्यात्। भावात्मकपक्षतः अधिकबलं दत्वा पाठयेत्।
२. सेवाकालीनप्रशिक्षणव्यवस्था शिक्षकावश्यकतानुसारं स्यात्। शिक्षकशिक्षा पत्राचारप्रक्रियारूपेण न स्यात्।
३. शिक्षकप्रशिक्षणाय अवधिः अधिकतया स्यात्। वास्तविकतायै प्राधान्यं दद्यात्। अनुभवाधारितञ्च स्यात्।

४. व्यावहारिकपक्षस्य तथा सैद्धान्तिकपक्षस्य च प्रशिक्षणकाले प्राधान्यं देयम्।

५. राष्ट्रियशिक्षकशिक्षापरिषदा प्रस्तावितपाठ्यक्रमस्य विवरणं प्रशिक्षणसंस्थाभ्यः प्रदेयम्।

६. शिक्षकाणां तथा प्रशिक्षकाणां प्राचार्याणाञ्च गुणवत्ताविषये श्रद्धा प्रदर्शनीया। येन ते संस्थानां विकासाय महत्वपूर्णयोगदानप्रदाने शक्ताः भवेयुः।

**समित्यां प्रतिपादिताः मुख्यशैक्षिकविचाराः –**

- समग्रतया, सम्पूर्णतया च या नवशिक्षानीतिः प्रतिपादिता, तस्यां समस्यात्मकविषयानधीत्य, परिशील्य च नियतशिक्षा, अनियतशिक्षा, वृत्त्यात्मकशिक्षा, साधारणशिक्षा, साङ्केतिकशिक्षा इति विभिन्नतया विद्यमानशिक्षाव्यवस्थायां भेदभावाः यदा न स्युः तदा रूपकल्पनं कश्चनांशः।
- नवशिक्षानीत्या मानवः आर्थिकवस्तुरूपेण तथा संसाधनरूपेण स्यादिति प्रतिपादितः। परन्तु मानवः मानवतोत्पादकः तथा मानवतोदारकः, सांस्कृतिकशक्तियुतः, सङ्घसंस्कर्ता, देशभक्तः च यथा स्यात् तादृशशिक्षा प्रदातव्या इति उक्तः। शिक्षायाः लक्ष्याणि अपि तानि स्युरिति आह। मानवसंसाधनानां निर्माणं शिक्षायाः लक्ष्यं न स्यादिति अपि स्पष्टीकृतम्।
- शिक्षाव्यवस्थां विभज्य नियतानियतसाङ्केतिकशिक्षात्वेन प्रतिपादिता नवशिक्षानीत्याम्। परन्तु अत्र उपरि निर्दिष्टनैकप्रकारकशिक्षाव्यवस्थां निराकृत्य समग्रशिक्षाव्यवस्था कल्पनीया इति घोषिता। सर्वे विद्यालयाः नियतविद्यालयाः स्युरिति अवदत्।
- बालिकाः तथा बालकाः च यदा विद्यालयविषये आकर्षिताः भवेयुः तधा नूतनपद्धतयः शिक्षाव्यवस्थायां सम्पादनीयाः।
- असमानतां या शिक्षा प्रेरयति तां नवोदयशिक्षां न प्रोत्साहयेदिति उवाच। सर्वेषु छात्रेषु यया समानताभावना उत्पादयितुं शक्या तादृशी शिक्षाव्यवस्था एव स्यादिति अवोचत्।
- कोठारी आयोगे सूचिता सामान्यपाठशालाव्यवस्था (Common School system) सम्पूर्णभारते १० वर्षात्मकावधौ सम्पादनीया इति विचारः प्रकटितः।
- प्राथमिकशिक्षा मौलिकप्राथमिकाधिकारत्वेन स्वीकरणीया सर्वैरिति अवदत्। ग्रामीणप्रान्तेषु शिक्षाव्याप्तये अधिकश्रद्धा प्रदर्शनीया इति तन्निमित्तम् अधिकसंसाधनानि

कल्पनीयानि इति अवदत्। जनजातिसूचीत्यादि जनानां कृते शिक्षाप्रदानाय वातावरणं कल्पयेदिति अवदत्।

- महिलाशिक्षायै, तत्सम्बद्धसमस्यानां च परिष्काराय मार्गाः अन्वेषणीयाः इति सूचितम्। शिशुसंरक्षणं तथा शिशुविद्या इति अंशद्वयमपि आधिकारिकसूत्रेषु स्थापितम्।
- वार्षिकपरीक्षाव्यवस्थां निराकृत्य, निरन्तरमूल्याङ्कनव्यवस्था स्यादिति निर्णयः स्वीचकार। ९-१२ कक्ष्यासु सर्वासु वृत्तिशिक्षाबोधनं निश्चितरूपेण स्यादिति अकथयत्।
- उद्योगाय उपाधिभिः सम्बन्धः न स्थापनीयः। निरीक्षकाः कौशलाधारेण तादृशान् स्वयं चेतुमर्हन्ति इति तादृशचयनविधयः प्रदिपादिताः।
- शिक्षाव्यवस्थायां सर्वकारयोगदानं महत्तमं स्यादिति, तथा निर्णस्वीकारे प्रजातान्त्रिकता अनुसरणीया इत्यपि सूचितम्।
- प्राचीनग्रन्थालयानामध्ययनं, तथा तेषामनुसन्धानं न केवलं साहित्यदृष्ट्या, अपि च सम्प्रदायानां, मूल्यानां च संरक्षणाय स्यादिति कथितम्।
- उन्नतशिक्षाविद्यालयेषु मतोन्मादकार्यक्रमाः, प्रान्तीयदुरहङ्कारकार्यक्रमाः, कुलतत्वविचाराः इत्यादि यथा न स्युः तथा व्यवहरेदिति आदेशाः प्रदत्ताः।
- उन्नतशिक्षास्तरे शिक्षाशुल्कं अधिकतया स्वयं वर्धयित्वा, शिक्षाक्षेत्रेषु संसाधनानां कल्पनाय धनस्य सद्विनियोगं कुर्युरिति अवदत्। तथैव जनजातिसूचिजनानां कृते छात्रवृत्तिं प्रदाय, तेभ्यः आर्थिकसहायतायै विभिन्नकार्यक्रमाः समायोजनीयाः इति अकथयत्।
- नैतिकप्रमाणानि संरक्षणाय शिक्षाव्यवस्थाः कठिबद्धाः स्युः इति असूचयत्।
- प्रदेशानुगुणं मातृभाषायां तथा तत्प्रदेशस्थभाषायां वा शिक्षणं स्यादिति उवाच।
- शैक्षिकनिर्णयाणां स्वीकरणावसरे छात्राणां, शिक्षकाणां तथा अभिभावकानां भागस्वाम्यता स्यादिति अकथयत्। शैक्षिकावसराः आदौ प्रकटनीयाः, पश्चात् अपेक्षितशिक्षाव्यवस्थां चालयेदिति अवदत्।

इत्थं नवशिक्षानीतिसम्बन्धविचारानधिकृत्य नैकप्रकारकविचारा: प्रकटिता:। परिशीलयामश्चेत् १९८६ नवशिक्षालीतौ ये विचारा: प्रोक्ता:, तेभ्य: व्यतिरेकरूपेण सर्वेऽपि एते विचारा: सन्तीति भाति। अत एव सर्वकारपरिवर्तनेन पूर्वेक्तविषयेषु पुन:समीक्षायै कांश्चन समितिमादिदेश।

**सन्दर्भग्रन्थसूची -**

१. भारतीय शिक्षा और उसकी समस्याएँ – पी.डी. पाठक्।

२. आधुनिक भारतीय शिक्षा – समस्याएँ और समाधान – रवीन्द्र अग्निहोत्री।

३. भारतीया आधुनिकी शिक्षा – डा. लोकमान्यमिश्र:।

4. शिक्षा आधारालु – (तेलुगु)

शिक्षाशास्त्रविभाग:, रा.सं.सं., गुरुवायूर् परिसर:, केरलम् – ६८० ५५१

## विशिष्ट - एकीकृत - समावेशीशिक्षा - इत्येतासां परिचय:

**डा. प्रभल विद्याधर:**

सहायकाचार्य: (संविदा)

क्षणक्षणपरिवर्तिनि संसारे सर्वदा प्रतिपदं परिवर्तनमवलोक्यते नैकेषु रङ्गेषु। तत्र शिक्षा क्षेत्रमप्यन्तर्भवति। बह्वीषु समस्यासु सल्लीनैषा प्रतिदिनं नूतनसमास्याभि: संतर्किता परिदृश्यते। प्रशिक्षणप्रणाल्यां भृशं तत्वचिन्तका:, दार्शनिका: समस्यासमाधानान्वेषणे तत्परा: भवन्ति, अनुसन्धानञ्चव्यधास्यन्ति। तत्र नवनूतनक्रम:, प्रतिपर्यायं राष्ट्रियस्तरे शिक्षाविभाग: नूतनांशेषु तत्पर: दृश्यते। अधुना शीक्षाक्षेत्रे बह्वय: शाखा: प्रत्येकं शास्त्रं विपुला: जाता:। अर्थात् शाखोपशाखत्वेन परिणिता: अवलोक्यन्ते। तत्रायं नूतनसङ्कल्प: वर्तते यत् समावेशीशिक्षेति। अत्र पत्रेऽस्मिन् समावेशीशिक्षासम्बन्धविषयान् यथामति विवृणोमि।

**विशिष्टशिक्षा (**Special Education**) -** समर्थबालेभ्य: भिन्ना:, नामविकलाङ्गा: इति। विकलाङ्गा:-दिव्याङ्गा: - अन्यथासमर्था: इति नाना नामभि: व्यवहारो दृश्यते। अन्यथासमर्थबालेभ्य: आवश्यकतापूरणाय निर्मितमाहोस्वित् संङ्कल्पितं अथवा प्रतिपादितशिक्षाक्रम: एव विशिष्टशिक्षेत्युच्यते (Special Education)। अर्थात् पृथक्

शैक्षिकावसरा:, प्रत्येकावसरापेक्षितच्छात्राणां, विशेषश्रद्धालुच्छात्राणां कृते या विशिष्टपद्धतिः अनुश्रीयते सा विशिष्टशिक्षेत्युच्यते। शास्त्रमिदमाधुनिकं वर्तते। सभ्यसमाजे अनुभूयमानशिक्षासमस्यानां समाधानत्वेन व्यवहरति। येषां छात्राणां कृते पृथगवसरा: अथवा विशेषावसरा: (Special Attention) अपेक्षन्ते तेषां छात्राणां कृते तान् अवसरान् परिपूरयन्, तादृशानां बालानां मूर्तिमत्वविकासाय समाजे च सामान्यमानवरूपेण जीवनाय स्थानं कल्पयति। पुनरावासस्यावस्यकताया: साहाय्योपकारकाणामन्वेषणे सहायकं शास्त्रं वर्तते विशिष्टशिक्षेति।

इत्थमपि उच्यते पृथगावश्यकतायुतच्छात्राणां का: पृथगपेक्षा:? तासामपेक्षाणां कारणानि कानि? अनुभूयमानसमस्या: का:? तासां निवारणोपाया: के? इत्यादिकमनुसन्धनाय सहकरोति। ते च बाला: शिक्षया अनया सुशिक्षति: भूत्वा सामाजिकजीवने तत्सम्बन्धान् व्याक्तित्वविकासवर्धनमित्यादय: साध्यन्ते। विशिष्टबालकानां जीवनशैलीं तेषां जीवनपद्धीञ्च ज्ञात्वा तदनुरूपशिक्षा प्रदेया। सुखजीवनाय स्वकार्याणि स्वयमेव कर्तुम् अथवा सम्पादयितुं सामर्थ्यसम्पादनम्। तदर्थं शिक्षाग्रहणं पौन:पुन्येन कार्यकरणायावश्यकतथ्यानामन्वेषणं विशिष्टोपचाराणाञ्च नियोजनमत्र विशिष्टशिक्षायां क्रियते।

**विशिष्टबालकानां लक्षणानि स्वभावाश्च -**

१.समेषां वैयक्तिकविद्यावसाराणं परिपूर्ति:।

२.व्यक्तिश: अपेक्षाणां पूर्त्यै वाञ्छितशिक्षणपद्धति- शिक्षणसामग्री- एवमन्यप्रकारकसर्वविधसामग्रीणां प्रकल्पनम्।

३.विशिष्टशिक्षादानाय शिक्षकप्रशिक्षणद्वारा प्रत्येककौशलयुतशिक्षकाणां निर्मिति: कर्तव्या।

४.शारीरिक-मानसिकवैभन्यमभिज्ञाय यथाशक्तिसमानशिक्षादानाय प्रयत्न: विधेय:।

५.समानशिक्षाप्राप्तौ कष्टमनुभूयमानेभ्य: छात्रेभ्य: पृथक्शैक्षणिककार्यक्रमान् निर्माय शिक्षणं प्रदेयम्।

६. शिक्षया अनया स्वकार्याणि स्वीयशक्त्या कर्तुं समर्थान् निर्मेम।

७. अन्यथासमर्थेषु जनसामन्ये समत्वभावना-समानत्वञ्च साधयाम: इति भावनाया: संवर्धनम्।

**एकीकृतशिक्षा (Integrated Education) -** पृथगावश्यकतायुतबालान् अर्थात् शारीरिक - मानसिकाक्षमबालान् सामान्यविद्यालयेषु प्रवेशं कारयित्वा समबालैस्सह शिक्षाप्रणाल्यां कार्यक्रमनिर्वहणमेव एकीकृतशिक्षा। अर्थात् अन्यथासमर्थबालाः समर्थबालैस्सह मिलित्वा सहकाररूपेण शिक्षां गृह्णीयुरित्यर्थः। विशिष्टबालकेभ्यः नाम विकलाङ्गेभ्यः पृथक् विद्यालयव्यवस्था मास्तु इति अभिप्रेरणया एकीकृतशिक्षायाः विकासः जातः। भिन्नावश्यकतानां बालानां पृथग्व्यवस्थाकरणे संसाधनानां शिक्षणसामग्रीणामुपकरणानां च समस्या समुत्पन्नेति हेतोः समग्रशिक्षायाः एकीकृतशिक्षा वा आरम्भः जातः।

**एकीकृतशिक्षायाः विशेषताः -**

१) एकीकृतशिक्षया अन्यथा समर्थबालानां मानसिकाभिवृद्धिः जायते।

२) समेषु एकप्रकारकसामाजिकमूल्यसंवर्धनेन सामाजिकसमग्रतां साधयितुं शक्यम्।

३) विशिष्टशिक्षापेक्षया एकीकृतशिक्षायाः व्ययः न्यूनः।

४) समेभ्यः समानविद्यावसराः प्रकल्पनीयाः।

५) समपाठ्यप्रणाली उभाभ्यां भवेत्।

६) विशिष्टबालकाः आत्मन्यूनतामपाकृत्य आत्मधैर्येण सामाजिकैस्सह समत्त्वं, समभावनाञ्च प्राप्य जीवने अग्रेसराः भवन्ति।

७) अन्यथासमर्थबालाः स्वाङ्गलोपत्वं विस्मृत्य समबालैः सह मिलित्वा सुखेनाध्ययनरताः भवन्ति।

८) प्रोत्साहनपूर्वकशिक्षया न्यूनतां दूरीकृत्य समर्थसखमयजीवनं कर्तुमर्हन्ति।

**समावेशीशिक्षा** (Inclusive Education) - समावेशीशिक्षा नाम प्रत्येकं छात्रम् एकोपागमत्वेन गणनां कृत्वा व्यक्तिशः निर्देशनदानमेवेति । इयं बालानां शारीरिक-ज्ञानात्मक-सामाजिक-सांवेगिक-भाषिकसम्बद्धमाहोस्वित् भिन्नभिन्नाङ्गलोपयुतान् विशिष्टबालकान् सर्वान् अपि सामान्यविद्यालयीयछात्रैः सह समावेशयित्वा(मेलयित्वा) सम्भूय एकस्यां कक्षायामेव शिक्षादेयेति सूचयति।

**अर्थात् -** विशिष्टावश्यकयुतबालाः, समर्थबालैः सह यस्मिन् विद्यालये पठन्ति तत्रैव अपेक्षितसंसाधनानि, उपकरणानि च प्रदाय सुकौशलयुताध्यापकेभ्यः शिक्षादानं यत्र प्रचलति सा व्यवस्था समावेशीशिक्षाव्यवस्था। छात्राणां वैयक्तिकन्यूनताः दूरीकृत्य (वैयक्तिकसमस्या अविगण्य) सर्वेभ्यः समानेकप्रकारकशैक्षिकावसरप्रकल्पनमेव समावेशीशिक्षेत्युच्यते।

**लक्षणानि -** छात्राः सर्वे विशिष्टगुणोपेताः भवन्तीत्यतः प्रत्येकं छात्रं विशिष्टछात्रवत् परिगण्य तस्य व्यक्तित्वाय, प्रशंशापूर्वकसम्माननं प्रदेयम्।

१) विशिष्टाध्यापनपद्धतिषु विधिषु च समन्वयसम्पादनम्।

२) अभ्याससमये आगम्यमानसमस्यां छात्रदोषवत् परिगण्य विद्यालयीयसामान्यकार्यमिव दोषरहितमिति परिगणयेत्।

३) अध्ययनसम्बन्धितसमस्याः नैकाः मनसिनिधाय छात्रानुकूलवातावरणं परिकल्पयेत्।

४) अभ्यसने नूतनपरिणामान् मूल्याङ्कने अनेतुं नूतनयुक्तीः प्रयुज्याभ्यसनद्वारा व्यक्तित्वं संवर्धयितुं शक्यम्।

५) कक्षायां सुनागरिकवातावरणनिर्माणम्।

६) छात्रेष सानुकूलतासम्पादनाय अपेक्षति, सुव्यवस्थितपरिवेशः प्रकल्पनीयः।

७) सविश्वासं जीवनाय अन्यथासमर्थबालाः अपि अनया शिक्षापद्धत्या सुविकसितनागरिकरूपेण समाजे स्वयोगदानं कृत्वा परितुष्टाः भवन्ति।

साम्प्रतिकशिक्षाजगति प्रतिदिनपरिवर्तनसन्दर्भेऽस्मिन् शिक्षाशास्त्रिणः अभिनवपद्धतयः काः ? नूतनशिक्षाक्रमाः के ? इति विचारवर्धनाय छात्राणां परिचयाय च अत्र कश्चनविचारः मया विहितः। आदौ विकलाङ्गान् समाजे आनयनमेका महती समस्या असीत्। ततः तान् विद्यालयपर्यन्तमानयनाय प्रयन्तः कृतः, एषा विशिष्टशिक्षा। तत्र साफल्यमापुः। तस्य व्ययः अधिकः इत्यतः श्रवण-बधिरचलनादिसमस्यासु प्रथमद्वितीयस्तरसमस्यापर्यन्तं विद्यमानच्छात्राणां समबालैः सह मिलित्वा शिक्षा भवतु इति एकीकृतशिक्षायाः आरम्भमकुर्वन् शिक्षातल्लजाः। तदनु सर्वे एकत्रैव शिक्षितास्युरिति मत्वा अधुना आप्रपञ्चे समावेशीशिक्षायाः चर्चा प्रचलति। एषः मूलविचारः। साम्प्रतं शिक्षाशास्त्रिच्छात्राः भाषाशिक्षणे, संस्कृतशिक्षाक्षेत्रे नाम गद्य-पद्य-व्याकरण-नाटकादीनां पाठने शिक्षणकौशलानि च संवर्धने संलग्नाः चेन्नालम्। परं शिक्षारङ्गे नूतसङ्कल्पानां विषयेऽपि श्रद्धधानाः भवेयुरिति सूच्यते।

**परिशीलितग्रन्थाः -** शिक्षा की दार्शनिक एवं समाजशास्त्रीय पृष्ठभूमि – डा.रामशकल पाण्डेय

Inclusive Education – Prof. Digumarti Bhaskara rao

विशिष्टबालकों की शिक्षा – M. L. Dhavan

समावेशी शिक्षा - Dr. Asha Lata, Amit Prakashan, Jalandhar.

शिक्षाशास्त्रविभागः, रा.सं.सं., गुरुवायूर् परिसरः, केरलम् – ६८० ५५१

# अधिकरणम्

**डा. महेशकुमारपाणिग्राही**
सहायकाचार्यः (संविदा)

**अधिक्रियते यस्मिंस्तदधिकरणम्** इति व्युत्पत्या अधिकरणपदं स्वतः अधिकरणसाधनं कृदन्तपदं वर्तते। यच्च पदमधि-उपसर्गात् डुकृञ्(कृ) करणे धातुतः ल्युट्प्रत्यये[१] निष्पन्नम् । एतस्य पदस्य विवेचनावसरे विभिन्नविचाराः सम्मुखे आयान्ति। तेषु विचारेषु शास्त्राङ्गत्वविचारः दर्शनशास्त्रदृष्ट्या प्रमुखः। परन्तु अधिकरणमिति श्रवणेनाधिकरणकारकमिति आदौ मनस्यायाति। अतोऽधिकरणस्य कारकत्वविचारं सामान्यं प्रतिपाद्य शास्त्राङ्गं प्रति प्रविशामः।

**अधिकरणस्य कारकत्वविचारः -**

व्याकरणशास्त्रानुसारेणाधिकरणं कारकसंज्ञकं भवति । "आधारोऽधिकरणम्"[२] इति सूत्राधारेणाधिकरणकारकसंज्ञा विधीयते। कारकसंज्ञा प्राप्ते सति "सप्तम्यधिकरणे च"[३] इति विधिसूत्राधारेण सप्तमीविभक्तेः विधानं क्रियते । भर्तृहरिणा वाक्यपदीयग्रन्थे अधिकरणकारकविषये भणितं यत्-

**कर्तृकर्मव्यवहितामसाक्षाद् धारयत् क्रियाम्।**
**उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।।**[४]

अर्थात् कर्त्रा कर्मणा च व्यवहृतं क्रियापदं धारयित्वा असाक्षात् क्रियासिध्यर्थमुपकारकं कारकं यत्, तदेव शास्त्रे अधिकारणमिति विवेचितम् ।

व्याकरणशास्त्रमतिरिच्य न्याय-मीमांसादर्शनयोरपि अधिकरणस्य कारकत्वविवेचनं किञ्चित् भिन्नरूपेण वर्तते । न्यायदर्शने जगदीशतर्कालंकारेण सप्तमीविभक्तेः अर्थोऽधिकरणमिति स्वीकृत्य इत्थं परिभाषितम्-

**यत्क्रियायां यादृशोऽर्थः सप्तम्या विग्रहस्थया**
**बोध्यस्तस्यां तदेवाधिकरणं नाम कारकम्।।**[५]

अर्थात् यस्मिन् क्रियापदे यादृशार्थः सप्तमीद्वाराबोध्यः, तस्मिन् क्रियापदे तदेवाधिकरणकारकमवगम्यते।[६]

"मीमांसादर्शने अधिकरणं हि कत्रादीनि धारयति । तान्याधार्यमाणानि न शक्नुवन्ति क्रियामभिनिवर्तयितुम् ।"[७]

अर्थादधिकरणं कर्तादिकारकाणां धारकम् । कारणं किमपि अनाधारितः पदार्थः क्रियायाः सम्पादनं कर्तुं नार्हति। अत्रायमभिप्रायः वर्तते यत् यः यस्य कारकस्य धारकः, स तस्य (आधेयतानिरूपिताधारतायाः विशिष्टस्सन् ) अधिकरणमुच्यते ।

**अधिकरणस्य शास्त्राङ्गत्वविचारः -**

शास्त्रेषु अधिकरणं नाम प्रकरणविशेषः । यत्र प्रतिपाद्यविषयोपरि व्याप्याधिकारः वर्तते । एतत् सम्पूर्णशास्त्रस्य प्रतिपाद्यमङ्गम् । जैमिनीयमीमांसायां, बादरायणीयशारीरकमीमांसायां(ब्रह्मसूत्रे) चादौ अध्यायरूपेणविभागः वर्तते । अध्यायेषु पादाः भवन्ति, पादेष्वधिकरणस्य विभागः । अर्थात् पादान्तर्गतलघुप्रकरणमेव (विभाग एव) अधिकरणम् इत्युच्यते।

अधिकरणविषये मीमांसादर्शने स्पष्टीकरणमुपलभ्यते। पूर्वमीमांसादर्शनस्य प्रारम्भे प्रथमसूत्रस्य विवेचनावसरे अधिकरणस्य निरूपणं कृतं ग्रन्थकारेण । तत्र लिखितम् - “तत्राथातो धर्मजिज्ञासा[८] इति प्रथममधिकरणं पूर्वमीमांसारम्भोपपादनपरम् । अधिकरणञ्च पञ्चावयवमाचक्षते परीक्षकाः । ते च पञ्चावयवाः विषय-संशयः-पूर्वपक्षः-सिद्धान्तः-संगतिरूपाः ।”[९] अर्थादथातो धर्मजिज्ञासा प्रथममधिकरणम् । यस्योद्देश्यं पूर्वमीमांसायाः प्रारम्भसिद्धीकरणम् । परीक्षकाः पञ्चावयवमाध्यमेनाधिकरणं परीक्षन्ते । ते पञ्चावयवाः-

**विषयः संशयश्चेति पूर्वपक्षस्तथोत्तरः।**
**प्रयोजनं च पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्।।**[१०]

उपरोक्तकारिकायां “प्रयोजनं च” स्थाने “संगतिश्च” पाठान्तरे वर्तते । संगतेः अर्थः प्रयोजनेन सह शास्त्रस्य विषयस्य च प्रतिपाद्य-प्रतिपादकभावसम्बन्धः । यस्य विवेचनेन विषयस्य स्पष्टतायाति । उक्तं यत्-

**सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते।**
**शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः।।**[११]

कुमारिलभट्टमतानुसारेण जनाः संगतिमधिकरणस्याङ्गरूपेण न स्वीकुर्वन्ति। ते उत्तरमेवाधिकरणस्याङ्गं स्वीकुर्वन्ति। वादिनां मतखण्डनात्मकं वाक्यं उत्तरम् । उत्तरप्राप्तेरनन्तरं निर्णयस्य स्थानम्। कारणम् उत्तरमशुद्धमपि भवितुमर्हति। अतः निर्णयः पृथगेव। भाट्टमते अधिकरणस्य पञ्चाङ्गमित्थं वर्तते -

**विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।**

**निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्।।**[१२]

अर्थात् - विषयः, विशयः, पूर्वपक्षः, उत्तरम्, निर्णयश्चेति पञ्चाङ्गम् । अत्र विशयः नाम संशयः। विभिन्नशास्त्रकाराणामाधारेण पञ्चाङ्गमित्थं वर्तते यत्-

१. **विषयः, संशयः, पूर्वपक्षः, उत्तरपक्षः, प्रयोजनम् -** इति सामान्यरूपेण पञ्चाङ्गम् ।

२. **विषयः, संशयः, पूर्वपक्षः, सिद्धान्तः**(उत्तरपक्षः), **संगतिः** - इति पाठान्तरे इत्थं वर्तते ।

३. **विषयः, विशयः**(संशयः), **पूर्वपक्षः, उत्तरम्, निर्णयः** - इति कुमारिलभट्टमतानुसारेण पञ्चाङ्गम् ।

इत्थं नामान्तरेण पञ्चवयवाः भवन्ति । सम्प्रति तेषां पञ्चावयवानां क्रमशः विवरणं प्रस्तूयते ।

**१)विषयः (SUBJECT) - विषयः नाम यस्योपरि अधारिताः केचन विचाराः प्रवृत्ताः भवन्ति।** शास्त्रे विषये च प्रतिपाद्य - प्रतिपादकभावसम्बन्धो वर्तते । अधिकरणस्य कृतेऽपि समानसम्बन्धः अनुवर्तते । अर्थात् विषयाधिकरणयोर्मध्ये विषयः प्रतिपाद्य, अधिकरणं प्रतिपादकम् ।

उदाहरणम्- मीमांसाशास्त्रस्य प्रथममधिकरणं जिज्ञासाधिकरणम् । यस्य प्रतिपाद्यविषयः अध्ययनविधिरिति सूचीतमस्ति ।[१३] वेदाध्ययनं विना धर्मज्ञानस्येच्छा असम्भवीति विचारः स्वीक्रियते । अतः प्रथमाधिकरणस्याध्ययनविधिरेव विषयः । उक्तमस्ति श्लोकवार्तिके-

**भवेद् धर्मस्य जिज्ञासा ननान्तर्यविधिस्तदा ।**

**आन्तर्यविधाने तु या वेदाध्ययने कृते ।**[१४]

अर्थात् जिज्ञासासूत्रे अनन्तरता "अतः" इति शब्देनोल्लिखितास्ति । तदर्थं वेदाध्ययनस्यानन्तरं धर्मजिज्ञासायाः क्रमः आयाति ।

**२)संशयः (विशयः) (DOUBT) - विषयस्योल्लेखानन्तरं द्वयोः ततोऽधिकपक्षाणां वा सम्भावनायाः उपरि या चर्चा क्रियते, सा चर्चा संशयः इत्युच्यते** । अत्र पक्षद्वयं कदाचित् भावरूपेण (एष पुरुषः स्थाणुः वा), कदाचित् भाव - अभावरूपेण (एष पुरुषः न वा) वा प्रतिपाद्यते।

उदाहरणम् - मीमांसादर्शनस्य जिज्ञासाधिकरणाधारेण (प्रथममधिकरणम्) वेदाध्ययनोत्तरं धर्माधर्मज्ञानफलकविचारविषयको न वेति संशयः।[१५]

अर्थात् वेदाध्ययनानन्तरं यस्य विचारस्य प्रयोजनं धर्माधर्मं सूचयति, शास्त्रं तस्य विधायकमस्ति न वेति संशयः। अत्र शास्त्रं, तस्य प्रयोजनम् - इत्यनयोः सम्बन्धमाधारीकृत्य संशयः उत्पद्यते । संशयं विनाऽपि शास्त्रे प्रवृत्तिः न स्यात् । उपादेयतायाः बोध आवश्यक इति मत्वा कुमारिलभट्टेनोक्तम्-

**यावत् प्रयोजनस्य सम्बन्धे नाभिधीयते।**

**असम्बन्धप्रलापित्वाद् भवेद् तावदसङ्गतिः।**[१६]

अर्थात् प्रयोजनेन साकं शास्त्रस्य सम्बन्धः क इति विषये यावत् पर्यन्तं न सूच्यते, तावत् शास्त्रकारस्यासम्बन्धप्रलापः विचिन्त्यते । शास्त्रस्य संगतिरपि न जायते ।

**३)पूर्वपक्षः - (OPPOSITION) - वादिनां प्रतिपादितः विचारः पूर्वपक्षः ।** संशयस्य द्वितीयसोपानं पूर्वपक्षः, यः सिद्धान्तस्य प्रतिपक्षरूपेण कार्यं सम्पादयति । अध्ययनविधेरुपरि विचारः किमर्थम्? का आवश्यकता? इत्यादयः प्रश्नाः पूर्वपक्षस्य प्रेरकाः । एष पूर्वपक्षः उत्तरपक्षस्य प्रतीक्षां करोति ।

उदाहरणम् - मीमांसादर्शनस्य प्रथमाधिकरणाधरेण(जिज्ञासाधिकरणाधारेण) "अध्ययनस्य गुरुमुखोच्चारणपूर्वकोच्चारणरूपत्वात् तस्य विश्वजिद्वत् स्वर्गार्थत्वादधीत्य स्नायादिति स्नानविधिना न कर्तव्यमिति पूर्वपक्षः।"[१७]

अर्थात् वेदाध्ययनस्यानन्तरं स्नानविधिः सामान्यतः स्मृतिविषय एव । यथा अपवर्गफलकयज्ञानन्तरं स्नानं भवति । अस्यां स्थितौ गुरुमुखात् क्रियमाणस्योच्चारणस्य पुनरुच्चारणम् अध्ययनं, ततः स्वर्गप्राप्तिः फलमवश्यमेव । यद्यपि वेदे अध्ययनस्य फलं स्वर्गप्राप्तिरिति नोच्चारितं, केवलं एतदेवोच्चारितं- "**विश्वजिता यजेत**:"। तथापि अर्थापत्या फलस्य कल्पना जायते । यदाध्ययनमात्रेण शुकवदुच्चारणमात्रेण वा स्वर्गप्राप्तिः, तदा अस्योपरि विचारः (मीमांसाशास्त्रम्) व्यर्थ एव ।

**४)उत्तरपक्षः(सिद्धान्तः)-(REPLY) - निर्णयस्वीकरणमेव सिद्धान्तः।**

उदाहरणम्- "अध्ययनविधेरर्थः ज्ञानपर्यन्ततया तस्य विचारमन्तरेणासम्भवात् कर्तव्यः। स्मृतिस्तु अध्ययनकरणकभावनोत्तरकालं स्नानमिति व्याख्येया, श्रुत्यनुरोधाविति सिद्धान्ताः।"[१८]

एतस्यायमर्थः - अध्ययनविधिः अर्थज्ञानपर्यन्तं गच्छति। विचारं विना अर्थज्ञानमसम्भवमिति कारणादध्ययनविषयकविचार आवश्यकः । स्मृतौ लिखितमस्ति यदध्ययनानन्तरं स्नानं

करणीयम् । तस्य व्याख्या श्रुत्यनुसारेण करणीया। अर्थात् अध्ययनस्य भावनाया: अनन्तरं स्नानमपेक्षितम् । सिद्धान्त: एतदेव यत् गुरुमुखादुच्चारणं श्रुत्वा पुनरुच्चार्य यत् स्नानं, तत् यज्ञस्य स्नानं न, यावत् पर्यन्तं विधिवदर्थज्ञानं नाभवत् । अर्थज्ञानेनैव पूर्णतां प्राप्नोति, तत: यज्ञस्वरूपमाप्नोति ।

**५)संगति:/प्रयोजनम् (RECONCILIATION) - कोऽपि विचार: कस्मिन् शास्त्रे, कस्मिन्नध्याये, कस्मिन् पादे वा वर्तते, तस्य ज्ञानमेव संगति: ।** सा च संगति: त्रिधा।

क) शास्त्रसंगति: ख) अध्यायसंगति: ग) पादसंगतिश्च

कुमारिलभट्टानुसारेणोत्तरस्यानन्तरं निर्णयस्य स्थानम् । अर्थात् पञ्चममङ्गं निर्णय इति पूर्वे स्पष्टितम् । संगतिस्थाने पाठान्तरे प्रयोजनमपि वर्तते । विषयस्य प्रतिपादनं मीमांसाशास्त्रस्य प्रयोजनम् । "अथातो धर्मजिज्ञासा"[१९] सूत्रोपरि कुमारिलभट्टेनोक्तम् –

**अथातो धर्मजिज्ञासा सूत्रमाद्यमिदं कृतम् ।**
**धर्माख्यं विषयं वक्तुं मीमांसाया: प्रयोजनम् ।।**[२०]

अर्थात् सूत्रकारेण प्रथमसूत्रमाध्यमेन धर्मविषयस्य प्रतिपादनमेव प्रयोजनमिति संसूचितम्। पुनश्च भाष्यचिन्तामणिग्रन्थे लिखितं यत् - "अधीतवेदस्य प्रयोजनत्त्वं चेत्थमवसेयम् - विधीनां प्रवृत्तिजनकप्रवर्तनाज्ञानम्, अर्थवादानां प्राशस्त्यज्ञानं, मन्त्राणां विशिष्टार्थस्मरणम्........ च यथेष्टमूहनीयम् ।"[२१]

अर्थात् वेदाध्यायिपुरुषाणां कृते प्रयोजनस्यानुसन्धानमित्थं करणीयम् ।

१. सर्वेषां विधिवाक्यानां प्रवृत्तिपूर्वकं प्रवर्तनाज्ञानम् ।

२. अर्थवादसम्बन्धीवाक्यप्रसंशाया: प्राशस्त्यज्ञानम् ।

३. मन्त्राणां विशिष्टार्थज्ञानम् ।..........

इत्थं यथा योग्यं प्रयोजनानामनुसन्धानं करणीयम् ।

**वेदान्तदृष्ट्या अधिकरणम् -**

पूर्वमीमांसादर्शनाधारेण जिज्ञासाधिकरणस्य विवरणं प्रतिपादितम्। सम्प्रति वेदान्तदर्शनस्य शाङ्करभाष्याधारेण जिज्ञासाधिकरणस्य पञ्चाङ्गानां विवरणमधो प्रस्तूयते।

**१) विषयः** - "धर्मजिज्ञासायाः प्रागपि अधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः। शेषशेषित्वेधिकृताधिकारे वा प्रमाणाभावात् - भव्यश्च धर्मो जिज्ञास्यो न ज्ञानकालेऽस्ति पुरुषव्यापारतन्त्रत्वात् । इह तु भूतं ब्रह्म जिज्ञास्यं नित्यत्वान्न पुरुषव्यापारतन्त्रम् ।"[२२]

अर्थात् जिज्ञासायाः प्रागपि वेदान्तज्ञातृणां ब्रह्मजिज्ञासा भवितुमर्हति । धर्माधिकृतपुरुषस्य वेदान्ते अधिकारो भवतु, अथवा कर्मकाण्डीयवेदे उपनिषदि वा शेषशेषिभावः भवतु - इति नास्ति किमपि प्रमाणम् । कारणं पूर्वमीमांसादर्शने धर्मजिज्ञासा भवति । यः कर्मणः उत्पाद्यः । एवञ्च यस्य ज्ञानकाले स्थितिः न भवति । एतस्य विपरीतरूपेण वेदान्ते ब्रह्मजिज्ञासायाः विषयोऽस्ति, यः सदा सिद्धः, न तु उत्पाद्यधर्मः । धर्म उत्पाद्यकारणात् पुरुषतन्त्रं कर्माधीनं च । परन्तु ब्रह्मशेषत्वाद् वस्तुतन्त्रं भवति । सिद्धवस्तुनः ज्ञानमायाति । साध्य वस्तुनः उत्पन्नं क्रियते, न तु सिद्धवस्तुनः । अतः ब्रह्मसिद्धविषयः।

**२) संशयः** - पूर्वचर्चानुसारेण संशयः स्पष्टोऽस्ति यत् – धर्मानुसारेण ब्रह्मयज्ञादीनामनुष्ठानं कृत्वा ब्रह्मजिज्ञासायां प्रवृत्तो भवेत्, उतः तं विनापि एतस्योपपत्तिः ।

**३) पूर्वपक्षः** - यज्ञादीनां कर्तृणां, स्वर्गादिफलभोक्तृणां, जीवात्मनश्च ज्ञानमुपनिषदः जायते । तद् ज्ञात्वा धर्मे प्रवृत्तिरिति प्रयोजनमुक्तम् । इत्थमुनिषद् वेदान्तं च स्वतन्तशास्त्रमभूत्वा ब्राह्मणीयविधीनां पूरकमात्रमस्ति । ते विधय शेषरूपी भवन्ति । येषां शेषी विधिपरकधार्मिकव्यवस्थायुक्तवेदभागः। ब्रह्म जीवात्मास्ति, यः स्वर्गभोगं प्रति प्रवर्तयति।

**४) उत्तरपक्षः** - वेदान्तिनां सिद्धान्त इत्थं वर्तते यत् - उपनिषद् स्वतन्त्रशास्त्रम् । एवञ्च तत्रत्य ब्रह्मजिज्ञासायाः उपदेशः स्वतन्त्रविषयः । ब्रह्मजिज्ञासायाः प्रसूतज्ञानं वस्तुतन्त्रं, यदविद्यायाः विनाशे स्वतः स्फुरितो भवति ।

**५) प्रयोजनम्** - "तस्मात् ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयप्रयोजना प्रस्तूयते।"[२३]

अर्थात् ब्रह्मसूत्रस्य जिज्ञासाधिकरणे ब्रह्मजिज्ञासाया: उपस्थापनस्य प्रयोजनं निश्रेयसो भवति । यदर्थं वेदान्तवाक्यानामागमाविरोधितर्केभ्य: मीमांसा अपेक्षतिम् ।

**पादटीका:-**

१ - पाणिनिसूत्रम् - ३/ ३/ १ १ ७

२ - पाणिनिसूत्रम् - १/ ४/ ४ ५

३ - पाणिनिसूत्रम् - २/ ३/ ३ ७

४ - वाक्यपदीयम्- ३/ ७/ १ ४ ८

५ - शब्दशक्तिप्रकाशिका-७ २

६ - कृष्णकान्तिटीका

७ - मीमांसाभाष्यम्- ३/ १/ १ ३

८ - जैमिनिसूत्रम् - १/ १/ १

९ - सर्वदर्शनसंग्रहः, पृ.-४ ४ ६

१ ० - भाष्यचिन्तामणिः, पृ. -४

१ १ - श्लोकवर्त्तिकम् - १ ७

१ २ - सर्वदर्शनसंग्रहः, पृ.-४ ४ ६

१ ३ - भाष्यचिन्तामणिः, पृ. -४

१ ४ - श्लोकवर्त्तिकम् - ८ १

१ ५ - भाष्यचिन्तामणिः, पृ. -४

१ ६ - श्लोकवर्त्तिकम् - २ ०

१ ७ - भाष्यचिन्तामणिः, पृ. -४/ ५

१ ८ - भाष्यचिन्तामणिः, पृ. -५

१ ९ - जैमिनिसूत्रम् - १/ १/ १

२ ० - श्लोकवर्त्तिकम्- १ १

२ १ - भाष्यचिन्तामणिः, पृ.-४

२ २ - ब्रह्मसूत्रशाङ्करभाष्यम्- १/ १/ १

२ ३- ब्रह्मसूत्रशाङ्करभाष्यम्- १/ १/ १

**सन्दर्भग्रन्थाः -**

१) श्रीधरानन्दशास्त्री, लधुसिद्धान्तकौमुदी- मोतीलाल बनारसीदास, दिल्ली ।

२) गिराधरशर्मा, परमेश्वरानन्दशर्मा च - वैयाकरणसिद्धान्तकौमुदी, मोतीलाल बनारसीदास, दिल्ली ।

३) प्रो. सन्निधानं सुदर्शनशर्मा- अधिकरणकौमुदी, एस्.वि.वैदिकविश्वविद्यालयः, तिरुपतिः ।

४) डा. श्यामसुन्दरशर्मा- मीमांसाश्लोकवार्त्तिकम्, भारतीयविद्यासंस्थानं, वाराणसी ।

५) रामनाथझा- श्लोकवार्त्तिकम्, विद्यानिधिप्रकाशनं, दिल्ली ।

६) सर्वदर्शनसंग्रहः- चौखम्बासुरभारतीप्रकाशनम्, वाराणसी ।

**शिक्षाशास्त्रविभागः, रा.सं.सं., गुरुवायूर् परिसरः, केरलम् – ६८० ५५१**

## भाषाधिगमे संरचनोपागमः

**डा इक्कुर्ति वेंङ्कटेश्वर्लु**
सहायकाचार्यः (अतिथिः)

**का नाम भाषा ?**

भाषा शब्द: भाष् व्यक्तायां वाचि इत्यस्माध्दातो: गुरोश्च हल: इति सूत्रेण अ प्रत्यये स्त्रियां टापि इत्यस्मात् निष्पद्यते। भाषाशब्द: आङ्ग्लभाषायां Language इति व्यवह्रियते । य: लाटिन् भाषाया: Lingua इति पदात् निष्पन्न:। भाषा भावविनिमयाय समुचितं साधनं भवति। ये च मनसि विचारा: जायन्ते ते ध्वन्यात्मना परिणता: भाषाशब्दवाच्या: भवन्ति - **प्लेटो** । ध्वनिभि: मानवीयविचाराणां बौध्दिकाभिव्यक्तिरेव भाषा इत्यपि वक्तुं शक्यते - **स्वीट्** एवं प्रकारेण पाश्चात्त्यानां मतमासीत्। भावाभिव्यक्ते: मुख्यं साधनं भाषेति सर्वैरङीक्रियते। मानवसभ्यता-संस्कृत्योश्च विकासे भाषाया: विशिष्टमेव स्थानं भजते। अत: भाषा मानवजाते: सारं सर्वस्वं चास्ति।

**संस्कुतभाषाया: स्वरूपम् -** मानवानां भाषायाश्च मिथ: सम्बन्ध: वर्तते। भाषया विना समाजम् ऊहितुमपि न शक्यते। भाषाया: अभावेन भावाभिव्यक्तीकरणं दुस्साध्यं भवति। भाषया विना जीवनं दुर्भर: भवति। व्यक्ते: समाजस्य च विकासाय भाषैव मूलसाधनं भवति। प्रत्येकं भाषा अन्यभाषया सह निर्माणे स्वरूपे च भिद्यते एव। तत्र संस्कृतम् अत्यन्तप्राचीना निर्दुष्टा, संस्कृता च भाषा वर्तते। संस्कृतभाषायां पाणिनिमते ६३वर्णा: सन्ति। स्वराणां ह्रस्वदीर्घप्लुतोदात्तानुदात्तस्वरितसानुनासिकनिरनुनासिकेति नैकभेदा: विद्यन्ते। अत्र त्रीणि वचनानि लिङ्गत्रयं, त्रय: पुरुषा: च सन्ति। संस्कृतस्य सर्वाणि पदानि चतुर्धा विभक्तानि। ते यथा चत्वार: पदजाता: नामाख्यातोपसर्गनिपाताश्चेति। अर्थात् नामानि - प्रातिपदिकानि , आख्यातम् - क्रियापदानि , उपसर्गा: - प्र, परा, अनु इत्यादय:, निपाता: - च, वा, एव, प्रभृतय:, अव्ययानि इत्येवं चतुर्धा विभक्ता:। एवमेव दशकाला: (वर्तमान-भूत-भविष्यत् इत्यदया:) वर्तन्ते। संस्कृतभाषा संश्लिष्टा वर्तते। अस्यां प्रकृतिप्रत्ययौ सम्मिलितौ भवत: नित्यं पदं प्रयोक्तव्यं, पदं सुबन्तं तिङन्तञ्च भवति। प्रातिपदिकस्य, प्रत्ययस्य वा वैयक्तिकरूपेण प्रयोगादिकं नैव सम्भवति। अनेन विना संस्कृतभाषायां वर्णरचाना, पदरचना, वाक्यरचना च अत्यन्तं सरलमेव परन्तु कैश्चित् कारणै: इयं संस्कृतभाषा व्यावाहारिकभाषात्वेन समाजे न श्रूयते। परन्तु इयम् अमरभाषा, वैज्ञानिकीभाषा, सर्वासां भाषाणां मातृतुल्या भाषा च वर्तते। भाषाया: मूलरूपं

निश्चप्रचं व्यावहारिकमेव भावति। अतैव **भाषणात् भाषेत्याहु:** अन्यथा सा भाषैव न भवति । संस्कृतभाषापि पुन: जानभाषा भवेत्, तदर्थं प्राथमिकस्तरसंस्कृतशिक्षणे समुचित शिक्षणविधय:, उपागमा:, प्रविधय: च प्रयोक्तव्या: तत्रापि प्राथमिकस्तरे भाषणकौशलस्य विकास: अवश्यं कर्तव्यम् । अन्यस्तरेषु तावद् मानवानां पटुत्वं न भवति। अत: संरचनोपागम: भाषणाधिगमे अत्यन्तं प्रभावं जनयतीत्यत्र नास्ति संशय: लेशोऽपि। अत: संरचनोपागम: संस्कृतशिक्षणे प्रयोक्तव्य: एव। तस्मात् प्राक् उपागमो नाम किम् इति ज्ञातव्यम्।

**को नाम उपागम: -** An approach is a set of correlative assumptions dealing with the nature of language and the nature of language learning and teaching. (Edward Anthony (1965)

उपागमो नाम भाषाया: प्रकृते: तथा भाषाधिगमशिक्षणप्रकृते: च अन्तस्सम्बन्धस्य अवधारणा भवति। (Edward Anthony (1965) अर्थात् उपागमो नाम सहसम्बन्धधारणानां गुच्छो भवति। उपागम: भाषाध्यापनाधिगमस्वभावेन संसगिर्त: भवति। उपागम: स्वयं सिध्दसिध्दान्त: अयम् अध्याप्यमानविषयानां प्रकृतिं वर्णयति। उपागमो नाम भाषास्वभावस्य भाषाधिगमस्य च सिध्दान्तानामनुशीलनं भवति यत् भाषाध्यापने सिध्दान्तानां प्रायोगिकविषयाणां च मूलस्त्रोतरूपेण व्यवहरति।

**संरचनोपागम: -** The Structural Approach is a Scientific study of the fundamental structures of thelanguage their analysis and logical arrangement' (Brewingten)

भाषाया: आधारभूतानां संरचनानां वैज्ञानिकमध्ययनं, एवं तेषां संरचनानां विश्लेषणानात्मक- तार्किकव्यस्थापनं नाम संरचनात्मकोपागम: भवति। (ब्रेविङ्टन्)।

आधुनिकवैज्ञानिकयुगे भाषशिक्षणे वर्णानां शब्दानाञ्च स्थाने शिक्षाशास्त्रिभि: वाक्यानां कृते अधिकं महत्त्वं प्रदीयते। अयमुपाग: संग्रन्थनोपागम:, संरचनोपाग:, वाक्यघटनोपागम: वा इति नामाभ्यामपि ज्ञायते। आङ्ग्लभाषायाम् अस्य कृते Structural approach शब्दोऽयं प्रयुज्यते। १९५०-६० वर्षेषु आङ्गलभाषापाठनाय उपागमोऽयं आरब्ध:। अधुना भारते आङ्गलशिक्षणाय संरचनोपागम: उपयुज्यते। भाषाशिक्षणाय सर्वाधिकोपयुक्तविधि: प्रत्यक्षविधि: इति भाषाविद्भि: स्वीक्रियते । विद्यालयेषु आङ्ग्लभाषाया: अध्ययनमध्यापनम् अनेन विधिना

साफल्येन क्रियते। संस्कृतशिक्षणाय अपि अयं विधि उपयोगी अस्ति, किन्तु अस्य प्रयोग: सर्वेषां स्तराणां कृते सम्भवो नास्ति। यतो हि संस्कृतम् अधिकजनेषु व्यहारे नास्ति । परन्तु इयं भाषा पुन: जनभाषा भवेत्। तदर्थम् उपागमोऽयम् सम्भाषणाधिगमे अत्यन्तं प्रभावं जनयतीति। अत: सर्वेषां स्तराणां कृते संस्कृतशिक्षणं रुचिकरं सुग्राह्यं च विदधातुं क्रमबध्दरूपेण व्याकरणनियमानां ज्ञानप्रदानाय संरचनोपागम: सर्वाधिक: उपयक्तो भवति।

**संरचनोपागमशिक्षणे अवधेया: अंशा:** - संरचनोपागमशिक्षणे कतिचन अवधेया: अंशा: वर्तन्ते। तेन संस्कृतशिक्षणे भाषणाधिगमे रुचिम् उत्पादयितुं शक्नुम: ते यथा - १.संन्दर्भात्मकोपस्थाप:, २.पदानां क्रम:, ३.वाक्येषु अर्थयुक्तपदानां क्रम:, ४.प्रभावात्मकानि उदाहरणानि, ५.वाक्याभ्याससमये पुनर्बलनदानम्, ६.विभिन्नस्तरानुगुणं वाक्यरचना च स्यात्।

**संरचनाया: स्वरूपम्** - संरचनोपागमाधारितशिणे संरच्यमानानि वाक्यानि दैनिकजीवन-सम्बध्दानि, सम्पूर्णभावात्मकानि च भवेयु:। वाक्यनिर्माणे पदानि अत्यन्तं प्रधानानि भवन्ति। अत: यदा पदानि क्रमं स्थाप्यन्ते वाक्येषु तदा संस्कृतव्याकरणनियमानुगुणं वाक्यसंरचना: भवेयु:। पूर्वोपयुक्तानि पदानि विभिन्नवाक्यार्थेषु विभिन्नवाक्यसंरचनासु पुन: पुन: प्रयोक्तव्यानि भवन्ति। कुतो चेत् छात्रावबोधाय एवं पाठितांशानां दृढीकरणाय च।

**संस्कृते संरचनाप्रक्रिया** – कस्मिन्नपि वाक्यखण्डे पदानां क्रम: संरचनोच्यते। अस्मिन् त्रीणि तत्त्वानि संम्मिलितानि भवन्ति। १.पदानां क्रम: (प्राथमिकस्तरे संश्लेषनात्मकरहितं भवेत्)। २.उपसर्गनिपातादीनाम् अव्ययानां प्रयोग:। ३.विभक्तीनां रूपाणि। ४.क्रियापदानाम् असमापकक्रि- यानां च प्रयोग:। ५. सामान्यव्याकरणस्य प्रयोग:। ६. वचनत्रयस्य, लिङ्गत्रयस्य च प्रयोग:। एवं रूपेण संस्कृतस्य सामान्यनियमै: सह अधोदत्तोपनियमै: संरचना स्यात्। **ते यथा** - १.पूर्वसंरचनाया: पुन:स्मरणम्। २.नूतनसंरचनाया: उपस्थापनम्। ३.सन्दार्भानुगुणं नूतनसंरचनाया: शिक्षणम्। ४.वैयक्तिकं सामूहिकञ्चाभ्यास:। ५.संरचनानां पठनाभ्यास:। ६.नूतनशब्दावल्या संरचनाया: पाठनम्। ७.कक्षायां लेखनाभ्यास:। ८.गृहकार्यम्।

**संरचनानां प्रकारा:** - संस्कृते विभिन्नपदै: निर्मितानि वाक्यानि संरचनाप्रकारा: इत्युच्यन्ते। **यथा सामान्यसंरचना:-** कर्ता + क्रिया **यथा-** राम: गच्छति। श्याम: पठति। अहं गच्छामि। भवान् गच्छसि। इत्यादया: भवन्ति।

**कर्मसहितसामान्यसंरचना: -** कर्ता + कर्म +क्रिया **यथा –** रञ्जित: पुस्तकं पठति। अहं जलं पिबामि। भवती मन्दिरं गच्छसि।

**वचनान्तरसंरचना: -** स: क्रीडां क्रीडति **त:** ते क्रीडां क्रीडन्ति **।** इत्यादि।

**कर्तरि त:कर्मणि परिवर्तनम् –** अहं ग्ग्रमं गच्छामि **त:** मया ग्ग्रम: गम्यते। इत्यादि।

**अव्ययानां संरचना:-** यदा मेघ: गर्जति तदा वृष्टि भविष्यति , यथा श्रीराम: तथा लवकुशौ भवत:। **लिङ्गपरिवर्तनसंरचना: -** बालक: पठति – बालिका पठति - मित्रं पठति। इत्यादि।

**प्रत्ययपरिवर्तनसंरचना -** हर्ष: पठित्वा आगच्छति **त:** हर्ष: पठितुम् आगच्छति। इत्यादि। एवं प्रकारेण द्वितीयभाषात्वेन तृतीयभाषात्वेन यत्र संस्कृतं पाठ्यते पठ्यते तत्र एतादृश संरचनाभि: अभ्यासं कर्तुं कारयितुं च शक्यते।

**संरचनोपागमशिक्षणम् -** सामान्यत: शिक्षणं सिध्दान्ताधारिकृतोपागमेषु विद्यमानै: विधिप्रविधिभि: दीयते। तथेव संरचनोपागमेऽपि कैश्चित् विधभि: संरचनाभ्यासं कर्तुं शक्यते। **यथा प्रश्नोत्तरविधि:-** प्रश्नोत्तरविधिना संरचनानां पाठनं भाषणाधिगमे छात्रम् अत्यन्तं प्रभावयति। छात्रेषु जिज्ञासाञ्च उत्पादयति। **उदा-** (अध्यापक: चित्रं दशन्) १.अयं क:?। अयं बाल:।२ एषा का?। एषा बालिका। इत्येवं रूपेण प्रश्नोत्तरविधिना संरचनाभ्यासं कारयेत्।

**सम्भाषणविधि: -** द्वयो: छात्रयो: मध्ये सन्निवेशं कल्पयित्वा सरलवाक्यै: यथा संरचनाप्रकारा: वर्तन्ते तथा व्यूहात्मकं सम्भाषणं कारयेत्।

**दृष्टान्तविधि: -** विधिरयं सर्वविषयपाठने पठने च प्रसिद्ध: वर्तते। भाषाशिक्षणे संरचनोपागमे अस्य विधे: प्रभाव: महान् वर्तते। सामाजिकदृष्टान्तै: संरचनाक्रियन्ते चेत् तर्हि भाषणे शीघ्राधिगम: जायते। इत्येवं प्रकारेण नाटकीकरनविध:,चर्चाविधि:, कथाकथनविधि:, क्रीडाविधि: संवादविधि: इत्यादय: विधय: संरचनोपागमे उपयोक्तुं शक्यन्ते। उपागमप्रयोगे तावत् वाक्यसंरचनाया: प्रकिया नैव विस्मर्त्तव्या , उपकरणानां प्रयोगोऽपि कर्तुं शक्यते।

**उपयोगिता परिधिश्च -** जनव्यवहारे अविध्यमानभाषा: यत्र यत्र द्वितीयभाषात्वेन तृतीयभाषात्वेन शिक्षणं विधीयते तत्र तत्र भाषणकौशलविकासाय उपागमोऽयम् अत्यन्तम् उपयोगाय भवतीत्यत्र नास्ति लेशमात्रोऽपि सन्देह:। एवं अनेनोपागमेन शिक्षणं रुचिपूर्णं कर्तुं शक्यते। नियन्त्रणात्मकाभ्यासेन सहजतयैव वाक्यसंरचनां कर्तुं शक्यते। अस्मिन् संरचनोपागमे दैनिकाभ्यासात्मकवाक्येषु प्राधान्यं दीयते। अर्थयुक्तसंरचनासु भाषा अभिव्यक्ती क्रियते। अस्मिन् उपागमे छात्राध्यापकर्योमध्ये प्रणाल्यात्मकं भाषाध्ययनाध्यापनं प्रचलति। यत्र येषु छात्रेषु भाषाया: भाषणकौशलविकास: कर्तव्य: तत्र अस्योपागमस्य प्रयोग: कर्तव्य: भवति। नोचेत् भाषाया: मूलरूपस्य भाषणस्य लोपं पूरयितुं नैव शक्यते। परन्तु उपागमेनानेन केवलं भाषणकौशलविकास एव साध्यते पठनलेखनकौशलयो: विकास: न जायते। अत: अत्र अध्यापक:लेखनपठनकौशलयो: विकासाय गृहकार्यं दद्यात्। प्राथमिकस्तरे अयमोपागम: अत्यन्तमुपयोगकर: वर्तते। गद्यशिक्षणे एव अस्य उपागमस्य प्रयोग: युज्यते। अत्र पाठ्यक्रम: पर्याप्त: भवेत्, अन्यथा पाठ्यक्रम: न समाप्यते।

**उपसंहार :-** संस्कृतं भारतीयानाम् अध्यात्मिकराष्ट्रियभाषा चास्ति। परन्तु भाषेयं कैश्चित् कारणै: जनेभ्य: दूरे अस्ति। इयं भाषा पुन: जनसामान्येषु अनेतवया तदर्थं विद्यालयस्तरशिक्षणे समुचित शिक्षणविधय: शिक्षनोपागमा: शिक्षणप्रविधय: प्रयोक्तव्या:। तत्र उपागमेषु अन्यतम: भवति संरचननोपागम:। अनेनोपागमेन छात्रेषु भाषणकौशलं वेगेन वर्धयितुं शक्यते। अत: संस्कृतभाषाशिक्षणे भाषणकौशलविकासाय संरचनोपागम: अध्यापकै: प्रयोक्तव्य: तेन पन: संस्कृतं जनभाषा भवतीति मे अभिप्राय:।

**सन्दर्भग्रन्थसूची -**

१. संस्कृतशिक्षणम् – सन्तोषमित्तल: - नवचेतना पब्लिकेशन्स – जयपुरम् ।

२. Teaching Methods Of English - वल्लभि – नील्कमल् पब्लिकेशन्स - हैदराबाद्।

३. तेलुगु बोधन पध्दतुलु – तेलुगु अकाडमि – हैदराबाद् ।

४.संस्कृतशिक्षणम–नवीनप्रविधयश्च-डा.च.ल.ना.शर्मा.अदित्यप्रकाशनम्-जयपुरम्।

५. अन्तर्जालम्।

**शिक्षाशास्त्रविभाग:, रा.सं.सं., गुरुवायूर् परिसर:, केरलम् – ६८० ५५१**

# EVALUATION AND VARIOUS ASPECTS

**Lalit Mohan Pantola**
Assistant Professor (Guest)

Evaluation is a systematic determination of a subject's merit, worth and significance, using criteria governed by a set of standards. It can assist an organization, program, project or any other intervention or initiative to assess any aim, realisable concept/proposal, or any alternative, to help in decision making; or to ascertain the degree of achievement or value in regard to the aim and objectives and results of any such action that has been completed. The primary purpose of evaluation, in addition to gaining insight into prior or existing initiative, is to enable reflection and assist in the identification of future change.

Evaluation is often used to characterize and appraise subjects of interest in a wide range of human enterprises, including the arts, criminal justice, foundations, nonprofit organizations, government, health care, and other human services. It is long term and done at the end of a period of time.

**Definition -** Evaluation is the structured interpretation and giving of meaning to predicted or actual impacts of proposals or results. It looks at original objectives, and at what is either predicted or what was accomplished and how it was accomplished. So evaluation can be formative, that is taking place during the development of a concept or proposal, project or organization, with the intention of improving the value or effectiveness of the proposal, project, or organisation. It can also be assumptive, drawing lessons from a completed action or project or an organisation at a later point in time or circumstance.
Evaluation is inherently a theoretically informed approach (whether explicitly or not), and consequently any particular definition of evaluation would have be tailored to its context – the theory, needs, purpose, and methodology of the evaluation process itself. Having said this, evaluation has been defined as:

- A systematic, rigorous, and meticulous application of scientific methods to assess the design, implementation, improvement, or outcomes of a program. It is a resource intensive process, frequently requiring resources, such as, evaluate expertise, labor, time, and a sizable budget.
- The critical assessment, in as objective a manner as possible, of the degree to which a service or its component parts fulfills stated goals. (St Leger and Words worth Bell).The focus of this definition is on attaining objective knowledge, and scientifically or quantitatively measuring predetermined and external concepts.
- A study designed to assist some audience to assess an object's merit and worth (Shuffleboard). In this definition the focus is on facts as well as value laden judgments of the programs outcomes and worth.

**Purpose -** The main purpose of a program evaluation can be to "determine the quality of a program by formulating a judgment" Marthe Hurteau, Sylvain Houle, Stéphanie Mongiat

(2009).An alternative view is that "projects, evaluators, and other stakeholders (including funders) will all have potentially different ideas about how best to evaluate a project since each may have a different definition of 'merit'. The core of the problem is thus about defining what is of value." From this perspective, evaluation "is a contested term", as "evaluators" use the term evaluation to describe an assessment, or investigation of a program whilst others simply understand evaluation as being synonymous with applied research. There are two function considering to the evaluation purpose Formative Evaluations provide the information on the improving a product or a process Summative Evaluations provide information of shortterm effectiveness or longterm impact to deciding the adoption of a product or process. Not all evaluations serve the same purpose some evaluations serve a monitoring function rather than focusing solely on measurable program outcomes or evaluation findings and a full list of types of evaluations would be difficult to compile. This is because evaluation is not part of a unified theoretical framework,drawing on a number of disciplines, which include management and organisational theory, policy analysis, education, sociology, social anthropology, and social change.

**Discussion -** However, the strict adherence to a set of methodological assumptions may make the field of evaluation more acceptable to a mainstream audience but this adherence will work towards preventing evaluators from developing new strategies for dealing with the myriad problems that programs face.

**Standards -** Depending on the topic of interest, there are professional groups that review the quality and rigor of evaluation processes. Evaluating programs and projects, regarding their value and impact within the context they are implemented, can be ethically challenging. Evaluators may encounter complex, culturally specific systems resistant to external evaluation. Furthermore, the project organization or other stakeholders may be invested in a particular evaluation outcome. Finally, evaluators themselves may encounter "conflict of interest (COI)" issues, or experience interference or pressure to present findings that support a particular assessment. General professional codes of conduct, as determined by the employing organization, usually cover three broad aspects of behavioral standards, and include intercollegial relations (such as respect for diversity and privacy), operational issues (due competence, documentation accuracy and appropriate use of resources), and conflicts of interest (nepotism, accepting gifts and other kinds of favoritism). However, specific guidelines particular to the evaluator's role that can be utilized in the management of unique ethical challenges are required. The Joint Committee on Standards for Educational Evaluation has developed standards for program, personnel, and student evaluation. The Joint Committee standards are broken into four sections: Utility, Feasibility, Propriety, and Accuracy. Various European institutions have also prepared their own standards, more or less related to those produced by the Joint Committee. They provide guidelines about basing value judgments on systematic inquiry, evaluator competence and integrity, respect for people, and regard for the general and public welfare.

**Perspectives of Evaluation -** The word “evaluation” has various connotations for different people, raising issues related to this process that include; what type of evaluation should be conducted; why there should be an evaluation process and how the evaluation is integrated into a program, for the purpose of gaining greater knowledge and awareness? There are also various factors inherent in the evaluation process, for example; to critically examine influences within a program that involve the gathering and analyzing of relative information about a program. Michael Quinn Patton motivated the concept that the evaluation procedure should be directed towards:

| | |
|---|---|
| Activities | Characteristics |
| Outcomes | The making of judgments on a program |
| Improving its effectiveness | Informed programming decisions |

**Approaches -** Evaluation approaches are conceptually distinct ways of thinking about, designing, and conducting evaluation efforts. Many of the evaluation approaches in use today make truly unique contributions to solving important problems, while others refine existing approaches in some way.

**Classification of approaches -** Two classifications of evaluation approaches by House and Stufflebeam and Webster can be combine into a manageable number of approaches in terms of their unique and important underlying principles. House considers all major evaluation approaches to be based on a common ideology entitled liberal democracy. Important principles of this ideology include freedom of choice, the uniqueness of the individual and empirical inquiry grounded in objectivity. He also contends that they are all based on subjectivist ethics, in which ethical conduct is based on the subjective or intuitive experience of an individual or group. One form of subjectivist ethics is utilitarian, in which "the good" is determined by what maximizes a single, explicit interpretation of happiness for society as a whole. Another form of subjectivist ethics is intuitionist/pluralist, in which no single interpretation of "the good" is assumed and such interpretations need not be explicitly stated nor justified.

**Summary of approaches -** The following table is used to summarize each approach in terms of four attributes-organizer, purpose, strengths, and weaknesses. The organizer represents the main considerations or cues practitioners use to organize a study. The purpose represents the desired outcome for a study at a very general level. Strengths and weaknesses represent other attributes that should be considered when deciding whether to use the approach for a particular study. The following narrative highlights differences between approaches grouped together.

**Methods and techniques -** Evaluation is methodologically diverse. Methods may be qualitative or quantitative, and include case studies, survey research, statistical analysis, model building, and many more such as:

| | | | |
|---|---|---|---|
| Accelerated aging | Axiomatic design | Delphi Technique | Wizard of Oz |
| Action research | Benchmarking | Ethnography | statistics |
| Advanced product | Case study | Experiment | interviewing |
| quality planning | Change management | pathways analysis | Triangulation |
| Alternative | Clinical trial | Metaanalysis | Statistical process |
| assessment | Cohort study | Grading | Six Sigma |
| Appreciative Inquiry | decisionmaking | Naturalistic | Outcome mapping |
| Assessment | Analysis | Electronic portfolio | Conversation |

**References -**

1. **Staff** (1995–2012). "2. What Is Evaluation?". International Center for Alcohol Policies Analysis.
Balance. Partnership. International Center for Alcohol Policies. Retrieved 13 May 2012.
2. **Sarah del Tufo** (13 March 2002). "WHAT is evaluation?". Evaluation Trust. The Evaluation Trust. Retrieved 13 May 2012.
3. **Ross, P.H.; Ellipse, M.W.;** Freeman, H.E. (2004). Evaluation: A systematic approach (7th ed.). Thousand Oaks: Sage. ISBN - 9780761908944.

**Dept. of Education, R. S. Sansthan (DU), Guruvayur campus, Puranattukara, Thrissur.**

## मूल्याङ्कने प्रतिपुष्टिः

**रोजालिन् मोहराणा**
शिक्षाशास्त्रिद्वितीयवर्षम्

भूमिका -

मूल्याकलनं नाम मूल्यानामाकलनम् । अत्र मूल्यमिति पदेन कक्षायां शिक्षकछात्रयोर्मध्ये अधिगमाय क्रियमाणा क्रिया यद्भवति तत् मूल्याकलनम् । मूल्याकलनस्य प्रयोगः छात्रणामान्तरिक मूल्याङ्कनस्य कृते भवति । अध्यापकेन पाठितपाठः सफलो वा न वा इति परिक्षणं करोति ।

आकलनमेका संवादात्मिका रचनात्मिका प्रक्रिया वर्तते । यया शिक्षकः ज्ञातुं शक्नोति यत् छात्राः पाठमधिगता वा न वा इति । तथा च कालांशे शिक्षणं कियत् सफलं जातमिति मूल्याकलनं पाठ्यक्रमस्य शिक्षणावधौ एव भवति । प्रतिपुष्टेः आङ्ग्लपदं feedback इत्युच्यते । पुष्टिं प्रति प्रतिपुष्टिः । पुष्टि इत्युक्ते प्रमाणीकरणम् । कार्यान्तरे शिक्षकः श्रेष्ठजनः वा यं निर्देशं ददाति तस्यैव

नाम प्रतिपुष्टिः । सः अध्यापनानन्तरं परीक्षणाय मूल्याकलनं करोति । विषयाधिगमने यदि कापि समस्या भवति तदा सः प्रतिपुष्टिं दत्वा समस्यां निवारयति ।

**मूल्याकलनस्योद्देश्यानि -**

- छात्राध्यापकयोः कृते प्रतिपुष्टिप्रदानार्थम् ।
- छात्राणामधिगमे का समस्या अस्तीति ज्ञानार्थम् ।
- निदानात्मकं भवति ।
- अधिगमकार्यक्रमे परिष्कारं करोति ।

**प्रतिपुष्टिः -** कार्यानन्तरं शिक्षकः श्रेष्टजनः वा यं निर्देशं ददाति तस्यैव नाम प्रतिपुष्टिः । अधिगमे शिक्षकः एकां महत्वपूर्णां भूमिकां निर्वहति । सः अध्यापनानन्तरं परीक्षणाय मूल्याङ्कनं करोति । यदि शिक्षकः छात्राणां कृते प्रतिपुष्टिं ददाति तर्हि छात्राणां पठनक्षेत्रे इतोऽपि इच्छाशक्तेः जागरणं भवति । ते उत्सुकाः भूत्वा सर्वाणि कार्याणि साधयन्ति । विषयावगमने यदि कापि समस्या भवति तदा सः प्रतिपुष्टिं दत्वा समस्यां निराकरोति । प्रतिपुष्टिः कस्यापि भवितुमर्हति । यथा - शिक्षकः, संरक्षकः, समकक्षः, सहकर्मी चान्ये ।

**प्रतिपुष्टिप्रकाराः -**

| | |
|---|---|
| सकारात्मकः । | नकारात्मकः । |
| औपचारात्मकः । | अनौपचारात्मकः । |

**प्रतिपुष्टेः स्तराः -**

- प्राथमिकस्तरः
- माध्यमिकस्तरः
- उच्चस्तरः

**प्रतिपुष्टेः उद्देश्यानि -**

| | |
|---|---|
| छात्रविकासाय । | शङ्कानिवारणाय । |
| उत्साहवर्धनाय । | छात्रान् अग्रेसरणाय । |
| अधिगमे परिष्काराय । | मूल्याकलनस्य निर्माणाय । |

**मूल्याकलने प्रतिपुष्टिः -**

प्रतिपुष्टिं विना मूल्याङ्कनस्य निर्माणं भवितुं न शक्नोति । तथा च मूल्याकलनस्य उद्देश्यमपि प्राप्तुं न शक्नुमः । मूल्याकलनानन्तरं यदा अध्यापकः प्रतिपुष्टिमेव न दास्यति तदा

अधिगमे परिष्कारः न भविष्यति। छात्राणां न्यूनतामपि अपाकर्तुम् असमर्थः भवति। यदि छात्रस्य कस्मिन् विषये समस्या अस्ति तर्हि तस्याः समस्यायाः विषये प्रतिपुष्टिः आवश्यकी। यदि छात्राः विभिन्नेषु विषयेषु काठिन्यमनुभवन्ति तदा तत्रापि अध्यापकः तेषां विषयाणां काठिन्यनिवारणं कृत्वा तान् छात्रान् अधिगमं प्रति नयति अथवा परिष्करोति च। समस्यां निवार्य अध्ययने रुचिं सम्पादयति। उच्चशिक्षायामपि छात्राः सर्जनशीलाः भवन्ति परन्तु तेषां कृते अपि प्रतिपुष्टिरपेक्षते। कक्षा-कक्षे मूल्याकलनं प्रतिपुष्टेः प्रयोगः अत्यन्तमावश्यकः वर्तते।

**निष्कर्षः -** शिक्षण-प्रशिक्षणकार्यक्रमेषु प्रतिपुष्टिः महत्त्वपूर्णभूमिकां निर्वहति। प्रतिपुष्टिः विद्यार्थिनामधिगमे विषयावबोधने च परिष्कारं करोति। एकस्यां कक्षायामध्ययनसमये पाठस्य काठिन्यमपाकरोति। प्रतिपुष्ट्या छात्राणां ज्ञानकौशलस्य व्यवहारस्य च विकासः भविष्यति। अस्याः प्रयोगः अध्यापकेन अध्यापनसमये क्रियते।

**सन्दर्भग्रन्थाः -**


- डा बि.पि. एम्. श्रीनिवासः -शिक्षायाः मनोवैज्ञानिकधाराः।
- डा सिंह आर्. एन्- . आधुनिकसामान्यविज्ञानम्।
- पाठक पी .डी - .शिक्षामनोविज्ञान।


## भारतीयमूल्यस्रोतांसि


**अर्चना पात्र**

शिक्षाशास्त्रिद्वितीयवर्षम्


**वेदः-** विश्वेऽस्मिन् ज्ञानमन्दाकिन्याः प्रथमनिर्झररुपेण वेदा एव अस्मान् प्लावयामास। वेदशब्दोऽयं ज्ञानार्थकात् विद् धातोः घञ् प्रत्यये कृते निष्पद्यते। ज्ञायते आत्मतत्त्वं पुरुषार्थचतुष्टयं येन वा इति व्युत्पत्त्या अमूल्यज्ञानस्रोतृरूपेण निश्चीयते। एवमेव 'विद्' धातुः सत्तात्मकः विचारात्मकः लाभात्मकः च भवति। एतस्य वेदशब्दस्य निष्पादनात् दिव्यसत्तायाः प्रकाशकः दिव्यविचारस्य बोधकः निखिलपुरुषार्थस्य प्रापकः वा मन्त्रराशिः वेद इत्यपि वक्तुं शक्यते। वेदाः चत्वारः वर्त्तन्ते। ऋग्यजुसामथर्वणेति।

वेदोऽखिलधर्ममूलमिति महर्षिमनुना समुद्घोष्यते। धर्मोद्धारणरूपस्य प्रतिष्ठा सम्पादिता। जगति सर्वेषां कृते समानाधिकारः भवेत्। न कश्चन ज्येष्ठः न वा कोऽपि कनिष्ठः। सर्वेऽप्यत्र भ्रातरः इति समानतायाः मूल्यं बोधयन् प्रोच्यते यत् –

**अज्येष्ठासो अकनिष्ठास एते सम्भ्रातसो वावृधुः सौभगाय। सं.सू**

वैदिकसंस्कृतिः लोकेषु विश्वबन्धुत्वभावनां प्रसारयति । समत्वभावनां जागरयति । स्वपरहितविपदं निवारयति, सार्वभौमिकीं सार्वलौकिकीं चोन्नतिं च प्रदर्शयति। सत्यमेवोक्तम् –

**मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे मित्रस्य चक्षुसा समीक्षामही**

सार्वलौकिकीमुन्नतिं कामयन् मोहत्यागः विधेयः। एकत्वभावना जागरणीया च । तदुक्तम् –

**तत्र को मोहः कः शोक एकत्वमनुपश्यतः**

वचनमिदं मानवजीवनमुन्नमयति। उच्यते यत् - इदमहमनृताता सत्यमुपैमि।

**स्मृति श्रुत्योः परिचयः -**

श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ॥

लोके प्रसिद्धसंज्ञासंज्ञिसंबन्धानुवादोऽयं श्रुतिस्मृत्योः प्रतिकूलतर्केण मीमांस्यः । श्रुतिर्वेदः मन्वादिशास्त्रं स्मृतिः। ते उभे प्रतिकूलतर्कैः न विचारयितव्यम्।

श्रुतिस्मृत्युदितो धर्मोऽनुष्ठेयः -

श्रुतिस्मृत्युदितं धर्ममनुतिष्ठह्नि मानवः।
इह कीर्तिमवाप्योति प्रेत्ययानुत्तमं सुखम्॥

श्रुतिस्मृतिरुक्तं धर्मं परिपालयन् मानवः इहलोके धार्मिकत्वेन कीर्तिं लभते, परलोके च मोक्षरूपमुत्कृष्टं धर्मफलं प्राप्नोति। तस्मात् सामाजिकाः श्रुतिस्मृत्योरभिहितं धर्मं परिपालयेयुः।

वेदस्य श्रेष्ठत्वम् -

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शुद्धत्वमाशुगच्छति सान्वयः॥

यः ब्राह्मणः वेदमनधीत्यान्यत्र शास्त्रेष्वतिशयं श्रमं करोति। सः जीवन्नेव पुत्रपौत्रादिसहितः शीघ्रं शुद्धत्वं गच्छति।

सन्तोष एव सुखकारणम् -

सन्तोषं परमास्थाय सुखार्थी संयतो भवेत्।
सन्तोषमूलं हि सुखं दुःखमूलं विपर्ययः॥

प्रचुरधनार्जने संयमं कुर्यात्। स्वहितसाधनाय यावत्धर्ममावश्यकं तावत् पर्याप्तं विचिन्त्य सन्तोषेण भवितव्यम्। यत् सुखं सन्तोषहेतुः भवति।

**श्रीमद्भगवद्गीता -** श्रीमद्भगवद्गीता भारतीयसंस्कृतेः वैदिकदिव्यज्ञानस्य आत्मतत्त्वानुभावस्य प्राच्यविद्यायाः वैज्ञानिकतायाश्च प्रत्यक्षप्रमाणं वर्तते। अतः उक्तम् -

**गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः।**
**या स्वयं पद्मनाभस्य मुखपद्माद्विनिस्सृता॥**

गीतायां जाति-वर्ण-धर्म-सम्प्रदायादिनैरपेक्षेण सर्वेषां कृते उपदेशाः प्रदत्ताः। यत्र 'नियतं कुरु कर्मत्वमिति' उपदिशता भगवता कर्मणः श्रेष्ठत्वं प्रतिपादितम्। भगवद्गीता कर्म-ज्ञान-भक्तिरूपायां त्रिवेण्यां विश्वमानवसमाजाय परमकल्याणस्य मार्गं प्रस्तौति। श्रीमद्भगवद्गीतायां कर्मणः कर्तव्यस्य च प्राधान्यं स्वीकृतम्। कर्मणा साकं कर्तव्यपालनेन मानवस्य साफल्यं सर्वसिद्धिश्च। अतः स्वकर्मपरिपालनं सर्वेषां मानवानां परमकर्तव्यं भवेदिति उपदिशता उच्यते -

**स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।**
**स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु॥**

**निष्कर्षः -** धर्मप्राणोऽयं देशः भारतवर्षः। अस्मिन् पुण्यभूमौ अनादिकालात्वेद-स्मृति-धर्ममाधारीकृत्य अनन्तभावगम्भीरशिक्षा वरीवर्ति। सा च स्मृत्याधारिता शिक्षाजगतः हिताय कल्पते। भगवतः श्रीकृष्णस्य मुखनिःसृत परमपावन-गीताग्रन्थाध्ययनं मानवजीवनं ज्ञानानन्देन प्लावयति। दुःखद्वन्दानि नाशयति। सत्यपथं प्रदर्शयति च। अयं भारतीयमूल्यस्रोतांसि निधिरियं जीवनं स्वस्थं, शाश्वातं, सुन्दरं च विदधति।

**परिशीलितग्रन्थाः -** मूल्यशिक्षा - लक्ष्मीधर पण्डा
नैतिकमूल्यशिक्षा - राजेन्द्र शर्मा

## बौद्धकालीनशिक्षा

**रञ्जिता कण्डि**
शिक्षाशास्त्रिद्वितीयवर्षम्

युगे युगे लौकिककल्याणाय सदैव प्रवृत्ताः भवन्ति महापुरुषाः। जनानां दुःखं दूरीकृत्य समाजस्य पुनर्निर्माणाय ते प्रयासं कुर्वन्ति। वैदिककाले ब्राह्मण्यधर्मस्य प्राधान्यमासीत् समाजे। शूद्राणां स्त्रीणाञ्च कृते आचरणस्य समानावसरः नासीत्। कर्मकाण्डस्य प्राचुर्यं सर्वत्र परिलक्ष्यते स्म। यज्ञेषु बलिप्रथा प्रचलिता आसीत्। ब्राह्मण्यधर्मस्य दुष्प्रभावात् मुक्तिं प्रदातुं समाजे एकस्य नूतनधर्मस्याविर्भावः सञ्जातः। सः धर्मः बौद्धधर्म इति नाम्ना प्रसिद्धिमुपागतः। धर्मस्यास्य प्रवर्तकः आसीत् गौतमबुद्धः।

सः शाक्यवंशीयस्य राज्ञः शुद्धोदनस्य पुत्रः । तस्य माता महामाया । बुद्धस्य बाल्यनाम सिद्धार्थः आसीत् । तस्य बाल्यजीवनं राजकीयवातावरणे व्यतीतम् । परन्तु संसारजनानां नित्यं शोकं दुःखञ्च अनुभूय तस्य निराकरणस्योपायानन्वेष्टुं पुत्रं पत्नीञ्च विहाय राजपुत्रः सिद्धार्थः एकोनत्रिंशत्तमे वयसि राजप्रसादं तत्याज । नगरात् बहुदूरं गत्वा एकस्मिन् गहने वने वृक्षस्य तले कठिनां तपश्चर्यां कृतवान् । तदनन्तरं तस्य बुद्धत्वप्राप्तिर्जाता । ज्ञानप्राप्त्यनन्तरं बुद्धेन सारनाथनामके स्थाने प्रथमतया स्वस्य पञ्चसहचराणां कृते उपदेशः प्रदत्तः । तदेव "धर्मचक्रप्रवर्तनम्" इत्याख्यया प्रसिद्धम् । बहुजनहिताय बहुजनसुखाय च बुद्धः "पालि" इति जनभाषया जनेभ्यः उपदेशं प्रदत्तवान् । जातिवर्णवर्गनिर्विशेषं सङ्घं संस्थाप्य सर्वेषां जनानां कृते शिक्षायाः समानावसरः तेन परिकल्पितः ।

**बौद्धदर्शनस्य स्वरूपम् -**

बुद्धस्यानुसारं बौद्धधर्मे चत्वारि आर्यसत्यानि भवन्ति । तानि यथा –

1. दुःखम् ।
2. दुःखसमुदायः ।
3. दुःखनिरोधः ।
4. दुःखनिरोधगामिनी ।

अर्थात् संसारः दुःखपूर्णः । दुःखस्य कारणं तृष्णा । तृष्णायाः विनाशेन दुःखस्य निरोधः जायते। विनयमहावर्गे एवं वर्णितमस्ति ।

"इदं स्वोपन भिखवे दुक्रव निरोधगामिनी परिपदा अरिय सच्यम् ।अयमेव आरियो अट्ठङ्गिको मन्मा । सेय्यविदं । सम्यादिटति । सम्या वायामो । सम्मा सेकप्पो । सम्मा वाचा । सम्मा कम्मन्तो । सम्मा आजीवो । सम्मा वायामो । सम्मा सति । सम्मा समधि ।"

दुःखस्य दूरीकरणाय बुद्धेन अष्टाङ्गमार्गः निर्धारितः । मार्गस्य अष्टौ अङ्गानि –

| | |
|---|---|
| सम्यक् दृष्टिः । | सम्यक् संकल्पः । |
| सम्यक् वाक् । | सम्यक् कर्मान्तः । |
| सम्यगाजीवः । | सम्यक् व्यायामः । |
| सम्यक् स्मृतिः । | सम्यक् समाधिः । |

बौद्धधर्मस्योत्पत्तिः हिन्दुधर्मादेव सञ्जाता । यद्यपि बौद्धधर्मः स्वतन्त्रधर्मरूपेण सुविख्यातः तथापि अस्य मूलतत्त्वानि हिन्दुधर्मे निबद्धान्यासन् । सन्दर्भेऽस्मिन् म्याक्समुलर महोदयेनोक्तं यथार्थेन - "भारतवर्षस्य प्राचीनधर्मस्य वेदवर्णितधर्मस्य चाध्ययनात्परं बौद्धधर्मस्य विषये

ममावधारणा एवं भवति यत् बुद्धेन प्रचलितधर्मः नैकः नूतनधर्मः। एषः धार्मिकः, दार्शनिकः, सामाजिकः, राजनैतिकादि दृष्ट्या भारतीयमस्तिष्कस्य स्वतः विकासः इति। ”

**बौद्धशिक्षायाः उद्देश्यानि -** बौद्धशिक्षायाः उद्देश्यं वैदिकशिक्षायाः उद्देश्यमिव आध्यात्मिकम् आसीत्। उभयोर्मध्ये समानता दृश्यते। परन्तु बुद्धेन मानवजीवनस्य प्रमुखं लक्ष्यं निर्वाणप्राप्तिरिति स्वीकृतम्।

1. ज्ञानार्जनम्।
2. धार्मिकभावनायाः विकासः।
3. सदाचारः।
4. सामाजिकविकासः।
5. जीविकोपार्जनम्।
6. अहिंसाऽऽचरणम्।

**1. ज्ञानार्जनम् -** ऋते ज्ञानान्न मुक्तिरिति यथा वैदिकशिक्षायाः प्रमुखमुद्देश्यमासीत् तथैव ज्ञानं विना निर्वाणप्राप्तिरपि न सम्भवतीति बौद्धशिक्षायाः उद्देश्यमङ्गीकृतमासीत् बुद्धेन। संसारे दुःखस्य मूलं मन्यते अज्ञानम्। जरारोगमरणजं दुःखं दूरीकर्तुं ज्ञानस्यावशकता वर्तते। शिक्षाद्वारा सद्ज्ञानं प्राप्यते। आर्यसत्यानां ज्ञानेन अष्टाङ्गमार्गस्य अनुकरणेन च संसारस्य दुःखं दूरीभवति। निर्वाणप्राप्तिरपि भवति। निर्वाणप्राप्तेः साधनरूपेण ज्ञानस्य महत्त्वं प्रतिपादितं वर्तते बौद्धधर्मे।

**2. धार्मिकभावनायाः विकासः -** बौद्धशिक्षामूलतः धार्मिकी आसीत्। धर्मस्य परिक्षणमेव बौद्धशिक्षायाः प्रमुखमुद्देश्यमासीत्। धर्मस्य प्रचाराय च शिक्षा अपरिहार्या। धार्मिकभावनायाः विकासाय बौद्धमठानां स्थापना जाता।

“धम्मं चरे सुचरितं न नं दुच्चरितं चरे।
धम्मचारी सुखं सेति अस्मिन् लोके परम्हिच॥”

**3. सदाचारः -** बौद्धशिक्षायां सदाचरणस्य महत्त्वं वरीवर्ति। सदाचरणेन नैतिकमूल्यानां विकासः, आदर्शचरित्राणाञ्च निर्माणं भवति।

1. जीवेषु दया।
2. अचौर्यम्।
3. ब्रह्मचर्यस्य पालनम्।
4. सत्यभाषणम्।
5. मद्यपानात् निवृत्तिश्च।

**4. सामाजिकविकासः -** बौद्धकालीनसमाजे जातिप्रथायाः कर्मकाण्डस्य अन्धविश्वासस्य च प्राधान्यं नासीत् । सामाजिकविकासाय भिक्षवः प्रवृत्ताः आसन् । भिक्षूणां सम्पूर्णजीवनं समाजकल्याणाय समर्पितमासीत् । विद्यार्थिषु सेवा, प्रेम, दया, करुणादि सामाजिकगुणानां विकासे भिक्षूणां योगदानं प्रमुखमासीत् ।

**5. जीविकोपार्जनम् -** बौद्धकाले चतुष्षष्ठिशिल्पानां महत्त्वमासीत् । भिक्षवः शिल्पेष्वेतेषु निपुणाः आसन् । बौद्धशिक्षाकेन्द्रेषु एतेषां शिल्पानां प्रशिक्षणं दीयते स्म ।

**6.अहिंसाऽऽचरणम् -** "अहिंसा परमो धर्मः" इति स्मृतिवचनमङ्गीकृत्य बौद्धधर्मे अहिंसायाः महत्त्वं प्रतिपादितं वर्तते । मानवसेवा, मानवप्रेम, जीवदया इत्यादीनि बौद्धधर्मस्य मूलतत्त्वानि आसन् ।

**बौद्धकालीनशिक्षाव्यवस्था -**

मूलतः बौद्धशिक्षा धर्मप्रधाना आसीत् । प्रारम्भिककाले बौद्धमठाः केवलं धर्मप्रचारस्य केन्द्राणि आसन् । कालक्रमे एते मठाः विहाराश्च शिक्षाकेन्द्ररूपेण सुप्रतिष्ठिताः । बौद्धविहाराणां प्रशासनं बौद्धसङ्घाधीनमासीत् । बौद्धविहाराणां स्थापना बौद्धकालीनराजभिः बुद्धाश्रितधनिकजनैः वा कृता आसीत् । एकस्मिन् विहारे सहस्रभिक्षूणां कृते आवासव्यवस्था आसीत् । शिष्यः गुरुणा साकं निवासं करोति स्म । बौद्धसंन्यासिनां निवासार्थं पञ्चविधनिवासस्थानानि बुद्धेन स्वीकृतानि सन्ति ।
(1) विहारः (2) गरुडाकृतिगृहम् (3) प्रासादः (4) हर्म्यम् (5) गृहादयः ।
एतेषु निवासस्थानेषु भण्डारगृहं, पाकशाला, स्नानागारं, विश्रामगृहं, कूपः, उद्यानं, पुष्करिण्यादीनां विशेषव्यवस्था आसीत् ।

प्राचीनभारते चत्वारि नगराणि बौद्धशिक्षाकेन्द्ररूपेण सुप्रतिष्ठितानि । तेषु राजगृहं, यष्टिवनं, वेणुवनं, सीतावनञ्च । श्रीवसीनगरे जेतवनं, पूर्वारामश्च । वैशालीनगरे महावनम्, आम्रकुञ्जञ्च, कपिलवस्तुनगरे निग्रोधादिकेन्द्राणि सुविख्यातानि । प्राथमिकशिक्षायाः उच्चशिक्षायाश्च विहाराः भिन्नाः आसन् । उच्चशिक्षायाः विहारः विश्वविद्यालयरूपेण विकसितः । एतेषु विश्वविद्यालयेषु न केवलं शिक्षा प्रदीयते स्म अपि तु ज्ञानविज्ञानस्य विविधक्षेत्रेषु अनुसन्धानस्य सौविध्यमासीत् ।

## वैदिककालीनशिक्षा

**मञ्जुलता साहु**

शिक्षाशास्त्रिद्वितीयवर्षम्

**उपोद्घातः -** वैदिककाले प्रचाल्यमाना शिक्षा वैदिकशिक्षा इति नाम्ना अभिधीयते । भारतीयसंस्कृतिः सर्वप्राचीनास्ति । वेदाः भारतीयसंस्कृतेः प्राणस्वरूपास्सन्ति । प्राचीनशिक्षायाः विकासधारा वेदादेव प्रवहमाना अस्ति ।

**वेदशब्दस्यार्थः -** 'वेद' शब्दः विद् धातोः घञ् प्रत्ययेन निष्पन्नः । यस्यार्थः भवति ज्ञानमिति । विद्यन्ते ज्ञायन्ते लभन्ते एभिर्धर्मादिपुरुषार्थः इति वेदाः । सायणाचार्येण 'वेद' शब्दस्य व्याख्या इत्थं प्रकारेण कृता वर्तते **इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति सः वेदः** ।

वैदिकवाङ्मये वेदानाम् अपौरुषेयत्वं स्वीकृतं वर्तते । सृष्टेः आदौ परब्रह्मणः परमेश्वरस्य निःश्वासात् प्रकटिताः वेदाः इति नैयायिकाः स्वीकुर्वन्ति । तद्यथा –

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥

**वेदेषु शिक्षाशब्दस्यार्थः -** वेदेषु शिक्षाशब्दस्य स्थाने विद्या, ज्ञानं, बोधः विनयश्चेत्यादयः सन्ति । सायणः ऋग्वेदभाष्यभूमिकायाम् अलिखत् यत् - स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षते उपदिश्यते सा शिक्षा । शिक्षया एव मानवाः मोक्षं प्राप्तुं शक्नुवन्ति । यतोहि कालेस्मिन् शिक्षायाः लक्ष्यं मोक्ष एव आसीत् इति ।

**वैदिकशिक्षायाः उद्देश्यानि -** प्राचीनभारते शिक्षायाः उद्देश्यं न केवलं ज्ञानप्राप्तिरासीत् । अपि तु धर्मस्य अनुसरणं धर्मस्य प्रचारप्रसारञ्चासीत् । एतस्याः शिक्षायाः उद्देश्यानि निर्धारितानि भवन्ति । तद्यथा –

1. सामाजिककुशलतायाः उन्नतिः ।
2. संस्कृतेः संरक्षणं प्रचारप्रसारश्च ।
3. ईश्वरभक्तिभावना धार्मिकभावनायाश्च समावेशः ।
4. सच्चरित्रनिर्माणम् ।
5. सामाजिकमूल्यानां प्राप्तिः ।
6. आत्मसाक्षात्कारः ।

**शिक्षणविधिः -** शिक्षायां शिक्षणविधिः तु प्रधानभूतः भवति । शिक्षणोद्देश्यानां प्राप्तौ शिक्षणविधिः उत्कृष्टसाधनं भवति। वैदिककाले शिक्षणप्रक्रियायां प्रधानतया एकस्य विधेः प्रयोगः आसीत्। अनेन सह कश्चन गौणविधिरप्यासीत्। तद्यथा -

1. व्याख्यानविधिः। 4. प्रश्नोत्तरविधिः।
2. टीकाविधिः। 5. प्रवचनविधिः।
3. शास्त्रार्थविधिः। 6. तर्कविधिः।

**पाठ्यक्रमः -** वैदिककाले पाठ्यक्रमः समुन्नतः विविधश्चासीत्। पाठ्यक्रमे अन्यैः विषयैः सह चतुर्णां वेदानां विशेषसमावेशः आसीत् । वैदिककाले वैदिकमन्त्राणाम् उच्चारणस्य शिक्षा प्रामुख्येन दीयते स्म । अत एव वैदिककाले वैदिकमन्त्राणामुच्चारणं, स्मरणं, पठनं, लेखनं, भाषासाहित्य-व्याकरणादिविषयाः पाठ्यक्रमे सम्मिलिताः आसन्। वैदिककाले चतुर्दशविद्यानां पठनपाठनस्य व्यवस्था आसीत् । तत्र चत्वारः वेदाः, षड्वेदाङ्गानि, पुराणं, न्यायः, मीमांसा, धर्मशास्त्रस्य प्रमुखाः विद्याः, याज्ञवल्क्यस्मृतौ स्वीकृताः । एताः विहाय आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः स्थापत्यवेदश्चेति चत्वारः उपवेदाः आसन्। एवं प्रकारेण अष्टादशविद्यानामुल्लेखः समुपलभ्यते।

**नियमाः -** गुरुकुले तदानीं छात्रेभ्यः बहवः नियमाः आसन्। नियमानां पालनं छात्राणां परमं कर्तव्यमासीत्। तस्मिन् काले शिष्याः गुरोः अनुशासने तिष्ठन्ति स्म। गुरोः आज्ञां विना न किमपि कार्यं कुर्वन्ति स्म। प्रत्यहं ब्राह्मीमुहूर्ते उत्थाय शौचस्नानादि नित्यकर्माणि विधाय सन्ध्याहवनादि कार्याणि कुर्वन्ति स्म। गुरोराज्ञायाः महत्त्वमपि आसीत्। परन्तु कठोरदण्डस्य व्यवस्था नासीत्।

**गुरुशिष्यसम्बन्धः -** उपनयनानन्तरं गुरुशिष्ययोः विद्यासम्बन्धः स्थापितो भवति । सम्बन्धोऽयं पितापुत्रवत् मधुरः भवति स्म। तैत्तरीयोपनिषदि वर्णितमस्ति - **सह नौ यशः सः नौ ब्रह्मवर्चसम्** इति गुरोरनुग्रहेण शिष्यस्य यशः, तेजस्विशिष्येण गुरोर्यशः च वर्धते।

गुरुः सर्वदा शिष्यस्य हितमेव चिन्तयति। वेदेषु गुरुशिष्ययोः कल्याणाय ईश्वरप्रार्थना कृता उपलभ्यते । तदानीन्तनकाले समावर्तनसंस्कारसमये गुरुदक्षिणायाः विधानमासीत् । शिष्यः स्वसामर्थ्यानुसारं गुरुदक्षिणां दत्वा ऋणमुक्तः भवति स्म।

एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत्।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा चानृणी भवेत्॥

**विशेषताः -** वैदिकशिक्षायाः निम्नलिखितानि वैशिष्ट्यानि आसन्।

- वैदिककालीनशिक्षा धर्मानुप्रणेता आसीत्।

- ईश्वरभक्तिः धार्मिकभावनायाः विकास एव शिक्षा।
- व्यक्तेः सर्वाङ्गीणविकासे शिक्षा सहायतां विदधति स्म।
- वैदिकशिक्षा आध्यात्मिकज्ञानकेन्द्रिता आसीत्।
- गुरुशिष्ययोः सम्बन्धः घनिष्ठः आसीत्।
- सामाजिककुशलतानिर्माणे व्यावसायिकशिक्षा दीयते स्म।
- चरित्रविकासाय समुचितशिक्षा दीयते स्म।
- आत्मानुशासने आत्मनियन्त्रणे च बलं दीयते स्म।
- शिक्षा वास्तविकजीवनेन साकं सम्बद्धा आसीत्।

सन्दर्भग्रन्थाः –

1. भारते शिक्षाप्रणाल्याः विकासः – डा. वृन्दावनपात्रः।
2. पुरातनीशिक्षा – डा. लोकमान्यमिश्रः।

## शिक्षा

**प्रतीक्षा के. पि.**

शिक्षाशास्त्रिद्वितीयवर्षम्

शिक्षा नाम तच्छास्त्रं येन मन्त्राणामुच्चारणं शुद्धं सम्पाद्यते। वेदस्वरस्य प्राधान्यं वर्तते। अतेवेदं शिक्षाशास्त्रं वेदाङ्गम्। शिक्षाशास्त्रप्रयोजनं तैत्तिरीयोपनिषदारम्भे उक्तम्। यथा - "अथ शिक्षां व्याख्यास्यामः - वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तान इत्युक्तः शिक्षाध्यायः"॥ तत्र वर्णोऽकारादयः, स्वरः उदात्तादिः, मात्रा ह्रस्वादयः, बलं स्थानप्रयत्नम् , साम निषादादि , सन्तानो विकवर्णादि , एतेषां बोधनमेव शिक्षायाः प्रयोजनम्।

यथा वैदिकविधीनां सम्पादनार्थं ब्राह्मणग्रन्थाः उपयुज्यन्ते। तथैव उच्चारणप्रयोजनेन शिक्षायाः उपयोगः वाञ्छते। वेदानां वैदिकसाहित्यस्य वा अध्ययनऽध्यापनविषयकविधीनां निवेशः शिक्षाशास्त्रे कृतः। शिक्षा स्वरवर्णोच्चारणानि केन प्रकारेण कर्तव्यानि इति ग्रन्थेऽस्मान्नुपदिशति। सायणाचार्यस्य ऋग्वेदभाष्यभूमिकायामुक्तम्। यत् - स्वरवर्णोच्चारणप्रकारो यत्र शिक्ष्यते, उपदिश्यते सा शिक्षेति। वेदपठनावसरे शुद्धमुच्चारणं स्वरस्य च युक्तं काम्यते। अशुद्धोच्चारणयुक्तः भ्रष्टस्वरस्य वेदपाठे महद्दुष्फलं जनयति। यज्ञयागोपासनादिकं

यत्कार्यमिष्टलाभाय क्रियते तस्मात् इष्टलाभस्य फलं न कदापि अशुद्धोच्चारणेन सम्प्राप्स्यते। तद्विधमशुद्धोच्चारणयुक्तं कार्यं तु विपदां महतीम् उत्पादयति। श्रूयते यत् पुरा " इन्द्रशत्रुवर्धस्व " इत्यस्य मन्त्रस्य वृत्रासुरेण अशुद्धोच्चारणम् अकरोत्। तेन यजमानस्य अनिष्टम् अभूदिति। यथोच्यते पाणिनिना पाणिनीयशिक्षायाम् -

मन्त्रो हीनः स्वरतो वर्णतो वा, मिथ्याप्रयुक्तो न तमर्थमाह।

स वाग्वज्रः यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोऽपराधात्॥ पा.शिक्षा.

वेदोच्चारणस्य युक्तार्थे स्वरक्षाज्ञानमपेक्ष्यते। स्वरः उदत्तानुदात्तस्वरितभेदेन त्रिविधः। 'उच्चैरुदात्तः, नीचैरनुदात्तः, समाहारस्स्वरितः' इत्येतानि पाणिनीना तेषां त्रयाणां लक्षणानि प्रोक्तानि। अनुदात्तपदमेकवर्ज्यम् इत्येतस्मिन् पाणिनीये सूत्रे अभिहितं यत्, वेदस्य प्रतिपदमवश्यमेव केनापि उदात्तेन स्वरेण संश्लिष्टं भवति। अवशिष्टाश्च स्वराः भवन्त्यनुदात्ताः। तेष्वेवानुदात्तेषु स्वरितो जायते। स्वरप्रधानतायाः कारणं वेदेष्वपि तेषां स्वराणामर्थनियन्त्रणत्वम्।

वेदेषु शुद्धोच्चारणं सर्वप्रथमं वाञ्छितं भवति। तच्च शुद्धोच्चारणं शिक्षा समुपदिशति। एतस्मादेव हेतोः षट्सु वेदाङ्गेषु शिक्षाङ्गस्य मूर्धन्यत्वमाम्नातम्। शिक्षायाः अभिमतो विषयः प्रातिशाख्येषु दृश्यते। प्रातिशाख्यग्रन्थाः शिक्षाशास्त्रस्य प्राचीनतमाः प्रतिनिधय इव सन्ति। संहितापाठसम्बन्धिनः सर्वेऽपि विषयाः तत्र साङ्गोपाङ्गतया प्रतिपादिताः सन्ति।

## व्यक्तित्वनिर्माणे सामाजिकमूल्यम्

**अम्रिता बारिक्**

शिक्षाशास्त्रिद्वितीयवर्षम्

यद्यपि शिक्षा कदापि मूल्यविहीना न भवति परञ्च अधुनातनसमाजे या शिक्षा प्रचाल्यमाना वर्तते सा तु सम्पूर्णा नास्तीति शक्यते। शिक्षितसमाजे अपि परस्परं द्वेषः क्लेशश्च दृश्यते। मतभिन्नता तु प्रज्ञासमाजे कल्पयितुं शक्यते परञ्च मनोभिन्नता समाजस्य आधारसंरचनां विनाशयति। अतैव शिक्षायां समग्रता अपेक्षते तथा च समग्रशिक्षायां सामाजिकमूल्यानां चिह्नाङ्कनं करणीयम्।

समाजः व्यक्तीनां समूहः अस्ति यत्र जनाः स्वयोग्यता-आकांक्षा-धर्म-विश्वास-आर्थिकशक्तीनाञ्चाधारेण सङ्घटने स्वविश्वासं प्रकटयन्ति। यस्मिन् ते उषितुम् इच्छन्ति वा यत्र तेषां सुरक्षाप्राप्तेः संभावना दृश्यते। पुनश्चायं सम्प्रभुसमाजः जनानां भौतिकाध्यात्मिकनैतिक-

सामाजिकोन्नतिभ्यश्च तेषां समर्पिताधिकारणानां स्मरणं कृत्वा तेषु औचित्यपूर्णबन्धनम् आरोपयति, काञ्चन विशिष्टनियमानपि स्थापयति। एते नियमाः सामाजिकमूल्यमिति नाम्नाभिधीयन्ते। स्वसदस्येषु समानतायाः गुणान् स्थापयति। तेषां हानि-लाभ-औचित्यानौचित्यादीनाञ्च निर्धारणं करोति। समाजस्य सः जनमूल्यवान् भवति। यः सर्वैः सह समानव्यवहारमाचरति। यथा चाण्यक्यशतकमिति ग्रन्थे उक्तमस्ति –

**मातृवत्परदारेषु परद्रव्येषु लोष्टवत् ।**
**आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः।।**

सामाजिकमूल्यानां के के सिद्धान्ताः विधेयाः इत्यस्मिन् विषये विवादोऽयं विषयः। परञ्च कानिचन मूल्यानि एतादृशानि भवन्ति यानि सामाजिकावश्यकतानां परिधिं पृथक्कर्तुं न शक्नुवन्ति। यथा - सन्मार्गः, सहयोगः, परोपकारः, देशभक्तिः, उत्साहः, त्यागः, सहिष्णुता, धैर्यम्, न्यायः, शुचिता, क्षमा, अनुरागः, दया, समानता, गणतन्त्रात्मकता, सामाजिकसेवाभावना, कर्तव्यनिष्ठा, स्वानुशासनम्, स्वावलम्बना, विनम्रता, सदाचारः, सत्संगतिः, धृतिः, सन्तोषः, शौर्यम्।

**परोपकारः सामाजिकन्यायश्च -** परोपकारः अत्यावश्यकं सामाजिकमूल्यमस्ति। मूल्यमिदं जनेषु सामाजिकसौहार्दं वर्धयति। परोपकारेण दुर्भावनायाः विनाशो भवति। जनानां मनसि प्रेमभावः जागृतो भवति। यदा मनुष्याः जीवनं, मरणं, हानिः, लाभेत्यादीनां सापेक्षम् ईश्वरस्य अंशरूपेण मानवान् पूजयन्ति। जनानां हितं विचिन्त्य कार्यं कुर्वन्ति, तदा अनेन कर्मणा यत् कार्यं सिध्यति, तदेव परोपकारः इति। यजुर्वेदे लिखितं वर्तते, यत् -

यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः।।

साधुजनाः एतादृशाः मन्यन्ते यदीश्वरस्य स्वरूपमेव परोपकारपूर्णो वर्तते। सः निःस्वार्थभावेन विश्वं पालयति। ईश्वरेण रचितमिदं विश्वं स्वयमेव स्वप्राकृतिकावस्थायां परोपकारपूर्णः आसीदस्त्येव च। यतो हि विक्रमोर्वशीये कालिदासेन लिखितं यत् –

परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।
परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम्।।

**सामाजिकन्याय: लोकतन्त्रञ्च -** सामाजिकन्यायानां का आधुनिकसङ्कल्पना वर्तते, अस्या: विकास: लोकतान्त्रिकशासन- व्यवस्थायां सम्भवति। लोकतन्त्रात्मकता एका बृहत्संङ्कल्पना भवति। गणतन्त्रात्मकताया: अर्थो भवति यत्र शासनव्यवस्थाया: नियमनविनियमनयो: अधिस्थापने च भेदं विना जनसाधारणस्य साहाय्यं प्राप्यते। अर्थात् जना: स्वेच्छया स्वोपरि शासनाय प्रतिनिधिं चिन्वन्ति। इतोऽपि वक्तुं शक्यते यत् अस्यां व्यवस्थायां जना: स्वयं शासिता: भवन्ति। अस्याा: व्यवस्थाया: वर्णनं वेदेष्वपि प्राप्यते। यथा –

**विशो न राजानं वृणाना:, त्वां विशो वृणातां राज्याय। विश्वस्त्वा सर्वा वाग्छतु।।**

सामाजिकन्यायस्य कृते आवश्यकं वर्तते यत् सर्वेषु जनेषु परस्परं सौहार्दपूर्ण: सम्बन्ध: भवेत्, तथा च भेदरहितो वर्गरहितश्च समाजस्य संस्थापनं स्यात्। सामाजिकन्यायेन समानता समागच्छति। समानतया समाजे समरसताया: वृद्धिर्भवति। अत: श्रेष्ठसमाजेन समानतां स्थापयतुिं प्रयास: विधेय:। भारतीयद्वैतदर्शने लिखितं वर्तते यत् सर्वेषु जीवेषु आत्मतत्त्वांशाधिवासं भवति।

अत: मूल्यानां परिशीलनेन चिन्तनेन वा समाजे सामाजिकसमरसता वर्धते। अत: अस्माकं शिक्षाव्यवस्था समग्रशिक्षां प्रति सञ्चरणशीला भवेत्।

सन्दर्भग्रन्था: :-

१. कुमारकृष्ण शास्त्री हरिदत्त: - ऋक्सूक्त संग्रह, साहित्यभण्डार, मेरठ।

२. कुमारी मीना , मनुस्मृति, निर्माण प्रकाशन , दिल्ली।

३. गोपीनाथ पु., भर्तृहरिशतकतत्रयम्, राष्ट्रियसंस्कृतसंस्थानम्।

## शिक्षाक्षेत्रे धार्मिक मूल्यशिक्षयो: प्रासङ्गिकता

**भानुमती दास**

शिक्षाशास्त्रिद्वितीयवर्षम्

**प्रस्तावना -** सुजला - सुफला - सस्यश्यामलपूर्णा पुण्यभूमि: भारतं धर्मम् आधृत्य तिष्ठति। प्राक् क: नाम धर्म:? ध्रियते लोके अनेन इति धर्म:। धरति धारयति लोकान् पालयति इति धर्म:। अर्थात् य: कृत्स्नं संसारं स्वशासनबलेन धरति स एव धर्म:। धर्मं विना संसारे स्थातुं न शक्यते अत: मनुस्मृतौ भगवता मनुना धर्मस्य दशलक्षणानि वर्णितानि। यथा –

**धृतिः क्षमा दमोऽस्तेयः शौचम् इन्द्रियनिग्रहः।**

**धीर्विद्या सत्यमक्रोधः दशकं धर्मलक्षणम्।।** (मनुस्मृतिः)

धर्मात् या शिक्षा जायते सा धार्मिकशिक्षा। यथा छात्राणां कृते सामाजिक-आर्थिक-राजनैतिक - शारीरिकशिक्षा अपेक्ष्यते तथैव धर्मिकशिक्षा अपि आवश्यकी। धार्मिकशिक्षातः मूल्यानि आगतानि।

**मूल्यशिक्षा** - पुनः किं नाम मूल्यम्? भारतीयधर्मग्रन्थेषु मूल्यशब्दस्य अर्थः शीलशब्देन व्यवह्रियते। तस्य आंग्लपदं भवति Value। तत् लाटिन्भाषायाः Valere इति शब्दात् निष्पन्नं वर्तते। यस्य अर्थः भवति कस्यचन वस्तुनः मूल्यं, गुणः, विशेषता चेति। यथा - सर्वेषु खनिजद्रव्येषु वज्रस्य गुणः अधिकः इति हेतोः तस्य मूल्यमपि अधिकं वर्तते।

अतः मूल्यं नाम कस्यचन व्यक्तित्वस्य सद्गुणम् अवबोधयति, सर्वेषां गुणानामाधारं भवति शीलम्। शीलेन भुवनत्रयमपि जेतुं शक्यते। महाभारते उक्तं यत् –

शीलेन हि त्रयो लोकाः शक्त्या जेतुं न संशयः।

न हि किञ्चिदसाध्यं वै लोके शीलवतां भवेत्।। (महाभारतम्)

अतः सर्वे संसारेऽस्मिन् गुणयुक्ताः भवेयुः।

**मूल्यानां वर्गीकरणम्** - मूल्यानि पञ्चविधानि सन्ति यथा - नैतिकमूल्यानि, आध्यात्मिकमूल्यानि, सामाजिकमूल्यानि, शैक्षिकमूल्यानि, राष्ट्रियमूल्यानि चेति। एतेषाम् आवश्यकता शिक्षायां वरीवर्ति। तत्रापि धार्मिक-मूल्यशिक्षयोः आवश्यकता नितराम् अस्ति।

शिक्षाक्षेत्रे एतयोः शिक्षयोः आवश्यकता -

धार्मिकशिक्षातः मूल्याशिक्षा निष्पन्नं भवति। धर्मं विना मूल्यस्य विकासः न भविष्यति। मूल्यस्य विकासार्थं विद्यालयेषु छात्रेभ्यः धर्मशिक्षा देया। कारणं छात्राः विद्यालयरूपी लघुसमाजात् सीमितज्ञानम् आहारणं कृत्वा बृहत्रूपी समाजं गच्छन्ति। एवं स्वार्जितं ज्ञानं वितीर्य समाजस्य तथा जनानां हितं साधयति। स्वगुणेन अन्यान् आकर्षयति। अतः मानवस्य व्यक्तित्वं तथैव निर्मातव्यं तेन फलेन जनाः उपकृताः भवेयुः। यथा - अस्माकं देशस्य भूतपूर्वराष्ट्रपतिः डा. ए.पि.जे. अब्दुल्कलाम्वर्याः, विश्वविजयीस्वामिविवेकानन्द, तथैव इदानीन्तन भारतस्य प्रधानमन्त्री श्री नरेन्द्रमोदिवर्यः इत्यादयः। एतेषाम् आदर्शेन अनुप्राणिताः भवन्ति साधारणजनाः। अतः सर्वदा अस्माकं धर्मग्रन्थेषु विरचितानि उदाहरणानि दातव्यानि। यथा - रामायणे

धार्मिकशिक्षाविषये पश्याम: चेत् एकदा राम: लक्ष्मणं प्रति उक्तवान् - हे भ्रात:! मम पत्न्या: आभूषणानां विषये गणयित्वा मां वदतु। तस्मिन् समये लक्ष्मण: रामं प्रति उक्तवान् - अहं मातु: आभूषणानां विषये न जानामि केवलं तस्या: पादं पश्यामि, एवम् उक्त्वा ......

**नाहं जानामि केयूरे नाहं जानामि कुण्डले।**

**नूपरे तु अभिजानामि नित्यं पादाभिवन्दनात्।।** (रामायणम्)

एवं रूपेण रामायणकाले धर्मेण सर्वे आधृता: भूत्वा संस्कारेण मण्डिता:। ते सर्वे नारीं देवीसदृशं पूजितवन्त:। सर्वे परिवारे एकत्र निवासं कृत्वाऽपि कुमार्गस्य पथिका: केऽपि नासन्। किन्तु इदानीं संसारे किञ्चिदपि न दृश्यते। अन्ये सर्वे एकान्तं स्थातुमिच्छन्ति। अत: धर्मं मूल्यं च रक्षितुं छात्रान् भाविकालस्य नागरिक्ञ् च धर्मविषये अवबोधनीया:। छात्रा: यदि सम्यक्तया अवगच्छन्ति तर्हि देशस्य भविष्यम् उज्वलमयं भविष्यति। अत: सर्वदा धार्मिकशिक्षा अनुसरणीया, धार्मिकशिक्षया मूल्यस्य विकास: अत्यधिकं भवति।

निष्कर्ष: - अत: प्राचीनकालादाराभ्य इदानीं यावत् धर्मस्य प्राधान्यं वर्तते। धर्मं विना मानवा: किमपि कार्यं कर्तुं न शक्नुवन्ति। धर्मेण संसार: प्रतिष्ठित:। धर्मेण सर्वे आबद्धा: सन्ति, पुन: धर्मात् एव मूल्यानि निर्गतानि भवन्ति। सर्वाणि मूल्यानि धर्माधारितानि इति हेतो: छात्राणां कृते एतयो: शिक्षयो: व्यवस्था करणीया। फलेन संसारस्य हितं भविष्यति इति पण्डितानां मति: वर्तते।

**सन्दर्भग्रन्थसूची -** शिक्षाया: सामाजिकदार्शनिकाधारा: ।

मूल्यशिक्षा

## समाजनिर्माणे मूल्यशिक्षाया: भूमिका

**बिस्मिनी प्रधान्**

शिक्षाशास्त्रिद्वितीयवर्षम्

**गङ्गे च यमुने चैव गोदावरी सरस्वती ।**

**नर्मदे सिन्धुकावेरी कलशेऽस्मिन् सन्निधिं कुरु।।**

एषा संस्कृति: पुरातनकालात् अस्माकं स्मृतिश्रुतिपुराणादिषु ग्रन्थेषु परिलक्ष्यते। एतादृशीं संस्कृतिम् अनुसृत्य अस्माकं पूर्वजा: शुभमङ्गलादिकार्यक्रमं रचयित्वा संस्कारसंस्कृत्यादीनाम्

उत्तमोत्तममूल्यानां संरक्षणम् अकुर्वन्। परन्तु आधुनिकयुगेऽस्मिन् एतादृशानां मूल्यानां क्षयः जायमानः दृश्यते। एतेषां संरक्षणाय उत्तमोत्तमानां विवेकयुक्तानां मानवानां परिपूर्णयुक्तस्य समाजस्य निर्माणमपेक्ष्यते। एतादृशस्य समाजस्य निर्माणं मूल्यशिक्षया सम्भवति।

**का नाम शिक्षा -** जन्मात् आरभ्य मृत्युं यावत् प्रचाल्यमाना काचित् एका गतिशीलाप्रक्रिया वर्तते। शिक्षा अन्तर्निहितशक्तिम् बहिरानयति। मुक्तिं प्रददाति। अतः सा विद्या या विमुक्तये उपनिषत्सु वर्णितमस्ति।

मूल्यं नाम किम्? मूल्यं नाम अस्माकं स्मृतिपुराणादिषु ग्रन्थेषु शीलार्थे उल्लिखितमस्ति। मूल्यमित्यस्य आंग्लपदं भवति Value शब्दः लैटिनभाषायाः Valere इति शब्दात् उत्पन्नः अस्ति। अर्थात् कस्यचन वस्तुनः मूल्यम्, गुणं विशेषतां च सूचयति। मूल्येन त्रिभुवनं जेतुं शक्नुमः। महाभारते उक्तमस्ति -

**शीलेन हि त्रयो लोकाः शक्या जेतुं न संशयः।**
**न हि किञ्चिदसाध्यं वै लोके शीलवतां भवेत्।।**

अनेन व्यक्तिः स्वस्य व्यक्तित्वं विकासयितुं शक्नोति। पुनः मूल्यविषये महात्माबुद्धेन प्रतिपादितं यत् - चन्दनं तगरं वापि उत्पलम् अथ वस्सिकी एतेसं गन्धजातानां सीलगन्धो अनुत्तरो।।

का नाम मूल्यशिक्षा - यया शिक्षया शीलयुक्तगुणान् अथवा सद्गुणयुक्तगुणान् प्राप्तुं शक्नुमः सा मूल्यशिक्षा। या शिक्षा विद्यालयस्तरे पाठ्यक्रमे योजयित्वा छात्राणां मूल्यानां विषये शिक्षा दातव्या।

**समाजनिर्माणे मूल्यशिक्षायाः भूमिका -** एकस्य उत्तमसमाजस्य परिकल्पनाय उत्तमाध्यापकानाम् एवम् उत्तमछात्राणामावश्यकता वर्तते। यतो हि तौ दौ एकस्य नाणकस्य पार्श्वद्वयं भवति। अतः उत्तमयुवकानां समाजनिर्माणस्य दायित्वम् अध्यापकस्य वर्तते। कारणं समाजस्य निर्मातारः भवन्ति अध्यापकाः। ते आदौ शीलयुक्ताः भूत्वा विद्यालये छात्राणां कृते मूल्यशिक्षाविषये बोधनीयाः। येन वंशानुक्रमेण समग्रविश्वः शीलयुक्तः उत्तमोत्तमगुणयुक्तः भविष्यति। सद्गुणयुवकस्य निर्माणेन कालान्तरे एकस्य उत्तमस्य समाजस्य निर्माणं भविष्यति। एतत् सर्वं मूल्यशिक्षया भवितुमर्हति। एतदर्थं छात्रान् नैतिकमूल्यानि - आध्यात्मिकमूल्यानि - सामाजिकमूल्यानि - शैक्षिकमूल्यानि - राष्ट्रियमूल्यानि एतानि सर्वाणि बोधनीयानि।

**नैतिकमूल्यानि** - मातृ देवो भव, पितृ देवो भव, आचार्य देवो भव, अतिथि देवो भव।। इत्यदीनि बोधनीयानि।

**आध्यात्मिकमूल्यानि** - परोपकाराय फलन्ति वृक्षाः, परोपकाराय वहन्ति नद्यः, परोपकाराय दुहन्ति गावः, परोपकारार्थम् इदं शरीरम्।। एतादृशी भावना अध्यापकाः स्वस्य मनसि संस्थाप्य आचार्यः च छात्राणां कृते शिक्षा देया।

**सामाजिकमूल्यानि** - मानवः सामाजिकप्राणी भवति। अतः समाजे निवासाय तेषु सामाजिकमूल्यानि ज्ञातव्यानि। सामाजिकमूल्येषु उत्तमनागरिकता, उत्तरदायित्वं, समानता, ऐक्यभावना, समाजसेवा, राष्ट्रियैक्यता, मानवीयतादयः भवन्ति।

**शैक्षिकमूल्यानि** - देशस्य एकत्रीकरणाय स्वतन्त्रतायै च स्वस्य जीवनम् उत्सर्गीकृतवन्तः। महापुरुषाणां विषये शिक्षा देया। अतः चिरस्मरणीयाः ए.पि.जे.अब्दुलकलाम् , विवेकान्दादीनां विषयाः पाठ्यक्रमे स्थापनीयाः भवन्ति।

**राष्ट्रियमूल्यानि** - मूल्यशिक्षया राष्ट्रियमूल्यानि ज्ञापनीयानि। राष्ट्रस्य सेवार्थं सर्वदा प्रयत्नः करणीयः। पितृणाम् अपि सेवा करणीया। आत्मवत् सर्वभूतानि इति भावना सर्वेषु आगच्छेत्। सदाचारपालानं, अहिंसापालनं, सहनशीलतादि मूल्यबोधकगुणानां विषये शिक्षां दत्वा उत्तमसमाजस्य निर्माणं कर्तुं शक्यते। अनेन छात्रेषु उत्तमोत्तमगुणाः स्फुटिताः भवन्ति।

**निष्कर्षः** - सम्प्रति समाजे नैतिकमूल्यानां न्यूनता दृश्यते। अतः समाजे एतेषां वर्धनार्थं विद्यालयस्तरे छात्राणां कृते मूल्यानां विषये प्रदातव्या। कारणं यदि मूल्यं न संरक्षते तर्हि समाजोऽयम् अनुशासनरहितः भविष्यति। अतः यः रक्षकः सः भक्षकः अभूत्वा छात्राणां कृते उत्तमोत्तमरीत्या नूतनपद्धत्या शिक्षां दत्वा तेषु गुणानां वर्धनं कृत्वा सुगुणयुक्तसमाजस्य निर्माणं कर्तुं शक्यते। एतदर्थं सुजलसुफलसस्यश्यामलपूर्णदेशेऽस्मिन् मूल्यशिक्षायाः भूमिका उत्तमसमाजनिर्माणे अनिवार्यो वर्तते।

**परिशीलितग्रन्थाः** -

१. शिक्षायाः दार्शनिकाधाराः - डा. सोमनाथ साहु।

२. शिक्षायाः दार्शनिकसामाजिकाधाराः - डा. प्रेमसिंह सिकरवारः।

## शास्त्रसंरक्षणम्

**सस्मिता मिश्रः**
शिक्षाशास्त्रिद्वितीयवर्षम्

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन च।
पुंसां येनोपदिश्येत तत् शास्त्रमभिधीयते।।

पुण्यमये भारतेऽस्मिन् सर्वासां परम्पराणां संस्काराणां च बहुभिः विद्वद्भिः ग्रन्थाः रचिताः। धर्माधारितः मुनिप्रणीतः प्राचीनग्रन्थः भवति शास्त्रम्। यत्र कस्यापि विषयस्य पदार्थसमूहस्य वा सम्बन्धितं समस्तं ज्ञानम् उपयुक्तक्रमेण एकत्रैव संगृहीतम् अस्ति, तदेव शास्त्रमिति उच्यते।

**शास्त्रम् -** शास्त्र अनुशिष्टौ सर्वधातृभ्यः ष्ट्रन् इति गुणादि प्रत्यये शास्त्रमिति रूपं सिध्यति। शास्ति त्रायते चेति शास्त्रम् । यत् जीवने पुरुषार्थचतुष्टयसम्पादकं ज्ञानं यच्छति तत् शास्त्रं भवति। यच्च रामादिवत् प्रवर्तितव्यं न तु रावणादिवत् इति कर्त्तव्याकर्त्तव्यज्ञानं ददाति तदेव शास्त्रमित्युच्यते।

**शास्त्रस्य प्रयोजनम् -** प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इत्युक्तदिशा सर्वेषामपि शास्त्राणां ग्रन्थानां च प्रयोजनम् अस्तीति ज्ञायते। शास्त्राणां प्रयोजनं सामान्यतः साध्वसाधु ज्ञानं, कर्त्तव्याकर्त्तव्यज्ञानं, विहितनिषिद्धयोः ज्ञानं, ग्राह्याग्राह्ययोः ज्ञानं, तत्त्वानां ज्ञानं, सफलचराचरवस्तूनां लक्षणज्ञानं च विद्यते। तथैव व्याकरण-साहित्य-न्याय-मीमांसा-वेदान्त-ज्यौतिषम् इत्यादीनां शास्त्राणां प्रयोजनं भिन्नं भिन्नं वर्तते। शास्त्राणां भिन्नप्रयोजनानि सन्तीति कारणतः अस्माभिः शास्त्रस्य संरक्षणं करणीयमेव। शास्त्राणां संरक्षणेन एव आगामिसमये एतेषां प्राधान्यं सम्भवति।

**शास्त्रसंरक्षणोपायाः -** शास्त्रसंरक्षणार्थं बहवः उपायाः वर्तन्ते। यथा -

१. प्रचीनकाले या पाठनरीतिः आसीत् तया पारम्परिकरीत्या तथा शास्त्रं शास्त्रोक्तरीत्या पाठनम्।
२. आधुनिकविधिप्रविधीनां प्रयोगण शास्त्रपाठनम्।
३. शास्त्रपठनार्थं सर्वकारीयपक्षतः साहाय्यम्।
४. पारम्परिकविद्यालय-विश्वविद्यालयान् संस्थाप्य तत्र शास्त्रशिक्षणव्यवस्थायाः प्रकल्पनम्।
५. शास्त्राधीतानां कृते प्रायः सर्वेषु क्षेत्रेषु नियुक्तिव्यवस्था कल्पनीया।
६. प्रौढज्ञानपण्डितानां कृते सर्वविधम् अवसरकल्पनं सम्मानप्रदानञ्च।

७. सङ्गोष्ठी - कार्यशाला - सम्मेलन - चर्चादीनाम् आयोजनम्।

८. अनुसन्धानार्थं प्रोत्साहनम्।

९. शास्त्रसंरक्षणार्थं संस्थानां योगदानं स्यात्।

१०.संस्कृतविश्वविद्यालयानां, वैदिकविद्यालयानां च स्थापनम्।

एतैः उपायैः इदानीं साम्प्रतिककाले शास्त्राणां संरक्षणं कर्तुं शक्यते। एतान् उपायान् प्रयुज्य काश्चन संस्थाः शास्त्रसंरक्षणार्थं कार्यरताः वर्तन्ते।

**गुरुकुलानि** - आचार्यः पूर्वरूपमन्तेवास्युत्तररूपम्। विद्या सन्धिः प्रवचनं सन्धानम्। (तै.उपनिषद्) यत्र विद्यार्थी स्वस्य पितरौ तथा स्वपरिजनं त्यक्त्वा गृहात् दूरे स्थित्वा एव गुरुपरिवारस्य सदस्यरूपेण शिक्षां प्राप्नोति, तत् गुरुकुलम् इत्युच्यते। प्राचीनभारते तादृशाः विद्यालयाः अत्यन्तं महत्त्वपूर्णाः आसन्।

गुरुकुलम्:- यत्र गुरुभिः सह उपविश्य विद्याध्ययनव्यवस्था प्रचलति स्म।

परिषद् :- यत्र शास्त्रविशेषज्ञैः शिक्षा प्रदीयते स्म।

तपस्थलिः :- यत्र सभा-प्रवचनमाध्यमेन च शास्त्राणां ज्ञानार्जनाय आयोजनं क्रियते स्म।

पुरातनगुरुकुलानि अद्यत्वे विकसितानि जातानि। यथा - तक्षशिला, नलन्दा, विक्रमशिला इत्यादयः। पुनश्च मठाः, संस्कृत-अकादमी इत्यादयः शास्त्रसंरक्षणे साधकानि भवन्ति।

**निष्कर्षः** - प्राचीनकालस्य परम्पराणां शास्त्राणां संरक्षणार्थं बहवः संस्कृतविश्वविद्यालयाः, वैदिकविद्यालयाः, मठाः, संस्कृताकादम्याः, शासकीयेतरसंस्थाः, कार्यं कुर्वन्ति। शास्त्रं शास्त्रोक्तरीत्या पाठनेन, पाण्डुलिपिमातृकाणां च संरक्षणेन, प्रचारप्रसारमाध्यमेन गोष्ठी-सम्मेलनकार्यशालानाम् आयोजनेन, विभिन्नपत्रपत्रिकाणां सम्पादनेन प्रकाशनेन च संस्कृतस्य संरक्षणेन सह शास्त्रणामपि संरक्षणं कर्तुं शक्यते।

**परिशीलितग्रन्थाः** -

१. साहित्यदर्पणम्।

२. शिक्षासन्देशः - रा. सं. शं. - जयपुरपरिसरस्य वार्षिकपत्रिका।

## स्त्रीणाम् अधिकार:

रोजालिन् बिश्वाल
शिक्षाशास्त्रिद्वितीयवर्षम्

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता:।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफला: क्रिया।।

वैदिककालादारभ्य भारतीयसंस्कृतौ नारीणां स्थानं पूजनीयं वन्दनीयं च वर्तते। परन्तु अद्यत्वे पुरुषाधिक्ये समाजेऽस्मिन् स्त्रीणां स्थिति: दयनीया वर्तते। पुरुषा: सामाजिकजनाश्च स्त्रीणां दमनं कुर्वन्त: सन्ति। अत: स्त्रिय: स्वातन्त्र्येण जीवितुं नार्हन्ति। परन्तु तासां कृते अधिकार: वर्तते।

**अधिकार: -** अधि उपसर्गपूर्वक कृ धातो: घञ् प्रत्यये सति अधिकार: इति शब्द: निष्पन्न:। भगवता दत्त: अयम् अधिकार:। सृष्टे: आदिकालात् मानवस्य कृते अधिकार: वर्तते। किमपि वस्तुन: प्राप्त्यर्थम् अथवा किमपि कार्यं सम्पादयितुं च व्यक्ते: कृते यानि सौविध्यानि लभ्यन्ते तत् भवति तस्य मानवस्य अधिकार:।

**मानवाधिकार: -** मानवस्य अधिकार: मानवाधिकार:। प्रत्येकं मानवाय सामाजिकवातावरणे सुखेन सौविध्येन च स्थातुम् अधिकार: दीयते। व्यक्ते: विकासार्थम् अधिकार: आवश्यक:। १० दिसम्बर् १९४८ तमे वर्षे संयुक्तराष्ट्रसंघस्य सभायां मानवाधिकारस्य सार्वभौमिकघोषणा अभवत्। संविधाने सर्वेषां कृते षड् मानवाधिकारा: वर्तन्ते। यथा - १. समानता-अधिकार:, २. स्वतन्त्रता-अधिकार:, ३. शोषणविरुद्धाधिकार:, ४. धर्मस्वातन्त्र्याधिकार:, ५. सांस्कृतिकं तथा शिक्षागताधिकार:, ६. सांविधानिकाधिकार:।

**स्त्रीणाम् अधिकार: -** समाजस्य विकासे न केवलं पुरुषाणामेव योगदानं भवति। प्रत्युत स्त्रीणामपि योगदानम् अत्यन्तं महत्त्वपूर्णं वर्त्तते। समाजे राष्ट्रे च स्त्रीणामुपेक्षा न कल्याणप्रदा। अत: भारतीयसंविधानेऽपि तासां कृते अधिकार: अस्ति। यथा -

धारा १५ (१) अनिच्छया लैङ्गिककार्याणि निषिद्धानि।

धारा ३९ (ए) जीविकानिर्वहणार्थम् उभयो: महिलापुरुषयो: समानाधिकारा: भवन्ति।

धारा ३९ (डि) उभयो: महिलापुरुषयो: कृते समानकार्याय समानवेतनदानम्।

धारा ३९ (इ) नारीकर्मचारिणां कृते सुव्यवस्थाप्रदानम्।

धारा ४२ गर्भावस्थायां कार्यक्षेत्रात् विरामकल्पनम्।

धारा ५१ ए (इ) नारीभ्य: गौरवदानम्।

धारा २४३ (डि-३) प्रत्येकं पञ्चायतस्तरे समुदायशासनस्य एकतृतीयांश: भाग: नारीणां कृते प्रदानम्।

धारा २४३ (डि-४) प्रत्येकपञ्चायतस्तरे कार्यालयस्य प्रत्येकं क्षेत्रे एकतृतीयांशस्थानानि नारीणां कृते प्रदानम्।

धारा ६६ - कार्यक्षेत्रेषु षड् वादनात् प्राक् तथा सायं सप्तवादनान्तरं नारीभ्य: कार्यनिषेध:। इतोऽपि अधिकार: वर्तते। यथा - विधवानारीणां कृते अधिकार: पुन: तासां कृते पत्यु: सम्पदि अधिकार: वर्तते। अनन्तरं महिलानां कृतेऽपि पितु: सम्पदि अधिकार: अस्ति। कोऽपि तत् दमयितुं न शक्नोति।

**नारीणां कृते शैक्षिकावसर: -** नारीणां कृते समशैक्षिकावसरविषये सर्वकारस्य बहुविधप्रयासा: वर्तन्ते। तासां कृते एते अवसरा: सन्ति। यथा - नि:शुल्कशिक्षाव्यवस्था, छात्रावासव्यवस्था, स्वतन्त्रनियमस्य व्यवस्था, पृथक् विद्यालयव्यवस्था, छात्रवृत्तिव्यवस्था, विशेषपाठ्यक्रमस्य व्यवस्था, उद्योगावकाशा:। एतेषाम् आधारेण महिला: अग्रे गन्तुम् अर्हन्ति। उच्यते यत् एका महिला शिक्षिता भवति चेत् समग्रविश्व: शिक्षित: भवति। अत: ता: शिक्षिता: भवन्ति चेत् स्वस्य अधिकारविषये तासां ज्ञानं भवति। स्वस्य अधिकारस्य उपभोगं स्वातन्त्र्येण साकं कर्तुं शक्नुवन्ति।

**निष्कर्ष: -** स्त्रीणां कृते सर्वत्र समानाधिकार: दातव्य:। स्त्रीपुरुषयो: मध्ये पुरुषस्य प्राधान्यं यावत् अस्ति, तावत् स्त्रीणामपि भवेत् इति धिया प्रत्येकस्मिन् क्षेत्रे तासां कृते अधिकार: कल्पनीय:। येन सा अग्रे गत्वा स्वस्य विकासेन साकं समग्रविश्वस्य विकासं कर्तुम् अर्हति। पुन: साम्प्रतिके समाजेऽस्मिन् नारी भारद्वयं वहति। एकस्मिन् समये एव गृहस्य भारम् एवं व्यावसायिककार्यं च। तथापि उभयोर्मध्ये सामञ्जस्यं संस्थाप्य तादृश्यां परिस्थितौ स्वस्य स्थानं, स्थितिं च वर्धयति। अत: एतादृशीनां नारीणां कृते विशिष्टाधिकार: अपेक्षते एव।

**परिशीलितग्रन्था: -**

१. मानवाधिकार और मूल्यशिक्षण - डा. रामशकल पाण्डेय, डा. करुणाशङ्कर मिश्र।

२. शिक्षाया: दार्शनिकाधारा: - डा. सोमनाथ साहु।

## विद्यालयस्तरे पाठ्यचर्यायाः महत्त्वम्

**प्रस्वसिनी साहु**

शिक्षाशास्त्रिद्वितीयवर्षम्

मानवः एकः सामाजिकप्राणी। समाजे जीवनयापनं कर्तुं विभिन्नप्रकारकाः प्रयोगाः आवश्यकाः। येन प्रयोगेन विद्यालयस्तरे बालकानां जीवनस्य सर्वपक्षान् स्पृशति। एवं सन्तुलितव्यक्तित्वविकासे च साहाय्यं करोति। पाठ्यचर्यायां केवलं तेषां शास्त्रीयविषयाणामेव ग्रहणं न भवति अपि तु तया परम्परया विद्यालये अध्यापनं भवति।

**पाठ्यचर्यायाः अर्थः -** पाठ्यचर्या शैक्षिकव्यवस्थायाः एकः अनिवार्यमहत्त्वपूर्णम् अङ्गम् भवति। पाठ्यचर्या इत्ययम् आङ्ग्लभाषायां Curriculam इति कथ्यते। Curriculam इति शब्दः लैटिन्भाषायाः Currere इति शब्दात् निष्पन्नो वर्तते। अस्यार्थः भवति धावनक्षेत्रमिति। येन विद्यालये यस्मिन् बालकः स्वलक्ष्यमधिगन्तुं धावति। एवं पाठ्यचर्या तादृशी भवति यामनुसृत्य छात्राः स्वलक्ष्यं प्राप्नुवन्ति। विद्यालये नूतनपद्धतीनां सम्पूर्णक्रियाकलापानां समूहः भवति पाठ्यचर्या।

**पाठ्यचर्यायाः परिभाषा -** कनिंघंमहोदयस्य मतानुसारेण पाठ्यचर्या कलाकारस्य हस्ते विद्यमानमेकम् उपकरणं भवति तामेव सामग्रीं स्वीयाशयानुगुणं कलाभवने (विद्यालये) परिवर्तयिष्यति इति।

**विद्यालयस्तरे पाठ्यचर्यायाः महत्त्वम् -** पाठ्यचर्या विद्यालयस्य शिक्षाव्यवस्थायाः केन्द्रबिन्दुः, एवं शिक्षायाः आधारः भवति। पाठ्यचर्यायाः माध्यमेन शिक्षायाः उद्देश्यं पूरितं भवति। या एकं साधनम् अस्ति। या छात्राध्यापकयोः मध्ये सम्पर्कं स्थापयति। अध्यापकः पाठ्यचर्यामाध्यमेन छात्राणां शारीरिक-मानसिक-सांस्कृतिक-सांवेगिक-आध्यात्मिक-सामाजिकविकासार्थं प्रयासं करोति। पाठ्यचर्यया बालकस्य सर्वाङ्गीणविकासः जायते। आधुनिकशैक्षिकक्षेत्रे बालाकानां क्षमतायाः निर्माणं करोति। एषा पाठ्यचर्या छात्रेषु सर्जनात्मकशीलतायाः एवं शैक्षिकगुणानां विकासाय च सहकरोति। एवं वैयक्तिकगुणानां विकासार्थम् आधारशिला भवति। विद्यालये पाठ्यचर्यायाः छात्राः सर्वेषु कार्येषु सक्रियतां सम्पादयितुं समर्थाः भवन्ति।

**शिक्षकेभ्य: पाठ्यचर्याया: महत्त्वम् -** पाठ्यचर्या शिक्षकस्य कृते शिक्षणस्य स्वरूपं निर्धारयति। शिक्षणस्य सञ्चालनं करोति एवं छात्राणाम् उपलब्धिं ज्ञातुम् अवसरं कल्पयति। पाठ्यचर्याया: माध्यमेन शिक्षक: उचितशिक्षणविधिं चेतुं शक्नोति। एवं छात्राणां कृते उचितं मार्गदर्शनं करोति।

**छात्रेभ्य: पाठ्यचर्याया: महत्त्वम् -** शैक्षिकोद्देश्यस्य निर्धारणार्थं पाठ्यचर्याया: विकास: प्रथमसोपानं भवति। पाठ्यचर्या शिक्षार्थिनां शिक्षोद्देश्यानां च पूरणार्थं साहाय्यं करोति, यया छात्रा: शैक्षिककार्यविषये पूर्वात् प्रस्तुतीकर्तुं शक्नोति। पाठ्यचर्याया: आधारेण शिक्षार्थी स्वस्य अध्ययनस्य योजनां कर्तुं शक्नोति। फलस्वरूपेण शिक्षाक्षेत्रे सर्वत्र सफलं प्राप्नोति, आधुनिकमनोवैज्ञानिके युगे विषयकेन्द्रितपाठ्यचर्याया: स्थाने बालकेन्द्रितपाठ्यचर्या स्वीकृता। एषा पाठ्यचर्या प्रयोजनवादविचारधाराणामाधारेणाधारिता अस्ति। अस्या: विचारधाराया: प्रमुख: प्रतिपादक: फ्लं महोदय: भवति। अस्य अभिप्राय: वर्तते यत् यया व्यक्ते : वातावरणं स्थिरम् अनुभवा: च स्थिरा: भवन्ति। कालानुगुणम् आवश्यकतानुगुणं ते अनुभवा: परिवर्तिता: भवन्ति सा पाठ्यचर्या बालकेन्द्रिता इति। अत: पूर्वनिर्धारितपाठ्यवस्तूनामाधारेण पाठ्यचर्याया: निर्माणम् अकृत्वा छात्राणां रुच्यनुगुणम् आवश्यकतां च अभिलक्ष्य पाठ्यचर्या निर्मीयते। पाठ्यचर्या सर्वदा छात्राणां स्तरे गत्यात्मिका भवति। छात्रेषु, अधिगन्तृषु भावं जागरयति पाठ्यचर्या। बालकस्य जीवनोपयोगिनी शिक्षा भवेदिति विचारं प्रयोजनवादिन: वदन्ति।

**निष्कर्ष: -** पाठ्यचर्याया: निर्माणेन सम्पूर्णशिक्षाया: अपूर्वयोगदानं भवेत्। पाठ्यचर्या एका पद्धति: भवति, यया कक्ष्याया: आरम्भात् एवं विद्यालयस्य सर्वाणि कार्याणि विकासनीयानि भवन्ति। पाठ्यचर्या विद्यालयस्य शिक्षाव्यवस्थाया: केन्द्रम्। विद्यालये सर्वाणि साधनानि यथा विद्यालयस्य भवनम्, अन्यानि उपकरणानि, पुस्तकालयश्च तासु अन्तर्भूता भवन्ति। अत: शिक्षाया: प्रयोजनं बालकस्य भाविजीवनं सुखमयं भविष्यति इति।

**परिशीलतग्रन्था: -**

१. शिक्षाया: दार्शनिकाधारा: - डा. सोमनाथ साहु।

२. शिक्षाया: दार्शनिकसमाजिकाधारा: - डा. प्रेमसिंह सिकरवार:।

# समाजशास्त्रे शिक्षा

**शुभश्री बारिक्**

शिक्षाशास्त्रिद्वितीयवर्षम्

समानी प्रपा सह वेन्नभागः समा योक्त्रे वो युनज्मि।
सम्यञ्चन्ति सपर्यतारा नाभिमिवाभितः।। (अथर्ववेदः)

[Society, friendship and love
Divinely bestode upon man,
Oh, had I the wings of the dove,
How soon would I taste you again. (William Cowper)]

**उपोद्घातः -** समाजे सर्वेऽपि तिष्ठन्ति यथा मनुष्याः, पशवः, कीटाः इत्यादयः। पशवः अरण्ये स्वाभाविकं जीवनं प्राप्नुवन्ति। मनुष्याः समाजे अपि स्वीयं जीवनं यापयन्ति। अत्र मनुष्याणां आश्रयस्थलं भवति समाजः। अतः मनुष्यः सामाजिकप्राणी इति कथ्यते। परन्तु पशवः यत्र निवसन्ति तत् समजः इति उच्यते।

| विषयः :- | समाजः | समजः |
|---|---|---|
| | विचारः | निद्रा |
| | विनयः | कलहः |
| | भाषा | व्यसनम् |

| | |
|---|---|
| **समाजः -** सम् + अज + घञ् इति पदात् शब्दः निष्पद्यते।<br><br>• मानवानां समूहः समाजः कथ्यते।<br>• अत्र विचारः, विनयः, आचारः, भाषाशालीनता इत्यादिगुणयुक्ताः जनाः विलसन्ति।<br>• यत्र व्यवस्थितरूपेण सर्वं कार्यं प्रचलति। | **समजः -** सम् + अज + अप् इति व्युत्पत्त्या शब्दः निष्पद्यते।<br><br>• पशुसमूहः इत्यर्थः। पशूनां समूहः समजः कथ्यते।<br>• अत्र वृथा निद्रा, कलहः, व्यसनम्, हुतम् प्रचलति।<br>• यत्र व्यवस्थितरूपेण किमपि न चलति। |

**समाजशास्त्रस्यार्थः** - समाजशास्त्रं समाजविज्ञानमिति कथ्यते। आंग्लभाषायां –

Sociology

Socius (ग्रीक्भाषायाः)    Logos (लैटिन्भाषायाः)

अर्थः - Science of society (समाजस्य विज्ञानम्) Study of society (समाजस्य अध्ययनम्)

- समाजस्य विज्ञानं समाजशास्त्रम् अर्थात् समाजस्य स्थितेः, वैज्ञानिकपरिशीलनमित्यर्थः - सांस्कृतिकनिधेः, सम्प्रदायानां, परम्पराणां, लोककथानां, लोकव्यवहारस्य, सामाजिकसंस्थानां, जातिवर्गाणामा इत्यादिविषये विश्लेषणं कुरुते।
- मानवः स्वविकासेन सह सामाजिकवातावरणे विविधजनानां सम्पर्कं करोति, तत्र स्वीयं वर्धनं करोति। तैः सह वार्तासु क्रियासु च निमज्जति।
- विभिन्नासु क्रियासु परस्परं क्रियाः प्रतिक्रियाः जायन्ते। एकः मनुष्यः स्वीयक्रियाकलापेन स्वप्रभाम् इतरेषु वितरति। इतरजनानां च प्रतिक्रियाभिः स्वयं प्रभावितो भवति।
- वैदिककालीनसमाजः, बौद्धसमाजः, महाभारतकालीनसमाजः, पाश्चत्त्यसमाजः, आधुनिकसमाजः इत्यादयः क्रियाः प्रतिक्रियाणाम् उदाहरणं सुभाषितकारैः एवं निगदितमत्र यत् - न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्याचिद्रिपुः।

व्यवहारेण जायन्ते मित्राणि रिपवस्तथा।।

- अ) सामाजिकव्यवस्थाः समाजिकप्रगतेश्च विज्ञानं समाजशास्त्रमिति कथ्यते। (आगस्ट काम्टे)
  आ) समाजशास्त्रं सामूहिकप्रतिनिधित्वस्य ज्ञानम् अस्ति - इमाइल् दुर्खीम् ।

**निष्कर्षः** - इदानीं वक्तुं शक्यते यत् सुविचारेण, स्वानुभवेन, मानवः समाजे कथम् तिष्ठति? समाजशास्त्राधारः शिक्षायाः परमावश्यकोऽस्ति। तत्र प्रथमतया अस्मद्देशस्य सामाजिकं रूपं सांस्कृतिकं च रूपं भवति। अतः समाजे शिक्षा अन्तर्भवति, न तु भिन्नरूपेण भवति।

**परिशीलितग्रन्थाः** -

१. शिक्षायाः दार्शनिकाधाराः - सोमनाथ साहुः।

२. शिक्षायाः सामाजिकाधाराः - प्रेमसिंहसिकरवार्।

## संस्कृतस्य महत्त्वम्

**जयश्री प्रधान:**
शिक्षाशास्त्रिद्वितीयवर्षम्

का नाम भाषा ?

भाषा शब्द: भाष् व्यक्तायां वाचि इत्यस्माद्धातो: गुरोश्च हल: इति सूत्रेण अ प्रत्यये स्त्रियां टापि निष्पद्यते। भाष्यते व्यक्तावाक् इति भाषा अथवा भाषाणात् भाषेत्याहु:। अयं भाषाशब्द: आङ्ग्लभाषायां Language इति व्यवह्रियते। य: लेटिन् भाषाया: Lingua इति पदात् निष्पन्न:। भाषा भावविनिमयाय समुचितं साधनम्। ये मनसि विचारा: जायन्ते ते ध्वन्यात्मना परिणता: भाषाशब्दवाच्या भवन्ति - प्लेटो। ध्वनिभि: मानवीयविचाराणां बौद्धिकाभिव्यक्तिरेव भाषा इत्यपि वक्तुं शक्यते - स्वीट्।

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी दिव्या यतस्सर्वा: प्रवृत्तय:।।
सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे।।

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिण:।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।। इति।

शाब्दिकानां परा - पश्यन्ती - मध्यमा - वैखरीवाक्षु। वैखर्या वाचा प्रकाशमाना परक्षेत्र-श्रवगोचरीभूता भाषेयं परस्परं भावाभिप्रायविचारविनिमयक्षमा, अन्योन्यप्रयोजनसम्पादनसाधना चेति स्तूयते। मानवानां भाषायाश्च मिथ: सम्बन्ध: वर्तते। भाषया विना समाजम् ऊहितुमपि न शक्यते। भाषाया: अभावेन भावाभिव्यक्तीकरणं दुस्साध्यं भवति। भाषया विना जीवनं दुर्भरं भवति। व्यक्ते: समाजस्य च विकासाय भाषैव मूलसाधनं भवति।

**संस्कृतभाषाया: महत्त्वम् -** संस्कृतम् इति पदं सम् उपसर्गपूर्वकात् कृञ् धातो: कर्मणि क्त प्रत्यये सम्परिभ्यां करोतौ भूषणे इति सूत्रेण अलङ्करणेऽर्थे सुडागमे सिद्धम्। या भाषा संस्कृता परिमार्जिता परिशुद्धा परिपूर्णा अलङ्कारभूता च भवति सा संस्कृतभाषोच्यते। एवं संस्कृतभाषाया: महत्त्वं स्वयं संस्कृतशब्द: एव व्यनक्ति। यत: सर्वमेव संस्कृतवस्तुश्रेष्ठं गौरवपूर्णं च राराजते। भारतीयानां विश्वासानुसारं सृष्टिकर्तु: ब्रह्मण: मुखात् वेदमयी संस्कृतवाणी निस्ससार।

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**

**आदौ वेदमयी दिव्या यतस्सर्वाः प्रवृत्तयः।।**

भारतीयदर्शनस्य धर्मस्य संस्कृतेश्च भाषारूपेण संस्कृतस्य महत्त्वमनिर्वचनीयमस्ति। बौद्धिकभावात्मकाध्यात्मिककलात्मकनिष्पत्तेः निरन्तरधारा संस्कृतभाषा सामान्यजनजीवनस्य अन्तर्वाहिनी वर्तते। विश्वस्य प्राचीनतमा भाषा भारतस्य अमूल्यनिधिश्च भवति। आर्यभाषाणां जननी, आर्योत्तरभाषाणां पोषणी च भवति।

सर्वासामपि भाषाणां जननं जीवनं यतः।
भासते संस्कृतं तेन शरीरस्य यथाऽसवः।। इति।

इतोऽपि संस्कृभाषायाः महत्त्वम् अधोदत्तविषयेषु दृश्यते। ते च –

| | |
|---|---|
| १. ऐतिहासिकं महत्त्वम् | २. सांस्कृतिकं महत्त्वम् |
| ३. भाषाविषयकं महत्त्वम् | ४. राष्ट्रियमहत्त्वम् |
| ५. अन्ताराष्ट्रियं महत्त्वम् | ६. साहित्यकं महत्त्वम् |
| ७. कलात्मकं महत्त्वम् | ८. वैज्ञानिकं महत्त्वम् |
| ९. देवभाषा | १०. चिरनवीना अमृता भाषा |

इत्थमत्र संस्कृतभाषायाः विभिन्नकोणेषु महत्त्वं व्यक्तं भवति।

**साम्प्रतिकं संस्कृतम् (Relevance of Sanskrit)** - महतीमाधुनिकतां वैज्ञानिकीं प्रगतिं साधितवत्यस्मिन् कालेऽपि अद्यत्वे संस्कृतं साम्प्रतमेव इति सामाजिकजगति संस्कृतस्य प्रयोजनमुररीकुर्वता संस्कृतभाषायोगेन प्रशंसापरिपाटी इत्थं पर्यालोचि।

"All our languages are including what are known as the Dravidian languages have through all the centuries habitually drafted in a greater or less degree, to meet every new situation and requirement for expression of a new idea or shade of meaning, upon the vast and inexhaustible treasure house of vocabularly, pharse, Idiom and concept comprised by the Sanskrit language and literature. The Ramayana and the Mahabharata, the Puranas and the Shastras, the Classical Poems, dramas and literary masterpieces of sanskrit make served throughout those centuries not only as the reservoir of Ideas, sentiments and parables to be drawn by all. For the embellishment of thier literary output, but also as bench mark of literary excellence, as standards for social conduct, as exemplars of morality, and is short, as the respositary of wit and wisdom of all the Indian peoples through out the ages."

संस्कृतस्य साम्प्रतिकत्वं प्रतिपादयन् डा. के. एस्. कण्णन् महोदयः इत्थमवोचत् - संस्कृतनिष्ठाः वैज्ञानिकाः विषयाः केवलं संग्रहालयस्थानीयद्रव्याणीव कुतुकिजनतोषवहनमात्र -

महिमानः इति न सर्वथा मन्तव्यम्। सारवत्तया तेषां भविष्यत्यपि काले समस्या परिहारोपयोगितायां नास्ति शङ्काकलङ्कः इति।

**परिशिलितग्रन्थाः :-**

१. संस्कृतशिक्षणम् - सि. एच्. एल्. एन्. शर्मा - जयपुरम्।

२. संस्कृतशिक्षणम् - सन्तोषमित्तल् - भोपालम्।

## प्राचीनार्वाचीनकाले शान्तिशिक्षा

**स्मिताराणी समाल्**

शिक्षाशास्त्रिद्वितीयवर्षम्

संस्कृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः।

वेदतत्त्वार्थसंजुष्टं लोकालोककरं शिवम्।।

सृष्टिरियं कदा समुत्पन्ना इति निश्चितरूपेण वक्तुं न कोऽपि समर्थः। समेषामास्तिक्यवादिनां मतमिदमस्ति यत् **एकोऽहं बहुस्यां प्रजायै** अर्थात् सृष्टेरारम्भे सर्वादौ भगवान् एकाकी आसीत्। न तु केवलमास्तिक्यवादिनाम् अपि तु सम्पूर्णभारतीयसंस्कृतिः विश्वसिति इदं वाक्यम्। एषा संस्कृतिः न केवलं भारतदेशस्य अपि तु समग्रविश्वस्य मुकुटायमानाऽस्ति। अतः उच्यते -

सत्यम् अहिंसादि गुणैः श्रेष्ठा विश्वबन्धुत्वशिक्षिका।

विश्वशान्ति सुखधात्री भारतीया हि संस्कृतिः।।

भारतस्य विशिष्टता भिन्ना वर्तते, यत् आविश्वे कस्मिन्नपि राष्ट्रे न दृश्यते एतादृशी शान्तिः परन्तु कालानुगुणं पाश्चत्त्यसंस्कृतेः प्रभावेन भारतेऽपि अशान्तिः जायते। कारणानि तु आतङ्कवादः, भ्रष्टाचारः, अत्याचारः, क्षेत्रवादः, भाषावादः, धर्मान्धता, कुसंस्काराः, आर्थिकविषमता, नैतिकमूल्यानां ह्रासः, प्रशासनस्य निष्क्रियत्वञ्चानुभूयते। अनेन ज्ञायते यत् प्रपञ्चे सर्वत्र अशान्तेः अधिकारः, शान्तेर्नामापि न श्रुतिपथमुपयाति।

**का नाम शान्तिः? -** संक्षिप्ततया चित्तप्रसन्नः आत्मसन्तोषः भवत्येव शान्तिः। जनेषु प्रेमभावना - दया - सद्भावना - विश्वबन्धुत्वम् - आत्मनियन्त्रण - सामाजिकन्यायः अहिंसादि गुणानां समाहारः एव शान्तिः। शान्तेः प्राप्तेरनन्तरमेव मानवाः सुखं, वैभवं, शिक्षायाम् उन्नतिं, कलाविकासः, धर्मचर्चा, संस्कृतिसमुदायः, सभ्यतोत्कर्षः, जीविकोपलब्धीनां च अधिकारिणः

भवितुमर्हन्ति, परन्तु अत्र अयं प्रश्नः समागतः यत् कथं शान्तिप्राप्तिः जायते। शान्तिशिक्षा माध्यमेनैव।

**शान्तिशिक्षा -** शान्तिशिक्षा एका प्रक्रिया यस्यां ज्ञानस्य कौशलाभिवृत्तीनां मूल्यानाञ्च संवर्धनेन बाल-युवक-प्रौढेषु चावश्यकव्यवहारं परिवर्त्य वैयक्तिकसामाजिकशान्तिं शारीरिकमानसिक-रूपेण स्थापयितुं शान्तिशिक्षा आवश्यकी। भारते शान्तिविषयकधारणाः संस्कृतवाङ्मये उपलभ्यन्ते।यथा **वेदे शान्तिशिक्षायाः तत्त्वानि -** शान्तिनिमित्तं मङ्गलाचरणं क्रियते यथा -

**ओं वक्रतुण्डमहाकाय सूर्यकोटि समप्रभा।**
**निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।।**

इतोऽपि सम्पूर्णसंसारं शान्तिमयं कर्तुं निगदितमस्ति -

**पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**

पुनः च **सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग्भवेत्।।**

इत्येवं रूपेण वेदेषु शान्तिशिक्षायाः विषये तत्त्वानि प्रोक्तानि।

गीतायां शान्तिशिक्षा – **नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।**
**न चाभावतः शान्तिरशान्तस्य कुतः सुखम्।।**
**श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।**
**विहाय कामान् यः सर्वान् पुमांश्चरति निस्पृहः।**
**निर्ममो निरहङ्कारः स शान्तिमधिगच्छति।।**

इत्येवं सम्पूर्णभगवद्गीतायां शान्तिमेव उपदिशति श्रीकृष्णः अर्जुनाय ।

**योगसूत्रे शान्तिशिक्षा -** सर्वेषु दर्शनेषु शान्तिमेव उपदिश्यते तत्रापि योगदर्शने शान्तिशिक्षा प्रस्ताविता अस्ति। योगदर्शनस्य मुख्याशयः यत् - योगश्चित्तवृत्तिनिरोधः। अर्थात् मनसि शान्तिरावश्यकी। अतः चित्तवृत्तीनां निरोधेन शान्तिं प्राप्नुमः। योगमाध्यमेन चित्ते स्थिरता वर्तते, येन मनः प्रशान्तं भवति।

**इतिहासे शान्तिशिक्षा -** अतीतघटनावल्याः इतिहासेन शान्तिशिक्षा प्रदीयते। यथा – सम्राटशोकः युद्धं त्यक्त्वा सम्पूर्णसंसारे शान्तेः स्थापनम् अकरोत्। तर्हि कथं अशोकस्य मनसि दयाभावना आगता। सः स्वीयपरिवर्तनेन संसारे प्रतिष्ठितः अभवत्।

**संयुक्तताष्ट्रसंघः शान्तिशिक्षा -** १९४५ व्यावहारिकसंवत्सरे संयुक्तराष्ट्रसंघस्य स्थापनाऽभूत्। अन्ताराष्ट्रियशान्तिसम्पादनमेव अस्य मुख्यं कार्यम्। अत्र राजनैतिक - आर्थिक - सामाजिक - सांस्कृतिकसमस्यानां समन्वयनं तदर्थमनेकेषां राष्ट्राणां सहयोगावाप्तये प्रयासश्च मुख्यरूपेण संयुक्तराष्ट्रसंघस्य कार्याणि भवन्ति।

**निष्कर्षः -** शान्तिनिर्माणप्रक्रिया एव शिक्षां प्रेरयति। शान्तिनिर्माणे शैक्षिकतत्त्वानां महत्त्वं सर्वथा अङ्गीक्रियते। मानवानां परमोद्देश्यं शान्तिप्राप्तिः। प्रपञ्चे शान्तिशिक्षा प्रागेव जनान् शिक्षयति स्म इदानीमपि शिक्षयति। परन्तु तादृशीं शिक्षां ग्रहीतुं जनाः योग्याः भवेयुः। अर्थात् मानवाः स्वीयप्रयत्नेन व्यवहारेण च शान्तिं प्राप्तुमर्हन्ति। संसारः शान्तिमयः भविष्यति।

**उपयुक्तग्रन्थसूची :-**

१ .शिक्षायाः दार्शनिकाधाराः - डा. सोमनाथ साहु।

२ . संस्कृतनिबन्धशतकम् – प्रो. सूर्यमणि रथः।

३ . श्रीमद्भगवद्गीता ।

४ .योगसूत्रम्।

## समावेशात्मकशिक्षायां राष्ट्रियशिक्षानीतयः

**जशोदा दास**

शिक्षाशास्त्रिद्वितीयवर्षम्

अक्षमानाम् अथवा दिव्याङ्गानां किमपि भेदभावं विना सामन्यविद्यालयेषु प्रवेशं कल्पयित्वा वैयक्तिकावधानपूर्वकं समवयस्कैः सह शिक्षावकाशानां व्यवस्थापनम् एव समावेशिशिक्षायाः प्रमुखं लक्ष्यं भवति। अर्थात् दिव्याङ्गानां पृथक् विद्यालयेषु अध्यापनं विनैव सामान्यविद्यालयेषु प्रशिक्षितशिक्षकाणां मार्गनिर्देशनेन सर्वाङ्गीणविकासाय यत्नः क्रियेत। विद्यालये शैक्षिक – शारीरिक - सामाजिक - भावनात्मक - व्यावसायिककार्यक्रमेषु सर्वेभ्यः समानाः अवसराः भवेयुः।

**समावेशीशिक्षायाः महत्त्वम् -** विशिष्टबालकानां ज्ञानं वर्धयति। चिन्तनशक्तिं च वर्धयति। शिक्षायां समानावसरं कल्पयति। विशिष्टानां बालकानाम् अन्तर्निहितप्रतिभायाः परिप्रकाशनं कारयति। बालकानामुपरि व्यक्तिगतावधानं यच्छति। सांविधानकोत्तरदायित्वानां निर्वहणम्। सामाजिकसभ्यतायाः प्राप्तिः। साम्प्रतं विद्यमानपरिस्थितिषु छात्रेषु तथा शिक्षकेषु च विकासानयनम्।

**अक्षमबालकानां शैक्षिकावसराः -** अन्ध-मूक-बधिरादिविकृताङ्गविशिष्टाः बालकाः भिन्नक्षमाः भवन्ति। एतेषं शैक्षिकविकासाय निम्नाङ्कितव्यवस्थाः करणीयाः भवन्ति।

अ). शारीरिकमानसिकरूपेण अक्षमानां कृते समानशिक्षाव्यवस्था कल्पनीया।

आ). सामान्यरूपेण अक्षमानां शिक्षा सामान्यविद्यालयेषु भवेत्।

इ). अन्धमूकबधिराणां कृते विशेषविद्यालयव्यवस्था अपेक्षिता।

ई). विकलाङ्गच्छात्राणां कृते सावासिकविद्यालयेषु शिक्षाव्यावस्था भवेत्।

उ). विद्यालयेषु नामाङ्कने, नियुक्तिक्षेत्रे च स्थानसंरक्षणस्य व्यवस्था कार्या भवति।

ऊ). भिन्नक्षमानां छात्राणामावश्यकतानुगुणं चिकित्सासौविध्यं शिक्षणोपकरणानि तथा अन्यानि साधनानि प्रदातव्यानि।

ए). अधिगमप्रक्रियां सुदृढीकर्तुं विशिष्टप्रशिक्षितशिक्षकाणां नियुक्तिः करणीया भवति।

ऐ). विभिन्नक्षमच्छात्राणां कक्ष्यां, प्रयोगशालां, पुस्तकालयञ्च प्राप्तुं सर्वकारपक्षतः स्वतन्त्रव्यवस्था कर्तव्या भवति।

**राष्ट्रियशिक्षानीतयः -** कोठारि-आयोगेन २९ जून् १९६६ तमे वर्षे प्रतिवेदनं दत्तं यत् शिक्षायाः स्वरूपं गुणात्मकं विकासात्मकं च भवेत्। अतः भारतसर्वकारेण ५ अप्रैल् १९६७ तमे वर्षे ५ सदस्यानाम् समितिः आरचिता। २४ जुलै १९६८ तमे वर्षे शिक्षानीतेः उद्घोषणा संजाता। शिक्षानीतौ शिक्षायाः सर्वे अपि महत्त्वपूर्णाः पक्षाः, सिद्धान्तादयः आधारिताः भवन्ति। यथा - निश्शुल्कप्राथमिकशिक्षा, शैक्षिकावसराणां समानता, समानविद्यालयीया शिक्षाप्रणाली इति।

**राष्ट्रियशिक्षानीतिः १९६८ -** अस्याः शिक्षानीतेः मुख्यम् उद्देश्यमासीत्। जीवने समन्वयनं समायोजनं वा। बाधितबालकानां विकासाय प्रत्येकं मानवानाम् उत्तरदायित्वं बाधितबालकानाम् आत्मविश्वासस्य दृढीकरणम् इति। विशिष्टशिक्षाक्षेत्रात् वाञ्छितानां विषये विशेषावधानं भवेत् इति। अस्याः नीतेः आशयः। यथा –

१. शिक्षाक्षेत्रे चलनवैकल्यानां किञ्चित् मानसिकवैकल्यबालानां यावत् शक्यम् अन्तःप्रेरणा आनेतव्या भवति।

२. असमर्थेभ्यः वृत्तिप्रशिक्षणाय योग्यव्यवस्था करणीया।

३.अक्षमच्छात्राणां समस्याः परिष्कर्तुं प्राथमिकविद्यालयाध्यापकेभ्यः शैक्षिकप्रशिक्षणकार्यक्रमस्य पुनः संरचना करणीया ।

४. अक्षमानां बालानां विकासाय कार्यरतसेवासंस्थाभ्यः सर्वकारः सर्वविधसाहाय्यं कुर्यात्।

**राष्ट्रियशिक्षानीतिः २००६ -** नीतिरियं समाजस्य मुख्यधारायाम् अक्षमान् अन्तर्भावयितुं प्रयत्नं विदधाति। वैकल्यानां निवारणं, पुनरावासश्च अस्याः मुख्यलक्ष्यौ स्तः। अक्षमबालानां अक्षममहिलानाञ्च सामाजिकार्थिकशक्तीकरणे शिक्षामहत्त्वपूर्णा भूमिका भवति। तदर्थं सर्वशिक्षाभियानस्य क्षमतोन्नयनकक्ष्याः उपकुर्वन्ति। ताः यथा -

१. सर्वेक्षणपद्धत्या अक्षमान् अभिज्ञाय योग्यविद्यालयेषु तेषां प्रवेशः करणीयः।

२. प्राविधिकविकासमवलम्ब्य विशिष्टविद्यालयानां स्थापनम्।

३. प्रत्येकं राज्ये आदर्शसम्मिलितविद्यालयानां स्थापनम्।

४. अक्षमनां परीक्षाप्रणाल्याः परिवर्तनं कुर्यात्। यथा - तेभ्यः अतिरिक्तसमयः, लेखने सहायकाः, विविधगणितपेटिकाः इत्यादीनां व्यवस्थाकरणम्।

५. विश्वविद्यालयेषु प्राविधिकसंस्थासु उच्चाधिगमसंस्थासु अक्षमानां प्रवेशाय विशेषव्यवस्थां कुर्यात्।

६. अक्षमेभ्यः शैक्षिकक्रीडनकानि, पुस्तकानि, योग्यतन्त्रांशः इत्यादि व्यवस्था करणीया भवति।

# बौद्धशिक्षा

**भाग्यश्री मण्डल्**
शिक्षाशास्त्रिद्वितीयवर्षम्

संसारेऽस्मिन् लोककल्याणाय सर्वदा महापुरुषाः भवन्ति। जनानां दुःखं दूरीकृत्य समाजस्य पुनर्निर्माणाय ते प्रयासं कुर्वन्ति। तेषु गौतमबुद्धः अन्यतमः भवति। तस्य ५६३ तमे ख्रीष्टाब्दे लुम्बिन्याः निकटस्थ कपिलवस्तु नामक ग्रामे जन्म अभवत्। तस्य माता मायादेवी, पिता शुद्धोदनः च आसीत्। गौतमबुद्धः बौद्धधर्मस्य प्रवर्तकः आसीत्। मूलतः बौद्धशिक्षा धर्मप्रधाना आसीत्।

**बौद्धशिक्षायाः उद्देश्यानि** - बुद्धेन मानवजीवनस्य प्रमुखं लक्ष्यं निर्वाणप्राप्तिरिति स्वीकृतम्। एतल्लक्ष्यं प्राप्तुं बौद्धशिक्षायाः निम्नलिखितानि उद्देश्यानि निरूपितानि सन्ति। यथा - ज्ञानार्जनम्, धर्मप्रचारः, सदाचरणम्, सामाजिकविकासः च इति प्रमुखानि उद्देश्यानि बौद्धशिक्षायाम् आसन्।

**पाठ्यक्रमः** - बौद्धशिक्षायां शिक्षायाः स्तरद्वयं भवति स्म - प्राथमिकस्तरः उच्चस्तरश्च। प्राथमिकस्तरे सिद्धान्तः इत्याख्यस्य पुस्तकस्य ज्ञानं षड्वर्षपर्यन्तं छात्रेभ्यः दीयते स्म। अत्र छात्राः पञ्चविद्यानामध्ययनं कुर्वन्ति स्म। यथा शब्दविद्या, शिल्पस्थानविद्या, चिकित्साविद्या, हेतुविद्या, अध्यात्मविद्या चेति। उच्चस्तरे पाठ्यक्रमः द्विविधः आसीत् - धर्मिकः लौकिकश्च भवति। अत्र धार्मिकपाठ्यक्रमः भिक्षूणां, भिक्षुणीनाञ्च कृते निर्धारितः आसीत्। लौकिकपाठ्यक्रमस्तु सामान्यजनानां कृते आसीत्। अस्मिन् पाठ्यक्रमे व्याकरणं, धर्मः, ज्योतिषं, दर्शनं, साहित्यं, खगोलशास्त्रम्, नक्षत्रविज्ञानं, चिकित्साशास्त्रम् इत्यादयः विषयाः सम्मिलिताः आसन्।

**बौद्धशिक्षणपद्धतिः** - बौद्धशिक्षणसंस्थासु पठनपाठनाय प्रत्युक्ताः विधयः आसन्। यथा – व्याख्यनविधिः, प्रश्नोत्तरविधिः, पर्यटनविधिः, शास्त्रार्थविधिः इत्यादयः विधयः बौद्धशिक्षायाम् उपयुक्ताः आसन्।

**बौद्धशिक्षाकेन्द्राणि** - बौद्धकाले सुसङ्घटितानि एतादृशानि बहूनि शिक्षणकेन्द्राणि स्थापितानि आसन्। तेषु कानिचन अन्ताराष्ट्रियख्यातिसम्पन्नानि केन्द्राणि भारतीयधर्मस्य संस्कृतेः च प्रसारं कृतवन्तः। एतेषु केन्द्रेषु न केवलं धार्मिकशिक्षा अपि तु लौकिकशिक्षा दीयते स्म। एतेषां केन्द्राणां शिक्षापद्धत्या प्रभाविताः भूत्वा तिब्बत् - चीना - जपान् - कोरियादिभ्यः सुदूरेभ्यः

देशेभ्य: छात्रा: अध्ययनार्थं भारतमागतवन्त:। एतेषु शिक्षणकेन्द्रेषु तक्षशिला, नालन्दा, वल्लभी, विक्रमशिला च प्रमुखा: आसन्।

**बौद्धकालीनशिक्षाया: गुणा: -**

१. बौद्धशिक्षा मुख्यत: धर्मप्रधाना आसीत्।

२. जाति-धर्म-वर्णनिर्विशेषेण सर्वेषां कृते शिक्षाया: अधिकार: आसीत्।

३. समाजस्थ सामान्यजनानां कृते बौद्धशिक्षाव्यवस्था प्रचलिता आसीत्।

४. गुरुशिष्ययो: सम्बन्ध: उत्तम: आसीत्।

**दोषा: -**

१. बौद्धशिक्षायां निम्नलिखिता: दोषा: अपि परिलक्ष्यन्ते स्म।

२. धर्मप्रचार एव शिक्षाया: संकुचितमुद्देश्यम् आसीत्।

३. जीवनस्य भौतिकावश्यकतां प्रति महत्त्वं न दीयते स्म।

४. व्यावसायिकशिक्षाया: समुचितविकास: नाभवत्।

५. बालानां विकासाय समुपयुक्तविधीनां प्रयोग: न क्रियते स्म।

**सहायकग्रन्था: -**

१. शिक्षाया: दार्शनिकसामजिकाधारा: - डा. प्रेमसिंहसिकरवार:।

२. भारते शिक्षाप्रणाल्या: विकास: - डा. वृन्दावनपात्र:।

३. पुरातनी शिक्षा - डा. लोकमान्यमिश्र:।

## वैदिकयुगे नारीशिक्षा

**सुनीता पात्र**

शिक्षाशास्त्रिद्वितीयवर्षम्

भारतीयवाङ्मये यावन्ति शास्त्राणि दरीदृश्यन्ते तेषां सर्वेषां मूलं भवति वेद:। स च वेद: भगवत: परं ब्रह्मण: नि:श्वासभूत: अपौरुषेयश्च विद्यते। अयं वेद: ज्ञानराशि: सर्वज्ञानमय: सर्वस्मै युक्तश्च परिप्रकाशितास्ति। समग्रपृथिव्यां यावन्त: विषया: उद्भासन्ते तेषां सर्वेषां विषयाणां समुल्लेखा: वेदे विराजन्ते। भगवत: प्रापञ्चिकेऽस्मिन् जगतीतले नारी भवति अपूर्वसृष्टि:। सा जाया, जननी, भगिनीरूपेण पूजिताऽस्ति। अत: धर्मशास्त्रे श्लोकोऽयं वर्तते यत् - **यत्र नार्यस्तु**

**पूज्यन्ते रमन्ते तत्र देवता:**। समाजस्य प्रगत्यर्थं नारीशिक्षा भवेत्। शिक्षिता संस्कृता च नारी समाजमग्रे नयति। अत: नारीशिक्षाविषये अत्र प्रबन्धे उपस्थाप्यते।

**वैदिकयुगीयशिक्षा -** वैदिकयुग: भारतीयसभ्यताया: आरम्भात् बुद्धजन्मपर्यन्तमिति मन्यते विद्वद्भि:। वैदिकसाहित्येऽस्मिन् वेदै: सह वेदाङ्गानि उपनिषदश्च सर्वे समायान्ति। शिक्षा नाम सनातनी परम्परा वर्तते भारतदेशे। शिक्षाया: सम्बन्ध: वैज्ञानिकसिद्धान्तै: समाश्रित: आसीत्। ब्राह्मण - क्षत्रिय - वैश्य - शूद्रा: इति चत्वारो वर्णा: ब्रह्मणा सृष्टा:। एतेषां निर्धारणं सोद्देश्यमासीत्। ब्राह्मणा: स्वजीवनं विद्यार्थम् एव अर्पितवन्त:। एतस्यामेव प्रक्रियायां कालानां विज्ञानस्य च विकासो जात:। क्षत्रियास्तु स्वजीवनं युद्धस्य कृते विजयायैवर्पितवन्त:। ते शासनकार्यस्य वोढार: आसन्। वैश्यानां जीवनं व्यापारार्थमासीत्। ब्राह्मणक्षत्रियवैश्यानां सेवा एव शूद्राणां परमो धर्म असीत् इति। महर्षिगौतमेन आश्रमव्यवस्था चतुर्धा विभक्ता । तद्यथा - विद्यार्थी, गृहस्थ:, भिक्षु:, वैखानसश्चेति। एतेषु आश्रमेषु विद्यार्थी शिक्षाया: मूलाधार: आसीत्। वैदिककालिका: प्राचीनतमा: शिक्षणसंस्था: प्रधाना: आसन्। अत: शिक्षानिमित्तं बहुशिक्षणसंस्था: अपि आसन्। शिक्षणसंस्थासु तक्षशिला, नलन्दादि प्रमुखविश्वविद्यालया: आसन्। अत: वैदिककालिकशिक्षाव्यवस्थाया: मूलोद्देश्यमासीत् मोक्षप्राप्ति:। सर्वेभ्य: मोक्षप्रात्यर्थं शिक्षाऽनिवार्या आसीत्।

**वैदिकयुगे नारीशिक्षा -** शिक्षा सर्वेषां समानाधिकार: वर्तते। एकेन चक्रेण विना यया रथस्य गति: न भवति तथैव नारी यदि शिक्षिता न भवति तर्हि संसाररथस्य गति: अपि न भवति। शास्त्रादिषु स्मृत्यादिषु च नारीणां गरिमा सविस्तृतो वर्तते। बालस्य प्राथमिकगुरु: स्वस्य माता भवति। तस्या: संरक्षणे शिशु: कदापि मूर्ख: न भवति। तदर्थं स्त्रीणां कृते शिक्षादाानं सदा अपेक्षते। अत: संस्कृते लिखितमस्ति यत् - नास्ति विद्यासमं चक्षु: नास्ति मातु: समो गुरु:।

नारीशिक्षाया: विषये वैदिकयुगे पृथग्रूपेण शिक्षासंस्थाया: समुल्लेखो न प्राप्यते। तदानीं स्त्रिय: अध्ययनरता: अध्यापनकर्मण्यपि रता आसन् इति विवरणं तत्र तत्र प्राप्यते। तत्र उपाध्याया: इति प्रयोग: अध्यापनकर्मणि रतानां स्त्रीणां कृते वर्तते। उपाध्यायस्य पत्न्या: कृते तु उपाध्यायी , उपाध्याया इति च प्रयोग: आसीत्। यद्यपि वैदिकयुगे मैत्रेयी-गार्गी-विश्ववारा इत्येतासाम् उच्चशिक्षितानां नारीणां समुल्लेखो विवरणञ्च प्राप्यते, तथापि तत्वक्तुमसौकर्यं

प्रतिभाति यत्तासां कृते पृथक्तया शिक्षणम् आयोज्यते स्म इति। तास्तु छात्रैः साकमध्ययनं कुर्वन्ति स्म। भवभूतेः उत्तररामचरिते वाल्मीकेराश्रमे आत्रेयी छात्रैः सह अध्ययनं कृतवती इति। तथा च भवभूतेः एव मालतीमाधवनाटके कामन्दकी गुरुकुले अधीतवती इति चोल्लेखो वर्तते। प्रायः गुरोः, पत्नी कन्या च गुरुकुले वासहेतोस्तत्राध्ययनावसरं प्राप्नुवन्ति स्म।

पुराणेषु कहोदसुजातयोः कथा अपि नारीणां बालकैः सह शिक्षणं सूचयति। कन्याः स्त्रियः वा गृहे एव स्थित्वा गुरुजनेभ्यः पितृभ्यां वा शिक्षां प्राप्तवत्यः। मातृपक्षे श्वसुरपक्षे च अनेके गुरवः आसन् नारीणाम् इति। तद्यथा -

उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः।
मातुलः श्वसुरस्त्राता मातामहपितामहौ।
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरुवः स्त्रियः।
इत्युक्तो गुरुवर्गोऽयं पितृतः मातृतः द्विधा।।

**निष्कर्षः** - वैदिकयुगे नारीणां कृते तथा शिक्षाव्यवस्था नासीत् चेदपि लोपामुद्रा, गार्गी, अनसूया च इत्यादि नार्यः शिक्षां प्राप्य स्वजीवने अग्रे गतवत्यः। अतः अधुनातनसमाजेऽपि तासां सदृशीनां नारीणां शिक्षाजीवनविषये पठित्वा ज्ञात्वा च नार्यः शिक्षां प्रति प्रेरिताः भवेयुः।

परिशीलितग्रन्थाः - पुरातनीशिक्षा - लोकमान्यमिश्रः - लखनऊ।

## जनतन्त्रीयमूल्यानि

**स्वागतिका दास**
शिक्षाशास्त्रिद्वितीयवर्षम्

**उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।**
**वर्षं तद् भारतं नाम भारती यत्र सन्ततिः।।**

भारतेऽस्मिन् गणतान्त्रिकराष्ट्रे अनेकधर्माणाम् अनेकभाषाणां विविधवर्गाणां जातीनाञ्च समष्टिः अवलोक्यते। बहुष्वपि धर्मभेदेषु, बहुविधेष्वपि जातिभेदेषु राष्ट्रियता एव सर्वेषां भारतीयानां परिचयः भवेत्। सङ्कीर्णस्वार्थं परित्यज्य सामाजिकहिताय सर्वोऽपि नागरिकः प्रयतेत। स्वीयं क्षेत्रं वर्गं च विहाय जातीयविचारेषु आत्मनः योगदानं राष्ट्रियैकता इति उच्यते।

**राष्ट्रियैकतासुरक्षायै अवरोधाः** -१.जातिवादः २.सम्प्रदायः ३. प्रान्तीयता ४. राजनैतिकदलम्; ४. विभिन्नभाषाः ५. सामजिकभिन्नता ६. आर्थिकविभिन्नता ७. नेतृत्वाभावः, राष्टियैकतायाः सुरक्षायै भावात्मकसमाकलनसमितेः अनुमोदनम्:-

१. पाठ्यक्रमस्य पुनर्घटनम्।

२. पाठ्यसहगामिक्रियाणां पाठ्यक्रमे नियोजनम्।

३. राष्ट्रियभाषायाः लिपीनाञ्च ज्ञानम्।

४. विद्यालयेषु, महाविद्यालयेषु च छात्राणां समवस्त्रधारणम्।

**राष्ट्रियैकतायाः सुरक्षायै शिक्षाऽऽयोगेन प्रदत्तः प्रस्तावः** - १९६४-६६ तमे वर्षे सामाजिकं तथा राष्टियैकतायाः सुरक्षार्थं शिक्षाऽऽयोगेन प्रदत्ताः केचन प्रस्तावाः -

१. राष्ट्रियशैक्षिकोद्देश्यस्य पूर्तये सामान्यविद्यालयप्रणाली सार्वजनिकी भवेत्।

२. शिक्षायाः प्रत्येकस्मिन् स्तरे सामाजिकम् एवं राष्ट्रियसेवाशिक्षा अनिवार्या भवेत्।

३. प्रत्येकं शिक्षासंस्थायां सामाजिकं सामुदायिकञ्च सेवाकार्यक्रमाणाम् आयोजनं करणीयम्।

४. उच्चमाध्यमिकस्तरपर्यन्तं एन् सि. सि. कार्यक्रमः ६० दिनानि यावत् चालयेत्।

५. राष्ट्रचेतनाभावनायाः विकासः विद्यालयशिक्षायाः महत्त्वपूर्णमुद्देश्यं भवेत्।

**राष्ट्रियैकतायाः विकासार्थं शिक्षायाः भूमिका -**

१. प्रत्येकम् अध्यापकः स्वपाठ्यमानवषियादतिरिच्य संस्कृतिं परम्परां च जानीयात्।

२. पाठनवेलायां साम्प्रदायिकभावनात्मकोदाहरणानि न देयानि।

३. भावात्मकैकतायाः विकासाय विशेषचर्चा आवश्यकी।

४. पाठ्यक्रमे ईर्ष्यात्मकविषयाः न भवेयुः।

५. छात्रेभ्यः संवेगात्मकशिक्षा, शोधशिक्षा च प्रदेया।

६. छात्रेषु राष्ट्रियभावनायाः विकासाय, विद्यालयवार्षिकोत्सवे देशभक्तिप्रदर्शनं भवेत्।

**धर्मनिरपेक्षता -** धर्मनिरपेक्षवादेन धार्मिकसिद्धान्तं विहाय राजनैतिकसामाजिकावधारणायाः च ज्ञानं भवति। धर्मनिरपेक्षेण साकं धर्मस्य न कोऽपि सम्बन्धः परिलक्ष्यते परन्तु धर्मनिरपेक्षः धर्मस्य कश्चन गतिशीलपक्षः भवति।

संविधानप्रणयनसभायाः सदस्यः श्री हरिविष्णुकामत्महोदयेन संविधानसभायां कथितम् – एकः धर्मनिरपेक्षदेशः न हि ईश्वररहितः न वा अधर्मीदेशः न च धर्मविरोधिदेशः भवति।

जवहरलालनेहरूमहोदयानुसारेण धर्मनिरपेक्षता नाम धर्मात्मयोः स्वतन्त्रता एव यस्यार्थः सामाजिक एवं राजनैतिकसमानता च इति।

- भारतीयसंविधानस्य २८ विधिना सर्वकारीयविद्यालयेषु धार्मिकशिक्षा निषिद्धा वर्तते।
- संविधानस्य २५ विधिना स्वधर्मस्य प्रचाराय प्रसाराय च सर्वोऽपि जनः स्वतन्त्रः इति च वर्णितम्।

**वैश्वीकरणम् -** वैश्वीकरणस्य प्रयोगेण समग्रं विश्वमेकस्मिन्नैव रज्जौ आबद्धः, देशयोर्मध्ये व्यावसायिकं सहयोगं संवर्धयितुं स्वीकृतनियमानां परिपालनार्थं, विभिन्नवस्तूनां साधनानाञ्च उत्पादनार्थं नूतनप्रविधीनाञ्च उपयोग एव वैश्वीकरणस्य अर्थः भवति।

शिक्षायाः उपरि वैश्वीकरणस्य प्रभावः :-

१. शिक्षा सर्वदा स्वसंस्कृतेः परम्परानुगुणञ्च प्रवर्तिता भवति। परन्तु वैश्वीकरणेन बाह्यसंस्कृतेः प्रवेशः जायते।
२. छात्राणां मनः विश्वोन्मुखी भवति।
३. भारतीयशिक्षाप्रणाली स्वल्पव्ययसाधिका, वैश्वीकरणस्य प्रभावेण शिक्षा व्ययसाध्या भवति।
४. भारते छात्राध्यापकयोः य आदर्शसम्बन्धः प्राचीनकालात् प्रचलन्नासीत् सः सम्बन्धः नश्यति।
५. छात्राः पुरातनतां विस्मरन्ति, केवलमाधुनिकतायाः अनुकरणं कुर्वन्त्येव।
६. वैश्वीकरणाधारिता शिक्षाप्रणाली केवलमार्थिकं भौतिकं च विकाससाधनक्षमा, न तु अध्यात्मिकविकासे उपकारिका भवति।

**परिशीलितग्रन्थाः -** मूल्यशिक्षा - लक्ष्मीधरपण्डा - पुरी - ओडिशा।
नैतिकमूल्यशिक्षा - राजेन्द्रशर्मा ।

## मुस्लिमशिक्षा

**सौभाग्यमञ्जरी साहु**

शिक्षाशास्त्रिद्वितीयवर्षम्

क्रिस्तोः पूर्वम् अष्टमशतकात् क्रिस्तोः परं सप्तमशतकं यावत् मध्यकालिकशिक्षायाः कालः इति मन्यते। अयं कालः अन्धकारयुगमित्यपि इतिहासकारैः कथ्यते। अस्मिन् काले भारतदेशे न कापि विशिष्टा प्रगतिः परिदृष्टा इत्यतः अयं कालखण्डः अन्धकारयुगः इति नाम्ना अपि सम्बोध्यते। मुस्लिम् तन्नाम यवनाधिपाः देशेऽस्मिन् स्वधर्मस्य संस्कृतेश्च बलात् प्रचारमकुर्वन्। किञ्च मुस्लिं धर्माधारितशैक्षिकप्रणाल्याः विकासः इमे अकुर्वन्। हजरत् मोहम्मद् वर्यः इस्लामधर्मस्य प्रतिष्टापकः वर्तते। अयं भगवद्धूतः इति कथ्यते। मुस्लिम्जनानां पवित्रग्रन्थः कुरान् वर्तते।

अष्टमशतकादाराभ्य एतेषाम् आक्रमणं भारतदेशे सञ्जातम्। द्विनवत्युत्तरेकादशशतके (११९२) मोहम्मद्घोरिनामकः मदरसा इत्यस्याः उच्चशैक्षिकसंस्थायाः आरम्भमकरोत्। एवं भारते मदरसामुखेन यौवनानाम् औपचारिकशिक्षणस्य आरम्भः जातः। मकतब् एतेषां प्राथमिकशिक्षाकेन्द्रम् आसीत्। १७५७ तमे वर्षे पालीयुद्धं समभवत्। तत्र लार्डक्लैव महोदयस्य विजयः अभवत्। तावत्पर्यन्तमपि भारते यवनानामेव प्रभावः आसीत्।

**शिक्षा** - यवनशासकस्य अकबर्वर्यस्य कार्यकाले यवनशिक्षायाः प्रचारः आधिक्येन जातः। अकबरः सर्वाधिकप्रचारं कृतवान् - आग्रा, फतेपूर्सिक्री गुजरात्राज्यस्य विभिन्नेषु क्षेत्रेषु शैक्षककेन्द्राणि प्रतिष्ठापयामास। अकबर्वर्यस्य शासनकाले पाठ्यक्रमः नम्यः आसीत्। पुनः औरङ्गजेबस्य कार्यकाले (१९५८) पाठ्यक्रमः अत्यन्तः कठोरः आसीत्। अयं हैन्दवान् षियामतीयान् च सर्वतोभावेन तिरस्कृतवान्। स्त्रीशिक्षायाः अवहेलनापि सर्वतोभावेन कृता। फारसीभाषा शिक्षायाः माध्यममासीत्। राजनैतिकस्थिरतायाः प्रभावः शिक्षायाः उपरि अभवत् इत्यतः अस्मिन् सन्दर्भे शैक्षिकप्रगतिः कुण्टिता अभवत्।

यौवनानां शिक्षणविधिः मौखिकः आसीत्। अध्यापकः व्याख्याविधिना प्रवचनमाध्यमेन शिक्षां यच्छन्ति स्म। धार्मिकशिक्षायाः महत्त्वम् आसीत्। कुरान् इत्यस्य सूफीसिद्धान्तानाम् अध्यापनं इस्लाम् इतिहासस्य न्यायशास्त्रस्य च अध्ययनं पाठ्यक्रमे परिदृश्यते स्म। आग्रा, लाहोर्, मुल्तान्, अज्मेर्, लखनऊ, षियाल्कोट् इत्येतेषु प्रदेशेषु यौवनानाम् उच्चशिक्षा केन्द्राणि

यानि आसन् तानि अत्यन्तं प्रसिद्धानि आसन्। केवलम् उच्चपरिवारीय बालिका: एव विद्यां प्राप्तुं शक्नुवन्ति स्म।

**मुस्लिमशिक्षाया: उद्देश्यानि -** भारते मुस्लिमशासका: आदौ आक्रान्ता: भूत्वा शासनं कृतवन्त:। स्वबलेन ते अत्र साम्राज्यं स्थापितवन्त:। तेषां शिक्षाव्यवस्था अपि तद्देशीया एवासीत्। मुस्लिम्शिक्षाया: उद्देश्यानि परम्परात: किञ्चित् पृथगेव वर्तन्ते । तद्यथा -

१. ज्ञानस्य प्रचार:। २. इस्लामधर्मस्य प्रचार:। ३.मुस्लिमसंस्कृते: प्रसार:। ४. धार्मिकताया: समावेश:। ५. चरित्रनिर्माणम्। ६. सांसारिकैश्वर्यप्राप्ति:। ७. श्रेष्ठत्वाख्यापनम्। ८. भौतिकोन्नति:।

**निष्कर्ष: -** इस्लामधर्मस्य प्रचार: प्रसार: मुस्लिम् शिक्षाया: मुख्योद्देश्यमासीत् । तद्वारा ज्ञानस्य प्रचार:, मुस्लिमसंस्कृते: प्रचार:, प्रसार: अधिकतया जात:।

**उपयुक्तग्रन्थसूची -** पुरातनीशिक्षा - लोकमान्यमिश्र: - लखनऊ।
शिक्षाया: दार्शनिकसामाजिकाधारा: - सोमनाथसाहु:।

## स्वामिविवेकानन्दस्य मते शिक्षा

**मायाकृष्णन्**
शिक्षाशास्त्रिद्वितीयवर्षम्

सन्ति बहवो भारतस्य वीरपुत्राः तेषु अविस्मरणीयो स्वामिविवेकानन्दः। सः विश्वधर्मसम्मेलने भारतीयसंस्कृतेः उपादेयतां श्रेष्ठतां च प्रादर्शयत्। वङ्गप्रान्तस्थ कोलकातानगरे 1863 तमे वर्षे जनवरीमासस्य द्वादशे दिनाङ्के जन्म अभवत्। अस्य पिता श्रीविश्वनाथदत्तः आसीत्। बाल्यादेव अयम् उत्साही, हासप्रियः, करुणापरः चासीत्। अयं बाल्ये कपीन्, मयूरान् च पालयति स्म। अध्ययनपटुरयं नरेन्द्रः शास्त्रीयसंगीतस्य अभ्यासं करोति स्म। प्रतिदिनं व्यायाम - ध्यानादयः अस्य आबाल्यात् प्रवृत्तयः आसन्।

श्रीरामकृष्णपरमहंसः एव एतस्य गुरुः। श्रीरामकृष्णपरमहंसस्य शिष्येषु अग्रगण्यः आसीत् अयं महात्मा । स्वगुरोः विचाराणां प्रचाराय कालान्तरे सः श्रीरामकृष्णमठमस्थापयत्। 1893 तमे वर्षे अमेरिकादेशस्य शिकागोनगरे प्रवृत्ते सर्वधर्मसम्मेलने स्वभाषणेन सर्वानपि आनन्दयन्। तेन सः विख्यातः अभवत् । अस्य जीवने सिद्धान्तेषु च आकृष्टाः बहवः वैदेशिकाः अपि तस्य शिष्याः अभवन्। तेषु प्रमुखा आसीत् भगिनीनिवेदिता इति । पश्चात् विख्याता मार्गटनोबिलमहाभागा ।

'उत्तिष्ठत जाग्रत प्राप्यवरान्निबोधत' इत्यादिभिः उपनिषद्वाक्यैः स्वामिविवेकानन्दः युवकान् प्राबोधयत्। भारतस्वातन्त्र्यान्दोलनस्य प्रेरकः आसीदयं महात्मा। स्वीयजीवितदौत्यं समाप्य 1902 तमे वर्षे जुलैमासस्य चतुर्थे दिनाङ्के ब्रह्मभूयङ्गतः। भारतसर्वकारः अस्य जन्मदिनं देशीयुवजनदिनत्वेन समाचरति।

**शिक्षायाः तात्पर्यम् -** एतेषां मते मानवेषु अन्तर्निहितायाः दैवीशक्तेः बहिरानयनम्। तस्य इदं तात्पर्यं भवति यत् शिक्षा नाम मानवेषु विद्यमानमेव एतत् बाह्यतः सम्पादयितुं शक्यते। सर्वमपि विज्ञानम् आध्यात्मिकं वा भौतिकं वा तत् सर्वं मानवमस्तिष्केषु विद्यते, यत् अलङ्करणस्य निर्वारणमेव शिक्षायाः कार्यम् इति। एतादृशं ज्ञानं पारमार्थिकज्ञानस्य अंशत्वे अस्ति। तस्मादेव अस्माभिः उच्यते 'अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया, चक्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः'। एवं मानवमस्तिष्केषु विद्यमानस्य ज्ञानस्य बहिरानयनमेव अध्यापकस्य कार्यम्।

**शिक्षायाः उद्देश्यम् -** आत्यन्तिकम् उद्देश्यं एतदेव भवति यत् मोक्षोपायसम्पादनम्। परमात्मनः प्राप्तिरेव शिक्षायाः उद्देश्यमिति आत्यन्तिकम् उद्देश्यं प्रतिपाद्य तेन उच्यते यत् छात्रान्तःस्थितानां सम्पूर्णतासम्पादनम्।

**पाठ्यपद्धतिः -** पद्धतिविषये अयं वेदान्ती इति न केवलं वेदान्तविषयाः अपि तु आधुनिकविषयाणामपि पठनम् अत्यन्तमावश्यकमिति। वेदानामध्ययनेन साकमेव आधुनिकवैज्ञानिकविषयाणामपि अध्ययनम् अवश्यमेव कर्तव्यम्। एवम्भूते विविधविषयाणां पठनेन साकं तुलनात्मकाध्ययनकौशलमपि वर्धयित्वा तुलनात्मकानि अध्ययनानि कर्तव्यानि एवेति।

**अध्यापनम् -** अध्यापनस्य विधिविषयेपि तेन व्याख्यानविधेः प्रस्तावः कृतः। अध्यापकेन स्वानुभवानाम् आधारेण यज्ज्ञानं मानसिकशक्त्या तज्ज्ञानस्य सम्वर्धनमपि शिक्षाद्वारा उत्तमं भवितुमर्हति।

**स्त्रीशिक्षा -** स्त्रीणां पुरोगतिं विना राष्ट्रस्य पुरोगतिः कथं शक्यते इति अस्य चिन्तनम्। समाजे विद्यमानानां सर्वेषां पूर्णतासम्पादनाय स्त्रीशिक्षा अत्यन्तम् आवश्यकी इति। विद्यालयेषु स्त्रीणां कृते विशिष्टविषयाणां शिक्षणम् इति तेन निर्दिष्टम्।

**उपसंहारः -** आधुनिककाले आधुनिकजनानां कृते पाश्चात्यशिक्षा अवश्यं भवेत्। आधुनिकविज्ञानस्य सम्मार्जनं विना शिक्षा कदापि पूर्णा नैव भवति इति तस्य आशयः। सर्वदा शिक्षायाः प्रथमम् उद्देश्यं सच्चारित्र्यनिर्माणम् इति तेनोक्तम्। स्वभावपरिवर्तनं न साधयति चेत् शिक्षा असमीचीना भवति। जातिव्यवस्थायाः निवारणे सफला भवितुमर्हति शिक्षा इति तस्य मतम्।

# संस्कृतमाध्यमेन संस्कृतशिक्षणम्

**निव्या बाबू**

शिक्षाशास्त्रिद्वितीयवर्षम्

भाष्यते व्यवहारादिषु प्रयुज्यते इति भाषा, भाष् व्यक्तायां वाचि इति धातोः निष्पन्नः अयं शब्दः। मानवः स्वमनसि विद्यमानाः आलोचनाः भावनाः अनुभूतयश्च सार्थकध्वनिभिः संकेतैः, अर्थयुक्तैः लिखितसंकेतैश्च व्यक्तीकरोति । भाषाणामभिप्रायप्रकटसाधनं वस्तुतः लोके द्वयोर्मनुष्ययोर्मध्ये परस्परम् अवगाहनाय, भावग्रहणाय, भावविनिमयाय च भाषां विना नान्यत् साधनमस्ति । भाषणाद् हि भाषा व्यक्तवाग्रूपेण यस्याः अभिव्यक्तिः क्रियते सा भाषेति । ध्वन्यात्मकशब्दैः विचाराणां प्रकटीकरणमेव भाषा । भाषयैव मानवः मानवेति परिगण्यते । भाष्यते अनया इति सा भाषा, व्यक्तवाचं समुचारेणेति पाणिनिसूत्रमपि दृढ़ीकरोति । लोके बह्व्यः भाषाः सन्ति तासु संस्कृतभाषा अतिप्राचीना समृद्धा च, अस्यां ऋग्यजुस्सामाथर्वाणाः इति चत्वारो वेदाः, शिक्षा-व्याकरणं-निरुक्तं-ज्योतिषं-छन्दः-कल्पश्चेति षडङ्गानि, चतुर्दशविद्याः, विज्ञानम्, आयुर्वेदः इत्यादयः ग्रन्थास्सन्ति । इयं विद्या भारतीयानां प्रतिष्ठात्मिका धननिधिः कामधेनुः च समस्तज्ञानाकारा धर्मार्थकाममोक्षप्रदायिनी चास्ति । पुरारभ्य अद्यावधि याः याः शिक्षाः यानि यानि च ज्ञानविज्ञानानि सन्ति, ताः ताः शिक्षाः तानि तानि च ज्ञानविज्ञानानि अस्यां भाषायाम् अन्तर्निहितानि सन्ति । अतः अतिसूक्ष्मभावानां स्पष्टीकरणविषये संस्कृतं विना नैव समर्थो भवितुमर्हति । भारतीयसर्वस्वं विश्वस्य समग्रं तत्त्वं चास्यां सन्निहितोऽस्ति ।

सम् उपसर्गपूर्वकं कृञ्-धातोः क्तवतुप्रत्यये सति सुडागमे संस्कृतम् इति निष्पन्नो शब्दः। सम्यक् कृतं संस्कृतम् अर्थात् प्रकृतिप्रत्ययपुरस्सरं कृतमितिहेतोः अस्याः भाषायाः कृते नामैतत् सार्थकमभवत् । संस्कृतानां भाषा, संस्कृता च सा भाषेति इति द्विधा विग्रहवाक्यं वर्तते । संस्कृतभाषा परिनिष्ठिता, दोषरहिता, सरला, गभीरा, यथार्था, वैज्ञानिकी चास्ति । आधुनिकभारते संस्कृतमाध्यमेन संस्कृतशिक्षणस्य महत्त्वमस्ति । महत्त्वं विना कस्याश्चिदपि भाषायाः उद्देश्यपूर्तिर्न जायते । इयं संस्कृतभाषा हिमालयपर्वतात् विन्ध्यान्चलपर्वतं यावत् विचारविनिमयस्य भाषा आसीत् । सम्प्रति संस्कृतभाषाशिक्षणस्य महत्त्वम् अस्ति ।

इयं वैज्ञानिकी भाषा वर्तते । मस्तिष्कस्य कृते बहूपयोगी अनुकूला च वर्तते । ज्ञानं, विज्ञानं, समाजशास्त्रं, दर्शनं, चिकित्साशास्त्रं, गणितं, ज्यौतिषम् इत्यादयः सर्वे सामाजिकाः, राजनैतिकाः, वैज्ञानिकाः च ग्रन्थाः संस्कृतभाषायां सन्ति । अस्माकं जीवने जन्मतः मृत्युपर्यन्तं षोडशसंस्काराः

संस्कृतभाषायामेव सम्पन्नाः भवन्ति। 'विद्वान् सर्वत्र पूज्यते' एते एव लोकेऽस्मिन् लोके चक्षुष्मन्तः प्रकीर्तिताः । ज्ञानानुभवसंवर्धनार्थम् आधुनिकभारते संस्कृतशिक्षणस्य महत्त्वम् अधिकमस्ति । आदर्शव्यक्तित्वाय, चरित्रनिर्माणाय, आत्मानुशासनाय, अनुभूत्यर्थं, ज्ञानार्थं, भारतीयभाषासंरक्षणार्थं राष्ट्रियान्ताराष्ट्रियऐक्यस्य संवर्धनार्थं सर्वजनकल्याणार्थं, परोपकारार्थं, संस्कृतिसंरक्षणार्थञ्च संस्कृतशिक्षणमावश्यकमुपयोगी च वर्तते । अतः संस्कृतमाध्यमेन संस्कृतशिक्षणम् आवश्यकम्।

## भारतीयदर्शनानि

**शरण्या के. आर्.**

शिक्षाशास्त्रिद्वितीयवर्षम्

दृश् धातोः ल्युट्प्रत्यये दर्शनं शब्दः निष्पद्यते। दृश्यते ज्ञायते विचार्यते अनेन इति दर्शनम्। भारतीयदर्शनानि स्थूलरूपेण द्विधा भवन्ति यथा आस्तिकदर्शनानि, नास्तिकदर्शनानि चेति । आस्तिकदर्शनानि षड्विधानि, नास्तिकान्यपि षड्विधानि । यानि दर्शनानि वेदानां प्रामाण्यम् उररीकुर्वन्ति तानि आस्तिकानि यानि च न उररीकुर्वन्ति तानि नास्तिकानि इति।

| **आस्तिकदर्शनानि** | **नास्तिकदर्शनानि** |
|---|---|
| सांख्यदर्शनम् | चार्वाकदर्शनम् |
| योगदर्शनम् | जैनदर्शनम् |
| न्यायदर्शनम् | वैभाषिकदर्शनम् |
| वैशेषिकदर्शनम् | सौत्रान्तिकदर्शनम् |
| मीमांसादर्शनम् | योगाचारदर्शनम् |
| वेदान्तदर्शनम् | माध्यमिकदर्शनम् |

**आस्तिकदर्शनानि -**

(क) **न्यायदर्शनम्-** भारतीयषट्दर्शनपरम्परायां न्यायदर्शनं भवति प्रमुखः। अस्य दर्शनस्य प्रणेता भवति महर्षिः गौतमः। नीयते अनेन इति न्यायः। न्यायदर्शनस्य बहूनि नामानि सन्ति यथा- अक्षपाददर्शनम्, आन्वीक्षिकी, शास्त्रं, प्रमाणशास्त्रं, तर्कशास्त्रं चेत्यादीनि। न्यायमतानुसारम् ईश्वरेच्छया परमाणुसंयोगः जायते। परमाणुसंयोगेन जन्यभूतानां च सृष्टिर्भवति।

(ख) **वैशेषिकदर्शनम् -** अस्य दर्शनस्य प्रणेता महर्षिः कणादः। महर्षेः त्रीणि नामानि सन्ति यथा कणादः, कणभुक्, उलूकश्चेति। अस्मिन् दर्शने विशेषः पदार्थत्वेन स्वीक्रियते। कणादात् ऋते केनापि पदार्थत्वेन न स्वीकृतः विशेषः। वैशेषिकानां मते द्रव्यगुणकर्मसामान्यविशेषसमवायाः इति षट्पदार्थाः। एतेषां तत्त्वज्ञानेन मोक्षः इति। द्रव्यगुणादीनामत्यन्तं सुव्यवस्थितं रुपम्। एतेषां साधर्म्यवैधर्म्याणां विशिष्टं वर्णनं यथा कणादेन कृतं तथा अन्यस्मिन् दर्शने न मिलति।

(ग) **सांख्यदर्शनम्-** सांख्यदर्शनस्य जन्मदाता भगवान् कपिलः। अस्मिन्नेव शास्त्रे प्रथममोक्षसाधकतत्त्वानां परिगणनं कृतम्। सम्यक् ख्यानं संख्या इति निर्वचनानुसारं यस्मिन् दर्शने जडचेतनयोः प्रकृतिपुरुषयोः सम्यक्ज्ञानं वर्णितं तत् दर्शनं सांख्यमिति अभिधीयते। अतः व्यासेन कथितं 'संख्या प्रकुर्वते चैव प्रकतिं च प्रचक्षते, तत्त्वानि च चतुर्विंशतिः तेन संख्याः प्रकीर्तिताः। सांख्यदर्शनानुसारं तत्त्वानि यथा प्रकृतिपुरुषबुद्ध्यहंकारमनांसि पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्चतन्मात्राणि, पञ्चमहाभूतानि चेति। प्रकृतिपुरुषयोः तत्त्वज्ञानेन त्रिविधदुःखात्यन्तनिवृत्तिरुपं निःश्रेयसं मोक्षो वा लभ्यते।

(घ) **योगदर्शनम्-** अस्य योगदर्शनस्य रचयिता महर्षिः पतञ्जलिः। अयं पतञ्जलिः जीवः ईश्वरच्चेति तत्त्वद्वयं स्वीकरोति। अत एव अस्य दर्शनस्य सेश्वरसांख्यमिति नामान्तरम्। एतद्दर्शनं पतञ्जलिना प्रणीतत्वात् पातञ्जलयोगदर्शनमिति ख्यातम्। महर्षिपतञ्जलिना योगं लक्षयित्वा योगश्चित्तवृत्तिनिरोधः इति रूपेण अष्टाङ्गयोगो वर्णितः। एतानि यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयश्चेति।

(ङ) **मीमांसादरशनम् -**मीमांसादर्शनस्य प्रवर्तकः महर्षिः जैमिनिः। अस्मिन् शास्त्रे ध्यानानुष्ठानेनैव अभिमतफलसिद्धिर्भवतीति विश्वासः। तदनुष्ठानं तु श्रुतिस्मृतिपुराणाद्यनेकधर्मग्रन्थेषु प्रसिद्धम्। धर्मस्य विवेचनं मीमांसायाः प्रमुखो विषयः। धर्मस्य लक्षणं, वैशिष्ट्यं, प्रमाणमित्यादि पूर्वमीमांसायाः सिद्धं भवति। मीमांसायाः भागद्वयं पूर्वोत्तरमीमांसा चेति। तत्र पूर्वमीमांसा एव मीमांसादर्शनम्। उत्तरमामांसा तु वेदान्तः। मीमांसादर्शनं द्वादशाध्यायेषु विभक्तं भगवता जैमिनिना। प्रत्येकस्मिन् अध्याये त्र्यधिकाः पादाः विलसन्ति।

(च) **वेदान्तदर्शनम्-** वेदान्तस्योपदेष्टा बादरायणः। उपनिषन्मन्त्रप्रमाणकं शास्त्रं वेदान्तः भवति। समस्तवेदानां परमलक्ष्यात्मकं तत्त्वमुपनिषन्मन्त्रेषु निगदितमस्ति। वेदान्तानुसारम् अखण्डं सच्चिदानन्दं ब्रह्म एकमेव न तु अनेकम्। वेदान्तदर्शने केवलमात्मिकस्वरूपं प्रतिपाद्यते इति हेतोः मुमुक्षुः वेदान्तशास्त्रपठनश्रवणमननादिषु प्रवृत्तो भवति। तस्मात् एतत् शास्त्रं सर्वेषां शास्त्राणां शिरोमणिभूतं भवति। अस्मिन्नपि शास्त्रे आत्मनः स्वरूपप्रतिपादनं महता विस्तरेण

प्रतिपादितमस्ति । यत्र समस्तवेदमन्त्राणां लक्ष्यत्वेन अन्तिमं तत्त्वमेकं वर्णितं भवति तत् वेदान्तशास्त्रमित्युच्यते । उपनिषन्मन्त्रसमूहस्यापि वेदान्तः इति संज्ञा । यतः समस्तवेदानां परमलक्ष्यात्मकं तत्त्वमुपनिषन्मन्त्रेषु निगदितमस्ति ।

## साम्प्रतिकसमाजे सदाचारः

**मनस्मिता राउत**

शिक्षाशास्त्रिद्वितीयवर्षम्

**उपोद्घातः -** भारतीयसंस्कृतौ बहुप्राचीनकालादारभ्य सदाचारस्य महत्त्वं विद्यते । भारतीयास्तु समेपि सदाचारिणः । सतामाचारः सदाचारः अर्थात् सज्जनानाम् आचारः यः सो भवति सदाचारः। मानवः समाजं प्रति यः श्रेयस्करः हितकरः सः सदाचारः । तथैव शिष्टाचारयुक्तः मानवः सदाचारी इति उच्यते । 'शुचौ च चरते शीलम्' इति न्यायेन चरित्रवान्, शीलवान्, गुणवान् मानवः सदाचारी भवति । धर्मशास्त्रानुसारेण सदाचारशब्देन दया-क्षमा-सत्य-शौच-विनय-त्याग-संयमादीन् गुणान् गृह्णीमः । आचार्यमनुना तु उक्तं यत् –

**'यस्मिन् देशे यः आचारः पारम्पर्यक्रमागतः ।**
**वर्णानां सान्तरालानां स सदाचार उच्यते' ।।**

महाभारतेऽपि भगवता व्यासेन सदाचारं धर्मस्य लक्षणं स्वीकृतम् । यथा –

**'आचारः परमो धर्मः सन्तश्चाचारक्षणः ।**
**साधूनां च यथा वृत्तमेतदाचारलक्षणम्' ।।**

पुनरपि महाभारते अहिंसा परमो धर्मः इति रूपेण वर्णितम् । तदुक्तं भगवता व्यासेन । सर्वैः शास्त्रकारैः अहिंसा सदाचाररूपेण स्वीक्रियते । सदाचारयुक्तपुरुषः स्वीयपरिवारस्य हितसाधनं कृत्वा समग्रराष्ट्रस्य कल्याणं साधयति । मनुष्यः बाल्यादारभ्य स्वपरिवारे परिपाल्यमानः मातृपितृगुरुजनेभ्यः सदाचारस्य शिक्षां गृह्णाति । कालान्तरे स एव मानवः सदाचारी भूत्वा आत्मज्ञानसम्पन्नः स्वदेशस्य राष्ट्रस्य वा मानं वर्धयति । उक्तं हि -

**'विद्वत्वं च नृपत्वं च नैव तुल्ये कदाचन**
**स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते' ।**

सदाचारी मानवः दरिद्रः सन् अपि कदापि आचारभ्रष्टः न भवति । परन्तु अद्यतनसमाजे एतादृशः मानवः संस्कारसम्पन्नः परिवारः कदाचिदेव दृश्यते । यत्र बालकाः स्वचित्तावगमनार्थम् उपयुक्तशिक्षां प्राप्तुं न शक्यते ।

गणतन्त्रराष्ट्रस्य त्रीणि प्रमुखानि अङ्गानि भवन्ति प्रशासनम्, व्यवस्थापकः, विचारविभागश्च। एतेषु प्रमुखेषु विभागेषु असदाचारः दूरी न भविष्यति तर्हि देशस्य कदापि उन्नतिः न भविष्यति।

**निष्कर्षः -** आधुनिके समाजे सदाचारस्य आवश्यकता सर्वैः अनुभूयते। अतः समाजे सदाचारस्य पुनःस्थापनां कर्तुं प्रयत्नशीलाः भवेम। शिक्षानुष्ठाने शिक्षकाः स्वयं सदाचारी भूत्वा सदाचारशिक्षां प्रदद्युः। यदि सर्वे मिलित्वा एवं प्रकारेण प्रयत्नं विधास्यन्ति चेद् अवश्यम् अस्माकं लुप्तप्राप्तसदाचारः देशेषु राष्ट्रेषु वा पुनः प्रतिष्ठां प्राप्स्यति इति।

**परिशीलितग्रन्थः -** सिकरवारः प्रेमसिंहः - सामाजिक दार्शनिकाधाराः।

साहुः सोमनाथः - सामाजिक दार्शनिकाधाराः।

## परिसरविज्ञानम्

**लीतु थामस्**

शिक्षाशास्त्रिद्वितीयवर्षम्

वस्तुतः परितः आवरणं नाम पर्यावरणमिति सर्वे जानन्त्येव। अर्थात् यानि जैविकानि अजैविकानि च तत्त्वानि अस्मान् परितः विराजन्ते तानि सर्वाणि पर्यावरणस्य घटकाः सन्ति। अपि च मानवजीवने प्रत्यक्षरूपेण एतेषां पर्यावरणीयघटकानां ये प्रभावाः भवन्ति ते एव पर्यावरणम्। अर्थात् अस्मान् परितः यानि तत्वानि विराजन्ते तेषां प्रभावः एव पर्यावरणम्। प्राचीनकाले विश्वस्य जनसंख्या नियन्त्रिता आसीत्। प्राकृतिकसाधनेनैव मानवानां नित्यावश्यकतानां पूर्तिर्भवति स्म। पर्यावरणप्रदूषणकार्याणि न आसन् तदानीम्। अतो येन कारणेन प्रदूषणे भूते सत्यपि तस्य निवारणसामर्थ्यं प्रकृतौ आसीदेव। यतः तस्मिन् समये प्रकृतौ समेषामपि तत्त्वानां सन्तुलनम् आसीत्। सम्प्रति जनसंख्याविस्फोटः जातः। अनेन सह अस्माकमावश्यकताः अपि वर्धिताः। फलतः वनकर्तनम्, औद्योगिकविस्तरः जातः। अनेन विविधप्रकारकाणि प्रदूषणानि अभवन्। अत्र विचारणीयं भवति यत् केषां तत्त्वानामभावेन प्रकृतिः असंतुलिता जाता ? एतस्य च अस्माकं जीवने कः प्रभावः ? आशयो भवति यत् पर्यावरणे स्थितानां घटकानां परस्परसम्बन्धस्य अध्ययनम् अस्माकं कार्यम्। इदमेवाध्ययनं पारिस्थितिकी (इकोलॉजी) नाम्ना ज्ञायते।

परिस्थितिविज्ञानम् इत्यस्य आङ्ग्लभाषायाम् इकोलॉजी इत्युच्यते। इकोलॉजी इति शब्दः ग्रीक्भाषायाः oikos logos शब्दाभ्यां निष्पन्नः, यस्यार्थः भवति आवासीयमध्ययनम्। सन्दर्भेऽस्मिन् एकमध्ययनमस्ति।

- पारिस्थितिकी केषाञ्चित् जीवधारिणां तेषां पर्यावरणस्य सन्दर्भे एकमध्ययनमस्ति।
- पारिस्थितिकी जीवधारिषु परस्परसम्बन्धस्य जीवधारिपर्यावरणयोर्मध्ये परस्परसम्बन्धस्य चाध्ययनमस्ति।
- पारिस्थितिकी वनस्पति-पशु-मानवानां तथा तेषां पर्यावरणेन सह सम्बन्धस्य परिणामः अस्ति।

यद्यपि एतासां परिभाषाणामालोचनेन इदमेव तथ्यं स्पष्टं भवति यज्जीवधारिणां पर्यावरणेन सह सम्बन्धस्याध्ययनं पारिस्थितिकी इति। वस्तुतः अत्र तु प्रत्येकं जीवधारिणां तेषां परिस्थितिना तेषां पर्यावरणस्य तेषां परस्परसम्बन्धस्य पर्यावरणघटकेषु परस्परसम्बन्धस्य जीवधारिणां परस्परसम्बन्धस्य च सामाजिकं वैयक्तिकञ्चाध्ययनं भवति । एवं प्रकारेण अत्र वनस्पतिविज्ञानं, रसायनविज्ञानं, भूगर्भविज्ञानं, भूगोलशास्त्रं, वातावरणविज्ञानं, जलवायुविज्ञानं, सामाजिकविज्ञानं, नक्षत्रविज्ञानञ्च अन्तर्भवति। अनेनास्य क्षेत्रं बृहदाकारं प्राप्नोति। मूलतः सर्वविधप्राकृतिकविज्ञानं सामाजिकविज्ञानञ्च आगच्छति अत्र।

## प्रौढशिक्षायाः आवश्यकता

**प्रवीणा सुरेष्**
शिक्षाशास्त्रिद्वितीयवर्षम्

शिक्षा - शिक्षा विद्योपादाने इत्यस्माद् भौवादिकधातोः गुरोश्च हलः इति पाणिनीयसूत्रेण अप्रत्यये सति अजाद्यतष्टाप् इति टापि शिक्षा इति शब्दः निष्पद्यते । शिक्षा नाम आजीवनं प्रचाल्यमाना काचिद् गतिशीला प्रक्रिया अस्ति।

**प्रौढशिक्षा -** प्रौढविद्याग्रहणेच्छुकानां कृते दीयमानाशिक्षा भवति प्रौढशिक्षा । अस्यां शिक्षायां प्रौढाः मूल्यानि, नूतनकौशलानि च प्राप्तुं क्रमाकृतरूपेण सुव्यवस्थितरूपेण च स्वयं शिक्षायां भागभाजाः भवन्ति।

**प्रौढशिक्षायाः उद्देश्यम् -** भारतीयसन्दर्भे प्रौढशिक्षायाः मुख्योद्देश्यं वर्तते यत् प्रौढविद्यार्थिनां व्यक्तित्वविकासः इति । तंजानीयराष्ट्रस्य राष्ट्रपतिः न्यूरेरे महोदयेन उक्तं यत् प्रौढशिक्षा स्वतन्त्रव्यक्तेः स्वतन्त्रसमाजस्य च विकासस्य कुञ्चिका वर्तते । तदनुसृत्य प्रौढशिक्षायाः कार्यं वर्तते यत् स्वयं निर्णयं स्वीकर्तुं तथा स्वीकृतनिर्णयस्यानुगुणं कार्यम् आचरितुं मानवान् प्रेरयति।
यूनेस्कोसंस्थानुसारं प्रौढशिक्षायाः उद्देश्यानि -

१. प्रमुखसमकालीनसमस्यायाः सामाजिकपरिवर्तनानां च चिन्तनात्मकः अवबोधात्मकश्च विकासः।
२. नूतनज्ञानाय, अभिवृत्तेः, व्यवहार परिवर्तनाय च अभियोग्यतायाः विकासः।
३. कार्यक्षेत्रे व्यक्तेः उत्तमभागग्रहणस्य दृढीकरणम्।
४. व्यक्तेः भौतिक-सांस्कृतिक-पर्यावरणयोः परस्परसम्बन्धस्य अवबोधनम्।

**प्रौढशिक्षायाः आवश्यकता -** प्रौढशिक्षायाः प्रमुखोद्देश्यं भवति यत् अगणितावश्यकतायाः पूर्तिः। प्रौढशिक्षा न केवलं मानवानां मूलभूतावश्यकतानां पूर्तिं करोति अपि तु सामाजिक-सांस्कृतिक-आवश्यकतानामपि पूर्त्यै सहायिका भवति। प्रौढशिक्षायां दीयमाना शिक्षा सर्वकारद्वारा सर्वेषाम् उत्तमं भविष्यं निर्मातुं भवति। सर्वे जानन्ति समाजः गतिशीलः भवति। तत्र प्रौढशिक्षायाः आवश्यकता अत्यधिका वर्तते। अस्याः आवश्यकता एतदर्थमपि भवति यतः -

१. **निरक्षरतायै मुक्तिः-** प्राचीनकालादेव साक्षरतायाः महत्त्वविषये बहुत्र उक्तं वर्तते, अशिक्षितजनाः पशुतुल्याः इति। अतो ये जनाः स्वबालान् न पाठयन्ति ते तु 'माता शत्रुः पिता वैरी येन बालो न पाठितः, न शोभते सभामध्ये हंसमध्ये बको यथा।' एतादृशानां सुभाषितानां सारस्तु साक्षरतायाः महत्त्वमेव।
२. **प्रजाशासनस्य संरक्षणाय-** प्रजाशासनस्य संरक्षणाय शिक्षा आवश्यकी वर्तते। शिक्षा सर्वदा मानवं स्वीयं कर्तव्यं स्मारयति। प्रजाशासनद्वारा निरक्षरता पूर्णरूपेण निवारयितुं शक्यते। अशिक्षिताः जनाः राष्ट्रस्य सर्वविधकार्याणां दुरुपयोगं कुर्वन्ति। उच्यते यत् युवजनाः भविष्यराष्ट्रस्य पौराः भवन्ति।
३. **स्वास्थ्यसंरक्षणम् -** प्रौढशिक्षाद्वारा शारीरिक-मानसिक-स्वास्थ्यं संरक्षितुमपि शक्यते। प्रौढशिक्षायां रोगाणां लक्षणानि, कारणानि च बोध्यन्ते। पुनः रोगनिवारणाय शारीरिकव्यायामाः के ? इत्यादीनामपि लक्ष्योन्मुखी पाठनं क्रियते।
४. **जनसांख्यवृद्धिनियन्त्रणम् -** इयं भारतस्य महती समस्या, प्रौढशिक्षान्तर्गते प्रौढेभ्यो अवबोधयितुं प्रयासः क्रियते यत् कथं जनसंख्यायाः वृद्धिः अवरोधनीया। एकस्य राष्ट्रस्य सुष्ठुनिर्माणे जनसंख्यायाः कियत् योगदानम् इति।
५. **निर्धनिकानां समस्या निवारणम्-** एकं राष्ट्रं शिक्षाक्षेत्रे पृष्ठतः अस्ति चेत् स च राष्ट्रं सामाजिक-आर्थिकदृष्ट्या अपि पृष्ठभागे भवति। किन्तु प्रौढशिक्षायाः नैके युवकाः शिक्षां प्राप्य उद्योगादीन् प्राप्नुवन्ति चेत् निर्धनिकानां संख्या न्यूना भवति।

# विद्यालयसङ्घटनं स्वास्थ्यशिक्षा च

**शरण्या सी. के.**

शिक्षाशास्त्रिद्वितीयवर्षम्

कस्यश्चिद् जनस्य स्वास्थ्यम् उत्तमं चेत् सः परिवारस्य, समाजस्य, राष्ट्रस्य च उत्तमः नागरिको भवति। केवलं व्यक्तीनाम् उत्तमस्वास्थ्यम् एव वैयक्तिकप्रसन्नतां प्रफुल्लतां वा आनयति एवं समाजाय सम्पन्नतां ददाति तथा राष्ट्रस्य सुरक्षाम् अपि ददाति। उत्तमस्वास्थ्यमेव जीवनस्य सफलतायाः रहस्यम्। स्वस्थे शरीरे स्वस्थं मनः। उत्तमं स्वास्थ्यमेव जीवने आनन्दमानयति तथा जीवनस्य सफलता दानस्य मूलकारणमस्ति। स्वास्थ्यस्य एतादृशी महत्तायाः कारणतः पाश्चात्त्यदार्शनिकाः अस्मिन् विषये बहु प्रतिपादितवन्तः। उत्तमस्वास्थ्ये श्वसनप्रणाली, रक्तसंचारप्रणाली, ग्रन्थिप्रणाली, मांसपेशयः इत्यादीनां सर्वेषां विकासस्य सम्मेलनं सम्भवति। केवलं रोगाणाम् अनुपस्थितिः नास्ति, स्वास्थ्यमपि शारीरिक – मानसिक - सामाजिकस्थितीनां द्योतकं भवति।

**स्वास्थ्यशिक्षा -** उत्तमस्वास्थ्यं स्वास्थ्यशिक्षा च एतयोर्मध्ये अविनाभावसम्बन्धः वर्तते। स्वास्थ्यशिक्षायाः विषयः किमित्युक्ते स्वास्थ्याय आवश्यकनियमानां सिद्धान्तानां च शिक्षणं भवति। स्वास्थ्यशिक्षा स्वास्थ्यसम्बद्धसद्व्यवहाराणां समूहः भवति। वुडमहोदयेन स्वास्थ्यशिक्षायाः परिभाषा उक्ता यत् 'स्वास्थ्यशिक्षा अनुभवों की वह समग्रता या योग्यता है जो व्यक्ति, समुदाय तथा प्रजाति की स्वास्थ्यसम्बन्धी आदतों, अभियोग्यताओं तथा ज्ञान को प्रभावित करती है'।

**स्वास्थ्यशिक्षायाः क्षेत्रम् -** स्वास्थ्यशिक्षा नाम स्वास्थ्यं तथा शारीरिकविकासः। अनयोः द्वयोः सम्बन्धितानेकप्रकारकसमस्यानां तथा तासां निवारणानाञ्च अध्ययनं भवति। एतत् केवलं विचाराणाम् अध्ययनं नास्ति अपि तु मानसिकरोगाणां तेषामुपचाराणाञ्च ज्ञानं प्रददाति। सामान्यतया स्वास्थ्यशिक्षायाः अन्तर्गतांशाः निम्नलिखितास्सन्ति -

१. स्वास्थ्यसंरक्षणस्य उपायानाम् अध्ययनम्।
२. विभिन्नरोगाणां कारणं, लक्षणं तथा उपायाश्च।
३. वैयक्तिकं सामूहिकञ्च स्वास्थ्यम्।
४. सन्तुलितः आहारः, भोजनस्य पाचकाङ्गं, पोषकतत्त्वञ्च।
५. स्वास्थ्यसेवाः यथा कामस्वास्थ्यं, मानसिकस्वास्थ्यं, पारिवारिकस्वास्थ्यं च।
६. प्राथमिकचिकित्सा।

**स्वास्थ्यशिक्षायाः उद्देश्यानि -**

- स्वास्थ्यसंरक्षणं तथा शारीरिकविकाससम्बन्धी शिक्षा देया।
- स्वास्थ्यसम्बन्धिनियमानां कार्यक्रमाणाञ्च अवगमनम्।
- सामुदायिकस्वास्थाय विद्यालयस्य स्वास्थ्यसेवायाः च प्रसारः तथा समाजे तस्य प्रसारणं प्रचारश्च।
- प्राथमिकचिकित्सायाः सिद्धान्तानाम् अवगमनम्।

**स्वास्थ्यशिक्षा एवं शिक्षकवर्गः विद्यालयश्च** - स्वास्थ्यशिक्षासम्बन्धिशिक्षकस्य वर्गाणां दायित्त्वं महत्त्वपूर्णमस्ति। तद्यथा –

- स्वास्थ्यरक्षार्थं स्वास्थ्यस्यनियमाः छात्रेभ्योः अवबोधयितुम्।
- स्वास्थ्यसम्बन्धितविषयवस्तूनाम् उपरि छात्राणां रुचेः उत्पादनम्।
- स्वास्थ्यसम्बन्धितक्रियाकलापानां व्यवस्था कल्पनीया।
- छात्राणां स्वास्थ्यस्य निरीक्षणव्यवस्था कल्पनीया।
- समये समये छात्राणां शरीरस्य स्वच्छतायाः निरीक्षणम्।

विद्यालये स्वास्थ्यशिक्षाप्रदातृसन्दर्भे बहूनां तथ्यानां ध्यानं दातव्यं भवति। यथा -

- छात्राणां सामयिकं वा गहनवैद्यपरीक्षां कर्तुं व्यवस्था करणीया।
- अस्यां परीक्षायां विद्यार्थिनां शारीरिकदोषाः न वक्तव्याः अपि तु उपायाः चिन्तनीयाः।

## योगः विद्याभ्यासश्च

**ज्योत्स्ना पी. वी.**

शिक्षाशास्त्रिद्वितीयवर्षम्

भारतीयपौराणिकारोग्यपरिपालनसम्प्रदायेषु अन्यतमो भवति योगः । विश्वस्य कृते दीयमानं भारतीयं योगदानं भवति योगः । मानवस्य शारीरिक-मानसिक-आध्यात्मिकोन्नतिम् उद्दिश्य लिखितः ग्रन्थः भवति अष्टाङ्गयोगः । तल्लिखितं भवति महर्षिणा पतञ्जलिना । योगः इति पदस्यार्थः भवति मेलनम् । श्वासप्रश्वासयोः मेलनं भवति योगः । आधुनिके काले मानवस्य मानसिकसङ्घर्षः अनुदिनं वर्धयति तन्न्यूनीकर्तुं योगः अत्यन्तं सहाय्यं करोति । इदानीं योगः

आधुनिकचिकित्सासम्प्रदायस्य अङ्गरूपेण स्वीकर्तुं प्रयासश्च जायमानं भवति । आधुनिकचिकित्साशास्त्रस्य अपेक्षया अस्माकं पुरातनयोगः अत्यन्तं समीचीनो भवति । दीर्घकालिक्यध्यानविधिना अस्माकं ऋषिभिः महर्षिभिः च आर्जितज्ञानविज्ञानं भवति योगशास्त्रम्।

यदा एकस्य मानवस्य वयः द्वादशवर्षाणि भविष्यति तदा सः योगाभ्यासाय अर्हः भविष्यति इति पूर्वजैः उक्तम् । विभिन्नप्रकारकाणां शारीरिकरचनानां, श्वासोच्छ्वासप्रक्रियायाः मेलनं च योगस्य विशेषरूपेण अस्माभिः द्रष्टुं शक्यते । श्वासकोशे प्रपूरितेन प्राणवायुना शारीरिककार्याणि सम्यक् प्रचाल्यन्ते । एवं प्राणवायुः रक्तद्वारा मस्तिष्कं गच्छति । अतः मस्तिष्कं सम्यग्रीत्या कार्यं करोति । तद्वारा उत्तमचिन्तनं, विकारनियन्त्रणं, स्मरणशक्तिः, ग्राह्यशक्तिः, आत्मीयशक्तिः च वर्धयति । यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिभिः अष्टाङ्गैः जीवने नियन्त्रणमानीय मानवस्य जीवनस्तरोन्नतिः शक्यते इति सांख्यशास्त्राभिमतम् ।

**योगः विद्याभ्यासश्च –**

अधुना विद्याभ्यासः स्पर्धारूपेण वर्तते । पितरौ तेषाम् इच्छानुसारम् एवं इच्छापूर्तये च छात्राणामुपयोगं कुर्वन्ति । अतः छात्राः अधुना अतीव तन्यताम् अनुभवन्ति । अनेन कारणेन च ते प्रायः सर्वे विषादरोगपीडिताः भवन्ति । एतेषां छात्राणाम् इच्छा, स्वाभाविकता, पठनक्षमतादीनां विनाशं कुर्वन्ति । अतः एतादृग्समस्यानां परिहाराय योगः अत्युत्तमो भवति । अतः एन्. सी. ई. आर्. टी. इत्यनया संस्थया उक्तं यत् षष्ठकक्षातः आरभ्य योगः पाठनीयः इति ।

## <u>कः भाषाध्यापकः ?</u>

**मिधुनः एम्. एस्.**

शिक्षाशास्त्रिद्वितीयवर्षम्

समाजस्य संस्कारनिर्माणार्थं प्रथमसहायकः भवति अध्यापकः । इतोऽपि स्पष्टतया वदामश्चेत् विद्यालयस्य मुख्यो घटको भवति अध्यापकः । विश्वस्य प्रारम्भिके काले अध्यापकाय पृथक् कर्म नासीत् । मत्पुरोहिताः एव अध्यापकरूपेण आसन् । तस्मिन् समये अध्यापकेति वर्गः अपि नासीत् । बुद्धः, क्रिस्तः, मोहोम्मदः, नबी चेते सर्वे पुरोहिताः अध्यापकाश्चासन् । मध्यकाले पाश्चात्त्यादेशेषु क्रिस्तपुरोहिताः अध्यापकरूपेण कार्यं कृतवन्तः । किन्तु नवयुगे तु सामान्यजनाः अपि अध्यापनं कुर्वन्ति । आशयो यत् शनैः शनैः आविश्वे इयं प्रवृत्तिः आरब्धा सर्वत्रापि ।

अध्यापनमेकं महत् सामूहिकसेवा भवति । अध्यापने विषयगतज्ञानस्य मेलनं भवति । अध्यापनम् एकं शास्त्रं नास्ति अपि तु एका कला अस्ति इति विद्वद्भिः अङ्गीक्रियते । प्राचीनभारते गुरुकुलविद्याभ्यासव्यवस्था आसीत् । कालेऽस्मिन् महर्षिभिः अध्यापनकार्यं कृत्वा अध्यापनस्य महत्त्वं बोधितम् । अनन्तरं भारते जाति-मत-वर्ग-लिङ्गभेदादि सन्दर्भे अध्ययनं जातम् । अनेन कारणेन बहूनां विद्यालयानां स्थापना पृथग्तया जाता । विद्यालयानां निर्माणादनन्तरम् अध्यापकसमूहस्य विकासः जातः ।

आचार्यः इत्युक्ते कस्यचिद् समूहस्य मार्गनिर्देशकः भवति स्म । आचिनोति आचारान् सः आचार्यः । गुरुः इत्युक्ते अन्धकाररूपेण विद्यमानस्य अज्ञानस्य निवारणं कृत्वा ज्ञानस्य प्रकाशं यः ज्वालयति स्म सो अध्यापकः अथवा गुरुरिति ।

**गुकारस्त्वन्धकारः स्यात् रुकारस्तन्निरोधकः।**
**अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते ।।**

**अध्यापकस्य गुणाः -** समाजस्य निर्माणार्थम् उत्तमछात्ररूपिकार्ये भाषाध्यापकः अनेकधर्मकरणीयो भवति । भाषाध्यापकस्य मनसि भाषामधिकृत्य सम्पूर्णमभिमानमावश्यकम् । तदेव भाषाध्यापकस्य प्रथमयोग्यता भवति । छात्राणां रुचिमवगत्य ते प्रोत्साहनीयाः। एतदेव उत्तमाध्यापकस्य मुखमुद्रा भवति। सहृदयत्वं, कालावबोधः, प्रभाषणनैपुण्यं, विलक्षणता, मूल्यावबोधः इत्यादयः भाषाविकासार्थं विविधविश्वविद्यालयास्सन्ति इति कृत्वा न अपितु भाषां प्रति स्नेहः प्रीतिश्चावश्यकी भवति । एते गुणाः केषां मनस्सु वर्तन्ते सो भाषाध्यापकः मनुते ।

भाषायाः प्रयोगस्तु त्रुटिरहितः स्यात् । भाषायां स्पष्टता, सरलता, उच्चारणमादयः एते प्रमुखाः विषयाः भवन्ति । अतः अध्यापकेन एभिर्भाव्यम् । पाठ्यविषये सर्वे ध्यानं ददति तस्मात् प्राग्भाषाज्ञानं तु अनिवार्यम् । एतदतिरिच्य भाषाध्यापकस्य अत्यन्तं गुणो भवति साहित्यज्ञानम् । भारतीयसाहित्यं, विश्वसाहित्यम् एतेषु सर्वेषु साहित्येषु सम्पूर्णं ज्ञानमावश्यकम् । एतदतिरिच्य हिन्दी-आङ्ग्लादिमहत्त्वपूर्णभाषाणामपि ज्ञानम् आवश्यकम् । एतादृशगुणयुक्तः अध्यापकः हि विश्वस्य कल्याणं कर्तुं शक्नोति ।

# त्रिभाषासूत्रं संस्कृतं च

**हरिप्रिया पि. एच्.**

शिक्षाशास्त्रिद्वितीयवर्षम्

त्रिभाषासूत्रं भारतीयसर्वकारस्यादेशमनुसृत्य कैश्चिद् विद्वद्भिः समर्थितम् । भारतसर्वकारेण समर्थितमनुमोदितञ्च एतत् त्रिभाषासूत्रं भारतस्य सर्वेषु प्रान्तेषु प्रवर्तितम् । इदं किन्निमित्तं, कोऽत्र हेतुः किमस्य प्रयोजनम् इति पश्यामः । भारतवर्षे शिक्षाक्रमे भाषाणां पौर्वापर्यं न्यूनाधिकत्वाञ्चाश्रित्य विविधाः विवादाः प्रादुरभूवन् । तद्वादशमनाय समरूपता आकलनाय च सूत्रमिदं जनिरभूत् । भारतसर्वकारेण बहव्यः शिक्षासमितयः घटिताः । एताभिश्च समीतिभिः भाषाशिक्षणे त्रिभाषासूत्रम् अनुशंसितम् । 1961 तमे वर्षे यदा सर्वेषां प्रान्तानां मुख्यमन्त्रिणां गोष्ठी अभवत् तदा शिक्षानीत्यामुपरि विचारो सञ्जातः । गोष्ठ्यामस्यां स्पष्टीकरणमभवत् यत् हिन्दीभाषिप्रदेशेषु यत्र मातृभाषा हिन्दी अस्ति तत्र हिन्दीआङ्ग्लभाषयोरतिरिच्य एका अन्यभारतीयभाषा पाठनीया । इयञ्च भारतीयसंविधाननिर्दिष्टभाषास्वेका स्यात् । प्रायशः हिन्दीभाषिक्षेत्रेषु संस्कृतभाषा एतदर्थं स्वीकृता परं दक्षिणभारते अस्य अङ्गीकारः न जातः। एवम्प्रकारेण हिन्दीभाषा राष्ट्रभाषात्वेन प्रथमा सञ्जाता । द्वितीयभाषात्वेन आङ्ग्लभाषा तस्याः अन्ताराष्ट्रियमहत्त्वकारणाद्, तृतीया च क्षेत्रीया उत प्रान्तीयभाषा तस्याः प्रान्तीयमहत्त्वकारणाद् । एतेषु सर्वेषु संस्कृतस्य स्थितिः सर्वत्र भारते न प्रसरिता स्यादिति आशयः तद्विस्तरेण पश्यामः ।

**त्रिभाषासूत्रे संस्कृतम् -** त्रिभाषासूत्रं सूक्ष्मेक्षिकया परीक्ष्यते विविच्यते चेत् संस्कृतभाषा भर्तृविरहिता नारीव, पुत्रादिपरित्यक्ता मातेव, निर्वसना अवधूता अवहेलितेव संदृश्यते । न भारतीयानामध्येतॄणां तादृशं श्रमाभिमुखत्वं विविधभाषाज्ञानाभिरुचित्वं च येन भाषात्रयाध्ययनादनन्तरं तुरीयभाषाध्ययनं सम्भाव्यते । यद्यपि विदेशेषु सन्ति तादृशः प्रदेशाः जर्मनी-स्विटजरलैण्डप्रभृतयः यत्र भाषात्रयं भाषाचतुष्टयं वा सामान्यजनैरपि अधीयते शिक्ष्यते व्यवह्रियते च । परञ्च न भारते तादृशी भाषाजिज्ञासिकाभिरुचिः, अतः कृते प्रयत्ने अपि भारते चतुर्थभाषाध्ययनं सर्वथोपेक्ष्यते । येषां प्रदेशानां न प्रान्तीया भाषा हिन्दीभाषा ते स्वप्रान्तीयभाषाध्ययने प्रवर्तन्ते ।

**शिक्षाक्रमे संस्कृतस्य स्थानम् -** साम्प्रतिकः शिक्षाक्रमो भारतसर्वकारादेशानुसारं प्रवर्तते । यद्यपि त्रिभाषासूत्रानुसारं शिक्षाक्रमो प्रतिप्रदेशमायोज्यते तथापि केचन प्रदेशाः यत्र संस्कृतस्य गौरवमनुरुध्य तत्संरक्षणबुद्ध्या च हिन्दीभाषा पाठ्यक्रमे एव न्यूनाधिकरूपेण संस्कृतस्य समावेशो विधीयते एवं क्षतविक्षतया अपि देववाण्याः वाङ्मात्रोपचारः शुश्रूषा च सम्पाद्यते । एवमेवोच्चकक्ष्यास्वपि संस्कृतस्य यत्र तत्र समन्वयः अधीयते परं सर्वमेतत् संस्कृतभाषाप्रचारदृष्ट्या न पर्याप्तं, न च श्रेयोवहम् ।

हिन्दीभाषिप्रान्तेषु तृतीयभाषारूपेण संस्कृतस्य शिक्षाक्रमे स्थानानिवार्यत्वेन सम्भाष्यते आशास्यते च। अहिन्दीभाषिषु प्रदेशेषु तथाविधो विधिविधेयः यथा अनिवार्यरूपेण संस्कृताध्ययनं सम्भाव्यते। तदर्थं हिन्दीभाषापाठ्यक्रमे प्रान्तीयभाषापाठ्यक्रमे वा न्यूनाधिकरूपेण संस्कृतस्य समाहारो विधेयः।

**पत्रसारः -** यदा संस्कृतस्य गुणगौरवमुग्धाः पाश्चात्त्याः अपि देशाः संस्कृताध्ययने प्रवर्तन्ते। विश्वविद्यालयादिषु संस्कृतभाषाध्यापनव्यवस्थामातिष्ठन्ते तदा किं नैतद् दुःखावहं खेदजनकं च यद् भारते संस्कृतभाषा अपेक्ष्यते। प्राचीनसंस्कृतिसंरक्षणार्थं भारतवैभवज्ञानार्थम् आध्यात्मतत्त्वबोधाय विविधशास्त्रवगाहिज्ञानोत्पादनाय च वीणापाणिवाङ्मधुरं संस्कृतवाङ्मयं सर्वथा शिक्षाक्रमे प्रवेश्यम् आधेयञ्च।

## वेदाङ्गानि

**अंजना सुमन्**

शिक्षाशास्त्रिद्वितीयवर्षम्

अङ्ग्यन्ते ज्ञायन्ते एभिरिति अङ्गानि। वेदानामङ्गानि वेदाङ्गानि इत्युच्यन्ते। कालक्रमेण क्षीयमाणबुद्धीनां जनानां कृते वेदाः दुरूहाः सञ्जाताः। अत एव वेदानामर्थज्ञानाय येषां शास्त्रणाम् आवश्यकता भवति तानि शास्त्राणि वेदाङ्गानि इत्युच्यन्ते। वेदाङ्गानि षड्विधानि सन्ति। शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दः, ज्योतिषमिति। पाणिनीयानुशासनानुसारं प्रतिपाद्यते -

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ उच्यते**
**ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतं**
**तस्मात् साङ्गमधीत्यैव स्वर्गलोके महीयते॥**

अतः वेदस्य अध्ययने प्रयोगे वा निश्चयेन षडङ्गानि अध्येयानि।

**शिक्षाशास्त्रम् -** यस्मिन् शास्त्रे वेदमन्त्राणां वर्ण-स्वर-मात्रा-बल-साम-सन्तानादीनां ज्ञानमुपलभ्यते। येषामवबोधनमेव शिक्षायाः कार्यम्। तदर्थं याज्ञवल्क्य-वसिष्ठ-कात्यायन-पराशर-नारद-शौनक-गौतम- माण्डूक्य-पाणिनीयप्रभृतिभिः शिक्षा प्रणीता। एतेषु पाणिनीयशिक्षा एव उत्कृष्टत्वेन सर्वसम्मता।

तैत्तिरियोपानिषदि उक्तं यत् – वर्णः, स्वरः, मात्रा, बलं, साम, सन्तान इति। अत्र वर्णः अकारादयः, स्वरः उदात्तादयः, मात्रा ह्रस्वादिः, बलं स्थानप्रयत्नौ, साम निषादादिः, सन्तानः

विकर्षणादिः । एतेषां अवबोधनेमेव वेदमन्त्राणां सुष्ठु प्रयोगः साध्यः इत्यनेन शिक्षा वेदाङ्गत्वे अतीवप्राधान्यमावहति।

**कल्पशास्त्रम् -** ऋक्प्रातिशाख्ये एवं उक्तम् - कल्पो वेदविहितानां कर्मणामानुपूर्वेण कल्पना शास्त्रम्। अर्थात् वेदविहितानां कर्मणां व्यवस्थापकं शास्त्रं कल्पः इति ज्ञायते। ब्राह्मणेषु निरूपितानां यज्ञानां क्रमबद्धनिरूपणमेव कल्पशास्त्रस्य प्रयोजनम्। कल्पसाहित्यं चतुर्धा विभक्तमस्ति। यथा -

**श्रौतसूत्रम् -** वेदोक्तयागादीनां क्रमबद्धमध्ययनम्।

**गृह्यसूत्रम -** गृहस्थकर्मनिरूपकं सूत्रम्।

**धर्मसूत्रम् -** वर्णाश्रमाणाम् आचारवर्णनम् एवं राज्ञः कर्तव्यमपि निरूपितमस्ति।

**शुल्बसूत्रम् -** श्रौतसूत्रसम्बन्धं मापनिर्धारकसाहित्यम्।

**व्याकरणम्** - व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम् । व्याकरणं हि शब्दव्युत्पत्तिपरकसाहित्यं भवति । संस्कृतभाषायां प्रयुक्तानां शब्दानां शुद्धत्वाशुद्धत्वविचारः व्याकरणेन क्रियते । उपलब्धेषु व्याकरणग्रन्थेषु पाणीनिप्रणीतम् अष्टाध्यायी एव प्रसिद्धं वर्तते । अष्टाध्याय्याम् अष्टाध्यायाः द्वात्रिंशत्पादाः सूत्राणि च सन्ति । व्याकरणं हि वेदाङ्गेषु मुख्यत्वेन गृहीतमस्ति। उक्तं वर्तते महाभाष्ये प्रधानञ्च षडङ्गेषु व्याकरणम्। अत एव पाणिनीयशिक्षायामपि मुखं व्याकरणं स्मृतम् इति उक्तम्।

**निरुक्तम्** - निरुक्तस्य स्थितिः ब्राह्मणकालेष्वपि दृश्यते चेदपि प्रथमं निरुक्तं तु यास्कप्रणीतं निरुक्तमेव भवति । निरुच्यते अथवा निश्शेषेण उपदिश्यते पदार्थम् इति निरुक्तम् । वैदिकपदानां व्युत्पादनमेव अस्य विषयः।

निरुक्तस्य परम्परा नितान्तप्राचीना भवति । यास्कमुनिः स्वयमेव अग्रायण और्णनामादि द्वादश निरुक्तकारान् यास्कनिरुक्ते स्मृत्वैतं ग्रन्थं व्यरचयत् । तेषां ग्रन्थाः अधुना नोपलभ्यन्ते । वैदिकशब्दानामर्थप्रतिपादनमेव अर्थात् निर्धारणमेव यास्कनिरुक्तस्य प्रतिपाद्यविषयः । ग्रन्थोऽयं द्वादशाध्यायेषु विभक्तमस्ति।

**छन्दः** - यदक्षरपरिमाणं तच्छन्दः । वैदिकमन्त्राणि छन्दोबद्धानि सन्ति । तेषां ज्ञानं विना वर्णानां मन्त्राणां च सम्यगुच्चारणं न सम्भवतीति । वेदेषु हि गायत्री त्रिष्टुप् जगती अनुष्टप् बुहती उष्णिक् ककुप् इत्यादि छन्दांसि प्रयुक्तानि दृश्यन्ते । छन्दः शास्त्रं हि प्राचीनतमं साहित्यम् । अपि तु पिङ्गलमुनेः छन्दश्शास्त्रमेव छन्दसः लोके सुप्रसिद्धम्। छन्दसः साहित्यं तु वेदस्य पादत्वेन सम्मतं वर्तते।

**ज्योतिषम्** - ज्योतिषशास्त्रं प्राचीनभारते यागादीनां मुहूर्त्तनिर्धारणाय कल्पितमासीत् । अतः ज्योतिषशास्त्रमपि अतिप्राचीनं शास्त्रं भवति । ज्योतिषं हि होरा – सिद्धान्त - संहिताभेदात् त्रिधा वर्तते। संहितासु ब्राह्मणादिषु च ज्योतिषशास्त्रमधिकृत्य बहूक्तमस्ति । ज्योतिषस्य वेदाङ्गत्वम् अनेन कारणेन भवति । यथा वेदेषु निर्दिष्टकर्मणां सम्पादनाय सुयोग्यं कालम् अनेन संसूच्यते इति ।

## पाठ्यचर्या

**मुक्तिकान्त जेना**

शिक्षाशास्त्रिद्वितीयवर्षम्

पाठ्यचर्या पाठ्यक्रमस्य आधारस्तम्भः भवति । अर्थात् पाठ्यक्रमस्य क्रमबद्धता एवञ्च शिक्षायाः क्षेत्रं भवति पाठ्यचर्या । यतोहि कक्षायां कक्षायाः बहिश्च छात्राः यदनुभवति तत् सर्वमपि पाठ्यचर्या भवति । पाठ्यचर्यायाम् आधुनिकं चिन्तनं विस्तृतं व्यापकञ्च वर्तते ।

पाठ्यचर्या इत्युक्ते Curriculum इति । अयं शब्दः Currare इति लेटिन् शब्दात् निष्पन्नः भवति । यस्यार्थः भवति Race course अथवा Runway इति अर्थात् “धावनस्थलम्” । पाठ्यचर्या बोधनकार्ये समालोचितः भवति । यस्यानुसारेण छात्राः स्वीयलक्षणानि आदर्शम् अभिलाषञ्च सम्पादयितुं शक्नुयुः ।

**पाठ्यचर्यायाः परिभाषा -** कनिंघ्हां महोदयानुसारं पाठ्यचर्या कलाकारस्य (शिक्षकस्य) हस्ते विद्यमानमेकमुपकरणं भवति । तामेव सामग्रीं छात्रः स्वीयाशानुगुणं कलाभवने परिवर्तयिष्यतीति ।

**पाठ्यचर्यायाः अर्थः -** 1. अध्ययनक्षेत्रम् - पाठ्यचर्यायां पाठ्यमानविषयस्य विचारः क्रियते । प्रथमतः अध्ययनक्षेत्रे किं किं पठनीयम् ? विषयवस्तुः किम् ? तस्य समयसीमा का ? इति सर्वत्र वर्णनमस्ति । सर्वदा अध्ययनक्षेत्रेषु सीमाङ्कनम् आवश्यकम् ।

2. सामाजिकपर्यावरणम् - सामाजिकपर्यावरणमपि पाठ्यचर्यायाः प्रमुखाङ्गं वर्तते । अस्माकं समाजे यत् पर्यावरणं वर्तते तत् पाठ्यचर्यां प्रभावयति ।

**पाठ्यचर्यायाः स्वरूपम् -** 1. पाठ्यचर्या एका योजना वर्तते - यत् एकवर्षात्मककाले कथं पाठनीयम् ? कथं पाठ्यक्रमः निर्मातव्यः ? एवं विचिन्त्य पाठ्यचर्यायाः निर्मातव्या । कथं करणीयम्? किं करणीयम् ? कीदृग्रूपेण करणीयम् ? एताः योजनाः वर्तन्ते ।

2. योजनायाः आधारः भवति निर्णयः - एकवर्षात्मककाले पठनार्थं यत् पाठ्यवस्तु निर्मितं तस्य सुचारुरूपेण पाठनीयम् । एवञ्च योजनाबद्धरीत्या सर्वेषां सहमत्या एव पाठ्यक्रमः भवितव्यः।

**पाठ्यचर्यायाः महत्त्वम् -**

1. अध्ययनक्षेत्रं भवति पाठ्यचर्या। पाठ्यचर्यायाः अर्थः भवति धावनक्षेत्रम् "Curriculum is a Run way"।

2. पाठ्यचर्या अधिगमं प्रेरयति - आदौ पाठ्यचर्या भवति तत्र अनेके विषयाः सम्मिलिताः भवन्ति। एवञ्च अस्माभिः एतेषां विषयाणाम् अध्ययनं तदनन्तरं रुचिः भवति।

3. छात्राणां कृते दिशानिर्देशने प्रेरयति - अस्मिन् क्षेत्रे छात्रैः किं करणीयम् ? कः विषयः ग्रहणीयः? एतस्मिन् विषये पाठ्यचर्या छात्रान् प्रेरयति।

## पाठ्यचर्यापाठ्यक्रमयोर्मध्ये अन्तरम्

**सारदा प्रसाद नाथ**
शिक्षाशास्त्रिद्वितीयवर्षम्

**पाठ्यचर्या -**

1. अस्याः सम्बन्धः विद्यालयस्य सर्वाभिः क्रियाभिः सह भवति।
2. इयं शारीरिक – मानसिक – सांवेगिक - क्रियात्मकपक्षैः सह सम्बन्धितः भवति।
3. अस्याधारेण शिक्षकः छात्रेभ्यः सूचनां सम्प्रेषयति।
4. अस्याः क्षेत्रं व्यापकं विस्तृतञ्च भवति।
5. अस्यां पाठ्यक्रमः अन्तर्भवति।
6. अस्यां विविधविश्वासपक्षाणां क्रियाः अन्तर्भवन्ति।
7. बालकानां सर्वाङ्गीणविकासः जायते।

**पाठ्यक्रमः -**

1. अस्य सम्बन्धः कक्षान्तः सर्वभिः क्रियाभिः सह भवति।
2. एतस्याः आधारेण विद्यासये विविधक्रियाणां क्रियान्वयनं क्रियते।
3. अयं बालकस्य ज्ञानात्मकपक्षेण सह सम्बन्धितः भवति।
4. अस्य क्षेत्रं संकुचितं भवति।
5. अयं पाठ्यचर्यायाः एकः अंशः भवति।
6. अस्मिन् ज्ञानस्य विकासात्मिकक्रियाः सम्पाद्यन्ते।
7. अनेन बालकानां ज्ञानात्मकविकासः जायते।

**पाठ्यपुस्तकस्य संकल्पना -** पाठ्यविधिवत् क्रमानुसारं घटकानामुल्लेखनम् - 1997

**विषयवस्तु -**

1. विकासात्मकेतिहासः - पाठ्यपुस्तके यत् वस्तु वर्तते तत् वस्तु क्रमानुसारं स्यात्। यथा- आधुनिककविः वाल्मीकिः भवेत्। तस्य वर्णनम् आदौ एव भवेत्। व्यवस्थितरूपेण वस्तु दृश्यते।
2. उपागमः उपागमः - इत्युक्ते विशिष्टसिद्धान्ताः । यथा -लेखकः लेखकगणः वा तेषां सिद्धान्तेषु व्यवस्थितक्रमः अस्ति। यथा सरलात् कठिनं प्रति।
3. उद्देश्यम् - पाठ्यपुस्तके बहूनि उद्देश्यानि भवन्ति तानि उद्देश्यानि उपयुक्तानि सन्ति न वा , यदि नास्ति तर्हि पाठ्यपुस्तकेन को लाभः ? अवगच्छन्ति, जानन्ति, वक्तुं पारयति, वक्ष्यति एवम् उद्देश्यं स्यात्।
4. चर्चनीयाः विषयाः -साम्प्रतिककाले किं चलति ? समाजे मूल्यानाम् अनुप्रयोगः किमर्थं नास्ति । अर्थात् पाठ्यपुस्तके विरोधितत्त्वं न स्यात् सकारात्मकचिन्तनधारा आवश्यकी अस्मिन् सन्दर्भे।
5. एकाङ्कक्षेत्रम् -एकाङ्कक्षेत्रम् इत्युक्ते विषयसामग्रीणां विस्तारः । यथा- अभ्यासकार्याणि, कवीनां चयनम्, ऐतिहासिकतत्त्वादयः एतस्य विस्तारक्षेत्रं भवति।
6. व्यवस्थितक्रमः -व्यवस्थितक्रमः इत्युक्ते विषयसामग्रीणाम् उपस्थापनम्। एते सर्वे विषयाः विषयवस्तुनः मध्ये मध्ये आगच्छति।

**अनुदेशनम् -**

**स्पष्टता -** विषयकथने व्यख्याने भाषायां सर्वत्र स्पष्टता आवश्यकी।

**वैयक्तिकता -** इत्युक्ते सर्वेषु छात्रेषु अवधानं स्यात्।

**अधिगमः -** अधिगमः सरलतया भवेत् तादृशं उपस्थापनं स्यात्। यावत् सरलं तावत् स्पष्टम् तावत् एव अधिगमः स्यात्।

**मूल्याङ्कनम् -** विश्वासः ही विश्वसनीयता भवति । विश्वासः एव ईश्वरः भवति । अत एव मूल्याङ्कने विश्वसनीयता भवेत्। गुणग्राही भवेत्। मूल्याङ्कने अपि वैधता स्पष्टता आवश्यकी। मूल्याङ्कनस्य कार्ये गभीरता स्यात्।

**अध्यापकानां दायित्वम् -** अध्यापकः नियमेषु कार्येषु कर्तव्येषु ऐक्यता भवेत् । आदौ व्यवस्थितरूपेण कक्षां प्रति गमनम्। पूर्वसन्नाहः, अध्यापकेषु परस्परं समन्वयः भवेत्। अध्यापकः

छात्रान् प्रेरयेत् । अर्थात् अध्यापकः सर्वदा छात्राणामभिप्रेरकः भवति । यः अध्यापकः उत्तमशिक्षणकार्यं करोति सः भाविनिकाले आदर्शः अध्यापकः भवति।

**प्रकाशनम् -** लेखकः योग्यः भवेत् । योग्यलेखकः शुद्धम् उत्तमञ्च लेखिष्यति । मूल्ययुतं लेखनं भवेत् । मूल्यं स्तरानुगुणं भवेत् । पुस्तकस्य सौन्दर्यम् आवरणचित्रं च सुन्दरं भवेत् । पृष्ठसंख्या पुस्तकस्य सर्वदा छात्राणां विकासस्य गुणवत्तावर्धनाय निर्मितमेव भवति । अत एव पाठ्यपुस्तकं सर्वदा छात्राणां कृते उत्तममार्गदर्शनं भवति।

## वैदिकशिक्षायां गुरुशिष्यसम्बन्धः

**सहदेव प्रधान्**

शिक्षाशास्त्रिद्वितीयवर्षम्

वैदिकशिक्षाप्रणाली विश्वस्य आद्यशिक्षणप्रणालीति कथ्यते । शिक्षाप्रणाली कदा प्रादुर्भूता इत्यस्मिन् विषये विद्वत्सु अपि ऐकमत्यं नास्ति । अवलोकयामः चेत् वैदिकशिक्षाप्रणाली न केवलं भारतस्य अपि तु विश्वस्य एव प्राचीनशिक्षाप्रणाली इति सर्वैः विद्वद्भिः मुक्तकण्ठेन उद्घोष्यते । तत्रापि सम्पूर्णभारतस्य इतिहासः आचार-विचाराः, जीवनपद्धतिः, संस्कृतिः, धर्मः, जनजातिविशेषताश्च वेदेषु एव अन्तर्भवन्ति । वेदस्यापि निर्दिष्टः कर्ता नास्ति । ब्रह्मणः आहोस्वित् सृष्टिकर्त्तुः मुखारविन्दात् निसृतं वेदराशिं ऋषयः महताप्रयासेन एव प्राप्तवन्तः । अत एव उच्यते - "मन्त्रद्रष्टारो ऋषयः" इति एवं भगवतः ब्रह्मणः मुखारविन्दात् निर्गतम् अखण्डं वेदवाणी, व्यासः लोकस्य सुखबोधाय पृथक् कृतवान्। अत एव तस्य वेदव्यासः इति नाम । वेदं पृथक्करोति इति वेदव्यासः। अखण्डः वेदः वेदव्यासेन "ऋग्यजुस्सामाथर्वेति" चतुर्धा विभक्तः । एतेषु चतुर्षु वेदेषु शिक्षायाः, शिक्षकस्य, पाठ्यक्रमस्य, गुरुशिष्यसम्बन्धस्य, अनुशासनस्य, शिक्षणविधीनाञ्च विषये अनेकानि प्रमाणानि उपलभ्यन्ते।

"सा विद्या या विमुक्तये" इतीदम् उपनिषद्वाक्यं वैदिकशिक्षायाः अन्तिमलक्ष्यं किमिति स्पष्टीकरोति । विद्या शिक्षा इति अनर्थानन्तरम् । विमुक्तेः अथवा मोक्षस्य स्वरूपं वैशिष्ट्यञ्च वैदिकवाङ्मयेषु उपपादितं वर्तते । वैदिकशिक्षाप्रणाल्यां छात्रः गुरुकुले स्थित्वा गुरोः सर्वविधसेवां कुर्वन् विद्याम् अधिगच्छति स्म । अत एव अस्याः प्रणाल्याः गुरुकुलशिक्षाप्रणाली इति नामान्तरं वर्तते।

गुरुकुलशिक्षाप्रणाल्यां शिक्षा मौखिकी आसीत् । उपनयनसंस्करात्परं बालकं संरक्षकाः गुरुकुलं प्रेषयन्ति स्म । अष्टमे वयसि उपनीतः गुरुकुलं च प्रविष्टः बालः समावर्तनसंस्कारसन्दर्भे

उच्चविद्यां प्राप्य गुरुदक्षिणां प्रदाय गृहं प्रत्यागच्छति स्म । एवं षोडशे अथवा सप्तदशवर्षेषु अध्येतुं योग्यः पाठ्यक्रमः वैदिककीले आसीत् । नाम प्राथमिकस्तरादारभ्य उच्चशिक्षां यावत् विद्यां प्राप्तुं पाठ्यक्रमे अवसरः आसीत् ।

**गुरुः -**

वैदिकयुगे गुरोः गौरवम् आसीत् । गौरवमिदं विविधेषु सन्दर्भेषु गीतं वर्तते । गुरुस्तु त्रिदेवः तथा च परब्रह्ममयः आसीदिति प्रसिद्धमेव -

गुरुब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

यः गुरुसन्निधौ न पठति स्म केवलं पुस्तकादेव पठति स्म तस्य आदरः नासीत् । ब्रह्मज्ञानाय अपि गुरुः एव आश्रमे आसीत् । देवा असुराश्च तस्यान्तेवासिनो बभूवुरिति बृहदारण्यके वर्णितम् । तस्मिन् समये गुरोः परं किमपि तत्त्वं नासीत् ।

प्राचीनभारते त्रिप्रकारकाः गुरवः भवन्ति स्म । आचार्यः, गुरुः, उपाध्यायश्च । आचार्यस्तु समस्तान् संस्कारान् परिपूर्य वेदशिक्षां ददाति स्म । आचार्यशिष्ययोः समानमासीत् महत्तवम् । यास्काचार्योऽपि निरुक्ते आचार्यपदस्य व्युत्पतिं विदधति स्म -

आचार्यः कस्मात् आचारं ग्राहयति ।
आचिनोति बुद्धिमिति वा ॥ निरुक्तम् 1/3

आचार्यः ब्रह्मचारिणे सदाचारस्य शिक्षां प्रदाय तस्य जितेन्द्रियत्वं पोषयति स्म । आचार्यस्तु अनुशासनप्रियत्वात् न्यायप्रियत्वात् यमतुल्यः पक्षपातरहितत्वात् छात्राणां कृते अज्ञानव्याधेः निवारकत्वात् अपि कथ्यते स्म ।

आचार्यस्य हार्दिकम् इच्छा आसीत् यत् तस्य शिष्याः निरन्तरम् अधिकाधिकज्ञानविज्ञानप्रकाशिताः भवेयुः इति । आचार्यजीवनस्य साफल्यमासीद् यत् स ज्ञानसन्ततिं वर्धयति स्म । वैदिककालिकाः कतिपयाः प्रसिद्धतमाः आचार्याः आसन् । तद्यथा – गृत्समदः, विश्वामित्रः, वामदेवः, अत्रिः, सत्यश्रवः, भारद्वाजः, वशिष्टः, देवातिथिः, गौतमः, अपाला, कश्यपः, ऋषभः, कण्वः, पराशरः, मनुः, नारदः, बृहस्पतिः, व्यासश्चेत्यादयः । एते आचार्यास्तु महामानकाः कर्मठाः कृतभूरिपरिश्रमाः सर्वथा आदर्शाश्चासन् । एते छात्राणाम् उपनयनं कारयित्वा वेदशिक्षां ददति स्म ।

गुरुस्तु शिक्षकस्य समानपदम् । अतीव प्रचलितमासीत् पदमिदं प्राचीनकाले । “गिरति अज्ञानान्धकारम् इति गुरुः” अनया व्युत्पत्त्या ये स्वोपदेशैः शिष्यस्य अज्ञानान्धकारम् नाशयति स्म। स्वशिष्याणां गर्भाधानादिसंस्कारान् सविधिम् सम्पादयन्ति स्म । तेषां कृते भोजनादीनां व्यवस्थामपि कुर्वन्ति स्म । गुरवः शिष्याय सर्वदा उपदेशमपि प्रयच्छन्ति स्म ।

**शिक्षायाः उदेश्यम् - 1. मोक्षप्राप्तिः -** तदानीं चतुर्वर्गस्य अवधारणा प्रचलिता आसीत् । तत्र चतुर्वर्गेषु धर्मार्थकाममोक्षेषु चतुर्थस्य प्राप्तिरासीत् शिक्षायाः अनन्यमुद्देश्यम् । सा विद्या या विमुक्तये - इति स्पष्टतया घोषयति शिक्षोद्देश्यम् । विविधेषु प्रसङ्गेषु वैदिकवाङ्मये मोक्षप्राप्तेरुपायाः प्रदर्शिताः वर्तन्ते । जीवन्मुक्तः विदेहमुक्तश्चेति मुक्तेः अवस्थाद्वयं वेदान्ते वर्तते निरूपितम् । यत्र भवति जीवन्मुक्तः स तु जन्मबन्धनाज्जायते विमुक्तः । यो ब्रह्मज्ञः स एव मोक्षप्राप्तये । ब्रह्मज्ञानं भवति सर्वेषां विद्यानां सारभूतम्। ब्रह्मविदः मुखे काचित् अवर्णनीया प्रभा दृश्यते इति छान्दोग्योपनिषदि निदर्शितम्।

**2. धर्माचरणम् -** वैदिकयुगे शिक्षायाः सम्बन्धः धर्मेणासीत् । वस्तुतः वैदिकी शिक्षा तु धर्मानुप्रणीता आसीत् इति प्रतिपादितं मनुस्मृतौ “वेदोऽखिलो धर्ममूलम्” । दशलक्षणात्मकं धर्मं मन्यते । एतैः दशलक्षणैः समन्वितमाचरणं गुरुशिष्याणामासीदपेक्षितं शिक्षया । अस्मिन्नेव ईश्वराराधनमपि शिक्षणे आसीदपेक्षितम् । सर्वेषां कार्याणां ईश्वरं प्रति समर्पणेन निष्कामकर्मकुर्वाणोऽन्तेवासिनः आचार्यकूले वसन्ति स्म । आध्यात्मिकज्ञानस्य पिपासालवः शिष्याः तस्य ज्ञानस्य गौरवेण सुपरिचिताः आसन् ।

**3. शारीरिकविकासः -** वैदिकयुगे नियमितदिनचर्यया शारीरिकविकासः प्रवर्तित आसीत् । हिताहारविहारेण गुरुशिष्याणां शारीरिकविकासो संरक्षितः आसीत् । देवैरपि शारीरिकविकासस्य प्राप्त्युपायान् आसन् याचिताः । विविधैः अङ्गैः सह आयुषः कामना अभीष्टः आसीत् मानवानां याज्ञिकानां च कृते । शरीरे बलस्य औजसः च सञ्चरणं भवेदिति स्तुतिः प्राप्यते वेदे । विविधानां आसनानां साहाय्येन शरीरपोषणेन सह प्राणायामादिना मनसः नियन्त्रणाभ्यास तदानीं क्रियते स्म । यतो हि आत्मनैव आत्मनः विकासः भवितुमर्हति इति ।

## अनुबन्धचतुष्टयनिरूपणम्

**नरेन्द्र कुमार जेना**

शिक्षाशास्त्रिद्वितीयवर्षम्

**प्रास्ताविकम् -** अखण्डब्रह्माण्डस्य चित्रोपस्थापनात् प्राक् एकं सच्चित्स्वरूपं परमात्मापरमेश्वरः अनन्यसत्यस्वरूपं कर्तृकर्त्रीत्वेन विभागं चकार । तेन विभागेन ब्रह्माण्डस्यास्य गौरवमस्माभिः अनुभूयते । सृष्टौऽस्मिन् उद्भिदात् आरभ्य मनुष्यं यावत् प्राणिनां कर्माकर्मञ्च तेनैव विधिना सम्पादितः। सर्वेषां प्राणिनां मुख्यकर्म भवति भगवत्प्राप्तिः इति । तच्च कथमित्युक्ते श्रूयते भगवद्गीतायां भगवद्वचनं यथा - कर्मण्येवाधिकारस्ते............।। अर्थात् सर्वेषां प्राणिनामत्र नाम सृष्टौऽस्मिन् अधिकारः केवलं कर्मसु एव भवति। तस्य कर्मणः कानिचन अङ्गानि सन्ति। वस्तुतः इदं च कर्म मनुष्याणां कृते अतीव शोभनीयं सुष्ठु च प्रदीयते । यतोहि ब्रह्मसृष्टौ ''मनुष्यः खलु श्रेष्ठप्राणी'' तदर्थमुच्यते अग्निपुराणे - ''नरत्वं दुर्लभं लोके...........।।'' इति । अयं च मनुष्यः नित्यानित्य सदसत् इत्यादीनां ज्ञानं जन्मनारभ्य एव प्राप्नोति। अतः अयं यानि कर्माणि करोति, तस्य कार्यस्य कारणभूतत्वेन अनुबन्धचतुष्टयस्य व्यवहारमपि विचिन्त्य करोति। ततः सः साधकः स्वलक्ष्यं साधयति। तच्च अनुबन्धचतुष्टयं किम् इति चेत् – अधिकरी, विषयः, सम्बन्धः, प्रयोजनम् इति।

**अधिकारी -** अधिकारी तु विधिवदधीत-वेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा, काम्यनिषिद्धवर्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता । अर्थात् एवं गुणगणविशिष्टः प्रमाता एव वेदान्तशास्त्राध्ययनस्य अधिकारी भवति।

**काम्यानि -** स्वर्गादीष्टसाधनानि। उदाहरणम् - ज्योतिष्टमयागादीनि।

**निषिध्दानि -** नरकाद्यनिष्टसाधनानि। उदाहरणम् - ब्राह्मणहननादीनि।

**नित्यानि -** अन्यकरणे प्रत्यवायसाधनानि। उदाहरणम् - सन्ध्यावन्दनादीनि।

**नैमित्तिकानि -** पुत्रजन्मादनुबन्धानि। उदाहरणम् - जातेष्ट्यादीनि।

**प्रायश्चित्तानि -** पापक्षयसाधनानि। उदाहरणम् - चान्द्रायणादीनि।

**उपासनानि -** सगुणब्रह्मविषयमानसव्यापाररूपाणि। उदाहरणम् - शाण्डिल्यविद्यादीनि।

**विषयः -** विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं तत्रैव वेदान्तानां तात्पर्यात् । व्याष्टिसमष्टिगताज्ञानविजृम्भितं किञ्चिज्ञत्व सर्वज्ञत्वादि विरुध्दधर्मान् परित्यज्य अवशिष्टं नित्यशुध्दबुध्दब्रह्मस्वरूपं शुध्दचैतन्यं तदेवास्य वेदान्तस्य विषयः।

**सम्बन्धः -** शुध्दचैतन्यं तत्प्रातिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावः सम्बन्धः।

**प्रयोजनम् -** प्रयोजनं तु तद्गताज्ञाननिवृत्तिपूर्वकं स्वरूपानन्दावाप्तिः ब्रह्मभाववान् मोक्षप्राप्तिर्वा।

## आदर्शवादः शिक्षा च

**टोनि प्रियदर्शनी सोरेन्**

शिक्षाशास्त्रिद्वितीयवर्षम्

मानसिकप्रपद्ये आध्यात्मिकभावनानां कृते प्राधान्यं दीयते। अत एव आध्यात्मिकप्रपञ्चः इति अस्य नाम । अयम् आध्यात्मिकप्रपञ्च एव भाववादः आहोस्वित् आदर्शवादः इति व्यवह्रियते। अस्यैव आङ्ग्लनाम ''Idealism'' भवति। अयं च Idealism इति शब्दः प्लेटो (plato) महोदयानामाध्यात्मिकसिद्धान्तात् निःसृतः इति वदन्ति पाश्चात्त्याः । तद्यथा ''अन्तिमवास्तविकता विचारे अथवा विचारवादे निहितास्ति'' इति। अत्र ''idea'' एवं ''ism'' इति पदद्वयं विद्यते। ''idea'' इत्यस्य अर्थः 'विचारः' ''ism'' इत्यस्य अर्थः 'वादः' इति। एवञ्च Idealism = विचारवादः आहोस्वित् आदर्शवादः इत्यर्थः फलितः।

**आदर्शवादस्य परिभाषा -** आदर्शवादिनां विश्वासोऽस्ति यद् ब्रह्माण्डस्य स्वीया बुद्धिः इच्छा च वर्तते। समस्तभौतिकवस्तूनां स्पष्टीकरणं मनसा कर्तुं शक्यते इति – रोजन्।

**आदर्शवादः शिक्षा च -** आदर्शवादे विचाराणाम् आदर्शनां च कृते महत्त्वं दीयते। व्यक्तेः शरीरस्य महत्त्वं न भवति, अपि तु तस्य व्यक्तित्वस्य महत्त्वं भवति। व्यक्तित्वम् आदर्शानां विचाराणाञ्च मिश्रणमेव भवति। शिक्षा एका सोदेश्या प्रक्रिया भवति यत्र च व्यक्तित्वस्य निर्माणं क्रियते। अत एव एते वदन्ति यत् शिक्षा मानवस्य निर्माणं करोति इति। प्रसिद्धः अमेरिका आदर्शवादिदार्शनिकः मर्हेनहेरिलर्हार्नमहोदयस्य कथनम् अस्ति यत् 'व्यक्तित्वनिर्माणे तिस्रः शक्तयः कार्यं कुर्वन्ति । वातावरणं, वंशपरम्परा, संकल्पशक्तिश्चेति' । सः अवदन् शिक्षा एतासां शक्तीनां सहयोगेन प्रचाल्यमाना काचित् प्रक्रिया एव न तु पृथक् किमपि तत्त्वम् इति।

**आदर्शवादः शिक्षोद्देश्यानि च -** आदर्शवादानुसारं यदि शिक्षायाः उद्देश्यं विविच्यते तर्हि वेदेषु शिक्षोद्देश्यरूपेण अध्यात्मज्ञानम्, आस्तिक्यम्, शारिरिक-वाचिक-मानसिक-आर्थिक-बौद्धिक-समुन्नतिः प्रतिपाद्यते। एवं सर्वविधसमुन्नत्याऽन्तेवासी सर्वदेवाधिवासः सम्पद्यते। वैशेषिकदर्शने 'यथोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' इत्यनेन धर्मलक्षणेन सदैव शिक्षाया उद्देश्यम् अभ्युदयस्य निःश्रेयसस्य चावाप्तिरिति निर्दिश्यते। 'सा विद्या या विमुक्तये' ऋते ज्ञानान्न मुक्तिः, इत्यादिभिः

सुभाषितैः 'सा शिक्षा या ब्रह्मगतिप्रदा' इति शङ्कराचार्यवचनेन चाध्यात्मज्ञानावाप्तिमोक्षाधिगमश्च शिक्षाया लक्ष्यं निर्धार्यते।

**आदर्शवादः पाठ्यचर्या च -** पूर्वप्रदर्शितानाम् उद्देश्यानां सम्पादनार्थं निश्चिता पाठ्यचर्या आवश्यकी इति आदर्शवादिनाम् आशयः। हार्नमहोदयः वदति यत् - पाठ्यचर्या आदर्शकेन्द्रिता भवेत्, न तु बालकेन्द्रिता इति। आध्यात्मिकविकासाय, नैतिकविकासाय उत्तमादर्शानां विकासाय च उपयुक्ता विषयाः पाठ्यक्रमे स्थापनीयाः इति आदर्शवादिनः वदन्ति।

प्लेटोमहोदयानुसारं पाठ्यचर्यायाः विचारः –

पाठ्यचर्या

मानसिकक्रिया | सौन्दर्यात्मकक्रिया | नैतिकक्रिया

**आदर्शवादः अध्यापनपद्धतयश्च -** बट्लर्महोदयस्य कथनात् ज्ञायते यत् आदर्शवादिनः एकस्य विधेः अनुसरणं न अपि तु भिन्नभिन्नविधीनां निर्माणं कृत्वा स्वविचारान् प्रकटितवन्तः। तद्यथा साक्रेटिस् महोदयेन प्रश्नविधेः, प्लेटोमहोदयेन सम्वादविधेः, होगलमहोदयेन तर्कविधेः, हर्बर्ट महोदयेन निर्देशन-विधेश्च अनुसरणं कृतम्।

**आदर्शवादः अनुशासनञ्च -** अनुशासनमाभूषणं भवति जीवनस्य, न हि अनुशासनमन्तरा जीवनं सुशोभते। अनुशासनं हि जीवनस्य सर्वान् कार्यकलापान् प्रभावयति इति आदर्शवादिनाम् आशयः। व्यक्तेर्व्यक्तित्वञ्चानेन दीव्यति। इत्थमनुशासनमस्माकं जीवनसर्वस्वं बोभूयते इति उद्घोषयन्ति आदर्शवादिनः।

**आदर्शवादः गुरुशिष्यसम्बन्धश्च -** आदर्शवादे शिक्षणप्रक्रियायाः द्वे प्रमुखे अङ्गे भवतः। तत्र प्रमुखाङ्गत्वेन गुरुः द्वितीयाङ्गत्वेन शिष्य इति। यावत्पर्यन्तम् अनयोर्मध्ये मधुरतमः स्नेहयुक्तश्च सम्बन्धो न भवेत्, तावत्पर्यन्तं शिक्षणं न कल्याणकरं, फलदायकञ्च भवतीति आदर्शवादिनाम् आशयः। आदर्शवादिनां मते गुरुशिष्यसम्बन्धः दृढतरः भवतीति भाष्यवचनात् प्रतीयते।

**आदर्शवादस्य शैक्षिकसिद्धान्ताः -**

1. शिक्षायाः उद्देश्यम् आत्मसाक्षात्कारः।
2. शिक्षा आध्यात्मिकी नैतिकी च प्रक्रिया वर्तते।
3. परमात्मनः तत्त्वं प्रति अग्रेसरणं प्रमुखम्।

**आदर्शवादस्य मूल्याङ्कनम् -**

1. आदर्शवादे बालकस्य व्यक्तित्वस्य आदरः क्रियते।
2. बालेषु सत्यं शिवं सुन्दरमित्यस्य विकासः क्रियते।
3. आत्मानुशासनस्य आत्मनियन्त्रणस्य च महत्त्वं दीयते।

## व्याकरणशास्त्रम्

**राणाप्रतापपण्डा**

शिक्षाशास्त्रिद्वितीयवर्षम्

वेदपुरुषस्य षडङ्गेषु इदमपि किञ्चन अङ्गम्। तत्र च प्राप्यते - ''मुखं व्याकरणं स्मृतम्''। इदं शास्त्रं मुखमिति अभिधीयते।

लक्षणम् - व्याक्रियन्ते व्युत्पाद्यन्ते अनेन इति व्याकरणम्।
अस्य व्याकरणशब्दस्य व्युत्पत्तिः वर्तते - ''वि+आ+कृ+ल्यूट्''।

भारतीयपरम्परायां प्रत्येकं शास्त्रस्य किमपि प्रयोजनं वर्तते । तद्वत् अस्य व्याकरणशास्त्रस्यापि प्रयोजनं भूयते -'' रक्षोहागमलघ्वसन्देहाः प्रयोजनम्'' इति।

**रक्षा -** व्याकरणाध्ययनावगतवर्णलोपागमवर्णविकासे गृहीतप्रकृतिप्रत्ययविभागो वेदान् पालयिष्यतेत्येतदर्थमध्येयं व्याकरणम्।

**ऊहा -** प्रकृतिविकृतिः कर्त्तव्येति मीमांसाकसिद्धान्तात् प्रकृतियोगे पठितस्य अग्नये त्वा जुषुं निर्वापामिति मत्रस्थाग्निपदस्य सौर्यं चरू निर्वपत् ब्रह्मवर्चसकाम इति सौर्य चरौ विकृतियोगे सूर्यसम्बन्धिनिर्वाणप्रकाशनाऽसमर्थत्वात्तदपहाय तत्स्थने सूर्यायेत्यूहार्थमध्येयं व्याकरणम्।

**आगम -** ब्राह्मणेन निष्कारणेत्यादि धृता व्याकरणस्य पदपदार्थावगमद्वारा वाक्यार्थावगमोपयोगित्वात्तत्तदनध्ययनप्रयुक्तस्य वेदार्थाऽज्ञानप्रयुक्तस्य च प्रत्यवादस्य परिहारार्थम् अध्येयं व्याकरणम्।

**लघु -** शब्दानामनन्यात् प्रक्रियारूपलघुभूतोपायज्ञानर्थमध्येयं व्याकरणम्।

* लाघवार्थं व्यकरणस्याध्ययनं कार्यम्। ब्राह्मणः सुष्टु शब्दान् जानीयात्।

* व्याकरणशास्त्रोपेज्ञायं ना व्यत् शास्त्रं यद्युतं सम्पादयति सम्भवोऽपि नास्ति।

* विशिष्टार्थः - व्याकरणद्वारा शब्दानां शुद्धज्ञानं प्राप्यते । तस्मात् अध्येता वक्ता वा शुद्धम् एवं सुन्दरः प्रवक्ता भविष्यति, तस्य वाग्पटुतायाः विषये सर्वत्र प्रशंसां प्राप्नोति । ततः तस्य शिष्याः पौनःपुण्येन प्रतिदिनं प्रवर्धमानाः भवन्ति ।
* स च आचार्यः उत्तमकोटिमध्ये गणितो भवति ।

**असन्देहः -** न संन्देहः असंन्देहः । असंन्देहः साध्येयं व्याकरणम् । याज्ञिकाः पठन्ति - ''स्थूलपृषतिमाग्निवारुणीमनङ्गवाहीमालभेतेत्यत्र''

संन्देहः - स्थूला चासौ पृषति च स्थूलपृषती तत्पुरुषोः स्थूलानि पृषन्ति यस्याः सा इयं स्थूलपृषतीति बहुव्रीहिर्वा इति । अर्थः - असन्देहार्थम् अपि अध्येयं व्याकरणम् । वेदप्रियो अग्निम् एवं वरुणदेवता सम्बध्दयोगे स्थूलपृषती अनडवाही गौः वा आनय । अनेन ज्ञायते यत् अत्र चिह्नेन न सम्बन्धः । तच्च चिह्नं स्थूलं स्यात् आहोस्वित् लघु, अत्यन्तं गवि न तु चिह्नेन ।

इमानि पञ्च व्याकरणशास्त्रस्य मुख्यप्रयोजनानि वर्तन्ते । इमानि परित्यज्य इतोपि त्रयोदश गौणप्रयोजनानि वर्तन्ते । गौणप्रयोजनानि यथा - 1. तेडसुराः । 2. दुष्टः शब्दाः । 3. यदधीतम् । 4. यस्तु प्रयुक्ते । 5. अविद्वांसः । 6. विभक्तिं कुर्वन्ति । 7. यो वा इमाम् । 8. चत्वारि । 9.उन्त त्वः । 10. सक्तुमिव । 11.सारस्वतीम्। 12. दसम्यां पुत्रस्य । 13.स्तुदेषो असि वरुणः इति ।

**परिशीलितग्रन्थसूची -** महाभाष्यम् ।

## अन्तर्जालम्

**सन्तोष कुमार सदार**

शिक्षाशास्त्रिद्वितीयवर्षम्

अन्तर्जालं नाम आङ्ग्लभाषायां Internet इति उच्यते । अन्तर्जालं जनानां मार्गप्रदर्शकः इतिवत् कार्यं करोति । संङ्गणकयन्त्रस्याविष्कारेण सूचनाप्रविधेः नूतनक्रान्तिः समागता । अन्तर्जालस्य साक्षात् सम्बन्धः सङ्गणकेन सह वर्तते । अन्तर्जालं सङ्गणकस्य विश्वविस्तृतस्वरूपं द्योतयति । अन्तर्जालम् अन्तारा‌ष्ट्रियजालबन्धस्य रूपं भवति । एकं सङ्गणकम् अन्येन सङ्गणकेन सह संयोज्यते तदा एतादृशसंरचनानां शृङ्खलां जालबन्धः (Network) इत्युच्यते । कोटिशः सङ्गणकैः निर्मितं जालम् अन्तर्जालमिति वक्तुं शक्यते । अन्तर्जालं जालबन्धानां

जालबन्धः भवति। जालबन्धः उपग्रहेण दूरवाण्या च सह संयोजितः भवति। Internet माध्यमेन अन्यैः सह सम्बन्धः स्थाप्यते। विश्वस्य एकस्मिन् स्थाने स्थित्वा अपरस्मिन् स्थाने किं प्रचलति तद् विषये सूचनां निमेषाभ्यन्तरे प्राप्तुं शक्यते। एतदर्थम् अन्तर्जालवितरणप्रणाली (Distribution system) इति नाम्ना प्रसिद्धः। अन्तर्जालं संक्षेपेण जालं (net, web) इत्यदिनामभिः उच्यते।

**अन्तर्जालस्य विकासक्रमः -** अन्तर्जालस्य आविष्कर्तातौ रोबट् ई कान्, विष्ट सर्फ च। 1जनवरी 1983 तमे वर्षे अन्तर्जालस्य आविष्कारं कृतवन्तौ। प्रारम्भे अन्तर्जालस्य उपयोगः केवलं सैनिकानां कृते एव आसीत्। ततः परं सामान्यजनानां कृते आरब्धवान्। ततः प्राक् सर्वप्रथमं 1962 जे.सी.आर्. लिकलिडर महोदयः internet इत्यस्य जालम् इति चिन्तनकार्यं न आरब्धवान्। 1966 तमे वर्षे ''DARPA'' इति संस्था ''आरपानेट्'' इति नाम दत्तवती। 1989 तमे वर्षे ''टिम वनर्स ली'' महोदयः (w.w.w.) विश्व व्यापकः "वेव" इति आरब्धवान्। 1996 तमे वर्षे आमेरिकादेशस्य स्टेनफोर्डविश्वविद्यालये गुगल (Google) इत्यस्य अनुसंन्धानम् आरब्धम्। एवं 1998 तमे वर्षे एतद् कार्यम् आगतम्। अनन्तरं 2000 तमे वर्षे अन्तर्जालस्य अत्यधिकदेशेषु संचालनप्रक्रिया च आरब्धा।

**अन्तर्जालस्य उपयोगः -** अन्तर्जालं सूचनाप्रविधेः क्षेत्रे एकं मुख्यम् अङ्गं भवति। अन्तर्जाले सर्वेषां विषयाणां ज्ञानमुपलभ्यते। अन्तर्जालस्य "E-chatting" माध्यमेन वार्तालापं कर्तुं शक्यते। अन्तर्जालस्य "E-mail" माध्यमेन शीघ्रमेव पत्रं प्रेषयितुं शक्यते। w.w.w. इति माध्यमेन सम्पूर्णं ब्रह्माण्डे प्रतिकोणे किं किं प्रचलतीति सर्वमपि ज्ञातुं शक्यते। ई.वाणिज्यद्वारा (E-commerce) धनस्य आदानप्रदानं स्थानान्तरणञ्च क्रियते। ई अधिगमस्य क्षेत्रे अभूतपूर्वं योगदानं ददाति।

**शिक्षाक्षेत्रे उपयोगिता -** सर्वेषु क्षेत्रेषु अन्तर्जालस्योपयोगिता महद् विद्यते। परन्तु आधुनिकशिक्षाक्षेत्रे उपयोगिता अस्य पूर्वापेक्षया अधिकं वर्तते। शिक्षाव्यवस्थानुसारं तया निर्दिष्टलक्ष्यानुसारम् अन्तर्जालस्योपयोगिता जनसमाजेषु दृश्यते। अन्तर्जाले शिक्षाक्षेत्रे दूरस्थशिक्षायाः महत्त्वं बहु दृश्यते। औद्योगिकक्षेत्रे विद्यमानाः जनाः स्वस्य योग्यतावर्धनाय दूरस्थशिक्षायाः उपरि निर्भरशीलाः भवन्ति। अस्याः शिक्षायाः वैशिष्ट्यं प्रक्रिया नियमाः च अन्तर्जालमाध्यमेन जनैः प्राप्यन्ते। अन्तर्जालं दूरस्थ शिक्षाशिक्षणयोः सम्बन्धं स्थापयति। अन्तर्जालमाध्यमेन शास्त्रसंरक्षणम्, ग्रन्थसंरक्षणम्, संस्कृतभषायाः प्रचारप्रसारमपि अति सरलतया कर्तुं शक्यते। अन्तर्जालशिक्षाप्रक्रियामाध्यमेन छात्राध्यापकाश्च स्वस्य योग्यतानां विशिष्टप्रयोगं

कर्तुं समर्थाः भवितुमर्हन्ति । सम्प्रति विभिन्न-औद्यगिकपरीक्षा अन्तर्जालमाध्यमेन प्रचलन्ति । अतः मूल्याङ्कनमपि समिचीनं भवति ।

**अन्तर्जालस्य गुणाः -** वैज्ञानिकयुगेस्मिन् अन्तर्जालस्य महत् योगदानं वर्तते । अस्य गुणाः शिक्षा-सूचना-सामाजिक-सांस्कृतिकमिति प्रत्येकस्मिन् क्षेत्रे वर्तन्ते ।

* अनेन सर्वस्मिन् विषये सर्वाः सूचनाः शीघ्रमेव प्राप्यन्ते ।
* छात्राणां जामिता दूरीभवति ।
* छात्राणां रुचिं वर्धयति ।
* पाठ्यविषयाः संरक्षिताः भवन्ति ।
* एकं पाठमिच्छानुसारं वारम्वारं पठितुं शक्नुवन्ति ।
* अत्र चित्रेण सह विषयज्ञानं प्राप्यते ।
* अत्र बहवः विषयाः एकत्रैव लभ्यन्ते । अतः छात्राः स्वयमेव अन्विष्य पठन्ति ।
* अत्र लेखनस्यावश्यकता नास्ति अतः समयस्य अपव्ययः न भवति ।

**अन्तर्जालस्य दोषाः -**

* बालकानां लेखन – भाषण – श्रवण - कौशलानां विकासः न भवति ।
* अत्र क्रीडादयः भवन्ति अतः समयस्य अपव्ययः भवति ।
* अनेन शीघ्रमेव नेत्रविकारः जायते ।
* केचन निर्धनिकाः छात्राः एतादृशं शिक्षणं प्राप्तुं न शक्नुवन्ति ।
* अनेन स्मृतिशक्तिः न वर्धते ।
* छात्राः अलसाः भवन्ति ।
* यद्यपि अन्तर्जालं जनानां मनोरञ्जनं कल्पयति, परन्तु जनानां समयस्यापव्ययः भवति ।

**निष्कर्षः -** अन्तर्जालस्य सुगुणाः दुर्गुणाः च वर्तन्ते । समाजस्य विकासाय आवश्यकता वर्तते । सम्प्रति भारतस्य प्रधानमन्त्री नरेन्द्रमोदीमहोदयः क्याबिनेट् द्वारा सूचितं यत् अन्तर्जाले विद्यमानानाम् अश्लील website इत्येतेषां निष्कासनं समाजस्य मङ्गलाय कृतः। अनेन कार्यानुष्ठानेन समाजस्यास्य भाविछात्राणां युवकानां च नैतिकाभिवृद्धिः वर्धते । एतादृशः कुमार्गः न प्रसरेत् इति सर्वकारः आकाङ्क्ष्यते ।

**सन्दर्भग्रन्थसूची -** शिक्षणस्यवैज्ञानिकाधाराः - वृन्दावन पात्रः - पुरी ।

# विवेकानन्दस्य मते गुरोः योग्यता

**अभिनन्द् सि. के.**

शिक्षाशास्त्रिद्वितीयवर्षम्

विवेकानन्दः उक्तवान् यत् "मम विद्याभ्यासदर्शनं गुरुगृहवासमिति" । गुरोः जीवितं विना विद्याभ्यासः न भवति इति । सर्वे इदानीन्तन विद्याभ्यससम्प्रदाये भेदः अस्ति चेदपि गुरोः योग्यताः समानाः वर्तन्ते ।

**गुरोः कार्यम् -** गुरुः सर्वशास्त्राणां सारांशं गृहीतवान् स्यात् । विश्वे सर्वे बैबिल्, वेदं, खुरान् इत्यादि ग्रन्थान् पठन्ति । ते तत् केवलं वाक्य - पद - शब्दव्युत्पत्तिदृष्ट्या एव पठन्ति । परं गुरुः सर्वमपि ग्रन्थजातं पठित्वा तस्य जीवनतत्त्वं किमस्ति इति ज्ञात्वा तस्य सारांशं किमिति ज्ञातवान् स्यात् । प्रत्येकं शास्त्रं तस्य शास्त्रस्य सारांशानुगुणं ज्ञातवान् स्यात् । तदेव गुरोः प्रथमं लक्षणम् ।

**परिशुद्धिः -** निष्पापत्वं भवति परिशुद्धिः । किमर्थं वयं गुरोः प्रकृतिं स्वभावशुद्ध्यादिकं पश्यामः । गुरुः यत् वदति तत् सत्यं वा असत्यं इति पश्यति चेत् अलं किल ? परन्तु विवेकानन्दः वदति एतत् अपर्याप्तमिति । आत्मतत्त्वं स्वस्य साक्षात्कारे वा अपरेषां कृते उपदेशरूपेण वक्तुम् अवश्यं हृद्भावः, आत्म (चित्त) शुद्धिः अपेक्षते । व्यक्तिः निर्मलः भवति चेदेव तस्य वाक्यस्य मूल्यं भविष्यति । वास्तविकरूपेण शक्तेः दानं भवति गुरोः कार्यम् । केवलं छात्राणां बुद्धिकार्यप्रयोगं न भवति ।

**उद्देश्यम् –** अत्र पाठनस्य उद्देश्यं किं भवेदिति वदति । गुरुः स्वार्थः न भवेत् । धनं, प्रशंसा इत्यादीनि कार्याणि उपलक्ष्य पाठनं न करणीयम् । स्नेहमिति परमं लक्ष्यमुपलक्ष्य एव पाठनीयम् । सर्वमनुष्याणां परिशुद्धस्नेहनिमित्तम् आत्मशक्तीनां योजनं स्नेहेनैव सिध्यति । धनमानाधिकं तस्य विघ्नकारी भविष्यतीति ।

**शिक्षकस्य योग्यता –**

**लाभेच्छा त्यक्तव्या -** सत्यं ज्ञातुं यः शिक्षामिच्छति सः लाभेच्छां विना गुरोः समक्षं गच्छेत् । विवेकानन्दः वदति अतिधनिकः सामान्यजनानामपेक्षया सत्यं किञ्चित् एव अवगच्छति । धनिकः स्वस्य धने, बले, सुखे, कामानुवर्तने एव चिन्तां करोति । यः रोदनं विना जीवनं करोति तस्य हृदयस्य स्थाने बृहत् पाषाणखण्डं भवति । ततः समृद्धिः किम् ? सुखं किमित्यादि कार्याणि ज्ञात्वा तानि त्यक्त्वा यः सत्यान्वेषणं करोति तदानीमेव लाभेच्छा नश्यति ।

**अन्तर्बहिरिन्द्रियाणां नियन्त्रणम् -** तीव्राभ्यासेन इन्द्रियाणामुपरि प्रकृतिशासनानाम् अवरोधं कृत्वा स्वस्य मनसः नियन्त्रणं कर्तुं सः सिद्धः भवेत् ।

**"न पाणिपादचपलो न नेत्रचपलो अनृजः ।**

**न स्याद् वाक्चपलभ्यैष न परद्रोहकर्मणि ॥"** मनुस्मृतिः

सः मनसा एवं वक्तव्यम् । त्वं मम अधीने अस्ति । अहं शासनं करोमि । किमपि मा पश्यतु । मा शृणोतु। अनन्तरं मनसः उपरि आधिपत्यं स्थापनीयम् ।

**"धृत्वा शिश्नोदरं रक्षेत् पाणिपादं च चक्षुषा ।**
**चक्षुः श्रोत्रे च मनसा मनो वाचं च विद्यया ॥ "** महाभारतम्, शान्तिपर्व

एवं मनोनियन्त्रणशाली भवेत् ।

**सहनशीलः भवेत् -** अस्माकं सर्वाणि कार्याणि विघ्नं विना गच्छति चेत् वयं चिन्तयामः जीवनं सुकरमिति । परन्तु कुत्रापि विघ्नः भवति चेत् मनोनिलायाः नाशो भविष्यति । एतत् अनुचितमस्ति । सुखस्य वा असुखस्य चिन्तां विना परिचर । प्रतीकारचिन्तां विना भिन्नां दुर्घटनामपि सोढुं सिद्धः भवेत्। सर्वलोकभयं स्वयमेव स्वीकृतवान् । अवहेलनादिकं सोढवान् । ये पीठीयाः सन्ति ते आगच्छन्तु अहम् अभयं दास्यामि इति उक्तवान् । एतदेव परमसहनं भवति ।

**गुरोरूपरि विश्वासः भवेत् -** गुरुशिष्ययोः सन्बन्धं पितापुत्रवत् भवेत् । तस्योपरि विश्वासः करणीयः । विश्वासं, अनुसरणं यस्य नास्ति तस्य पुरोगतिः न भवेत् ।

**"शरीरं चैव वाचं च बृद्धिरिन्द्रियमनांसि च ।**
**नियम्य प्राञ्जलिः तिष्ठेत् वीक्षमाणो गुरोर्मुखम् ॥"** मनुस्मृतिः

शरीरं, बुद्धिः, मनः पूर्वकं अधीत्य सह अञ्जलिं कृत्वा गुरोः मुखं दृष्ट्वा स्थातव्यम् ।

## भाषाबोधने उपयुज्यमानाः विविधाः पठनसामग्र्यः

**अभिजित् राजेन्द्रन्**
शिक्षाशास्त्रिद्वितीयवर्षम्

भाषापठनं सुकरं सुसज्जं च कर्तुं भाषाकक्षायाः दायित्वं मुख्यं वर्तते । छात्रेषु जिज्ञासाम् उत्पाद्य तेषु अभिप्रेरणां वर्धयित्वा पठनविषयेषु श्रद्धां यथाविधि कर्तुं च पठने विकासमार्जयितुं कक्षाप्रकोष्ठाः साहाय्यं कुर्वन्ति । अमूर्ताशयान् अव्यक्तवस्तूनि च सुव्यक्तरूपेण बोधयितुं बोधनोपकरणेभ्यः महत्त्वपूर्णं स्थानमस्ति । पठनप्रक्रियायां यथार्थबोधं दातुमेवं पठने जायमानां जामितां निवारयितुं बोधनोपकरणानि बहुधा उपयुज्यते । प्रत्येकं कक्षा अपि भिन्नमतिभ्यः छात्रेभ्यः सम्पन्नं भवति । तादृशं वैविध्यं मनसि निधाय सर्वे यथा अवगच्छेयुः तादृशीं पठनशैलीम् अवलम्बयितुं शक्यते चेदेव बोधनमिति शिक्षणोद्देश्यं पूर्णं भवति इति सर्वदा ज्ञेयम् । तत्र भवति विविधप्रकारकाणां बोधनोपकरणानां स्थानम् । तद्यथा -

**चलनचित्राणि निश्चलचित्राणि च -** एकस्मिन् समये दृश्यश्रव्यनुभवान् दातुं पर्याप्तं भवति एतादृशं आधुनिकोपकरणम् । यथार्थबोधं जनयितुं चलनचित्रे विद्यमानानि अङ्गानि साहाय्यं कुर्वन्ति । इदं माध्यमाधिष्ठितपठनं छात्राणां मनसि रूढिमूलं भवति । छात्राणां चिन्तनम्, आशयानां परिपोषणं, पठने उत्साहं वर्धयितुमपि च गुणात्मकपरिवर्तनं तेषां स्वभावे आनेतुम् एतादृशानि उपकरणानि साहाय्यं कुर्वन्ति । चलनचित्रदर्शनेन छात्राः आर्ज्यमानाः वस्तुतः पूर्वमेव द्रष्टुं चलनचित्रसंवादाः पाठभागेन संयुज्य संघाटयितुं च छात्रेभ्यः अभ्यासान् दातुं दृश्यश्रव्योपकरणानि साहाय्यं कुर्वन्ति ।

**इण्डराक्टीव् वैट् बोर्ड (IWB) -** गतपाठभागान् पुनरवलोक्य चिन्तनस्य विकासं कृत्वा छात्राणां पठनस्य नैपुण्यं विकासयितुं IWB इत्यस्य स्थानं प्रथमं भवति । Digital Projector संगणकेन (Computer) सह संयोज्य स्पर्शनम् इति इन्द्रियानुभवः ददाति IWB । संगणकात् चित्रं श्यामफलके दर्शयितुं प्रक्षेपकं (Projector) साहाय्यं करोति । श्यामफलके प्रत्यक्षरूपेण स्पर्शनं कृत्वा वा तस्य लेखनीम् उपयुज्य संगणकं नियन्त्रयितुं शक्यते । छात्राणां पठनप्रक्रियायाम् ऊर्जस्वितया भागं स्थापयितुं पठने उत्साहं वर्धयितुं च एतादृशोपकरणानि साहाय्यं कुर्वन्ति ।

**ओवर् हेड् प्रोजक्टर् (OHP) -** एकस्मिन् समये अध्यापकस्य कक्षाप्रकोष्टं प्रक्षेपकं च अभिमुखीकृत्य कक्षा सम्यक् रूपेण चालयितुं शक्यते इति अस्य वैशिष्ट्यम् । कक्षायामध्यापकस्य सजीवसान्निध्यं संस्थाप्य पाठभागान् जामितां विना प्रस्तोतुं शक्यते । भाषाध्ययनसन्बन्धाशयाः व्याकरणप्रश्नाः चित्राणि च एतादृशप्रक्षेपकयन्त्रेण बोधयितुमुत्तमं भवति ।

**डोक्युमेन्टरी -** अस्य उपज्ञाता अमेरिकादेशीयः रोबर्ट्.जे.फ्लावर्ट महोदयः भवति । तस्य प्रथमं चलनचित्रं नानूक् आफ् दि नोर्थ (Nanook of the North ) इति भवति । एस्किमो (Eskimo) एतेषां जीवनकथा भवति अस्य विषयः । एकं प्रमेयसम्बन्धं वा व्यक्तिनां विवरणसन्बन्धं वा, अभूत संभवविषये वा कलारुपेण विषये सम्बन्धं विवरणात्मकचित्रं भवति । डोक्युमेन्टरी (Documentaries) पाठ्यवस्तु सम्बद्धलघुचित्राणि विविधविद्यालयेषु अद्य कुर्वन्ति ।

**स्लैड् (Slide) -** उपरि सूच्यमानानाम् उपकरणानाम् अपेक्षया अल्पसमये निर्मातुं शक्यते अस्य प्रक्रियायाम् । विषयवस्तूनां बिम्बानि प्रदर्श्य अध्यापकेभ्यः सान्दर्भिकसूचनाः दातुं शक्यते । एवं छात्राणां विना प्रयासेन तत्र दृश्यमानाः सूचनाः स्वपुस्तके लेखितुं च शक्यते इति अस्य वैशिष्ट्यम् । पाठ्यविषयसम्बद्ध Slide अध्यापक-छात्रसाहाय्येन निर्मातुं शक्यते ।

**संगणकम् अन्तर्जालञ्च -** श्यामफलकादारभ्य संगणकपर्यन्तं भाषापाठनाय उपयोक्तुं शक्यते इति दृष्टवन्तः । तत्र आधुनिकपठनाय बहु साहाय्यं करोति संगणकम् । एतत् विशालरुपेण दृश्यमानसंगणकशृङ्खला भवति अन्तर्जालम् । एकेन अङ्गुलिस्पर्शनेन विद्यायाः अत्युत्तममस्माकं पुरतः उद्घाटयितुं शक्यते । World Wide Web इत्युक्ते सार्वलौकिकिकपालकः इति भवति खलु ।

## संस्कृतशिक्षणे नाटकशिक्षणस्य प्राधान्यम्

**गलील् .टि**

शिक्षाशास्त्रिद्वितीयवर्षम्

शिक्षणे नाटकपठनस्य प्रकटनस्य च मुख्यं स्थानं विद्यते । नाटकं केवलं वाचिकास्वादनं नास्ति। तत् मञ्चस्य पुरतः विद्यमानप्रेक्षकाणां कृते अवतरणीयः विषयः भवति । अधिगन्तृषु परस्परसहयोगः, अनुकरणशीलता, नेतृत्वम् इत्यादीनां विकासार्थं नाटकम् अत्यन्तमुपयोगी भवति । दृश्यं श्रव्यमिति काव्यद्वये दृश्यकाव्यस्य मुख्यत्वं नाटके अन्तर्भवति । नाटके विद्यमानमेकं कथापात्रं यः कोऽपि शिक्षार्थिना अभिनयेन दर्शयति चेत् तस्मिन् समये तस्य शारीरिक-मानसिककलानामायोगः च एकीभूय छात्रस्य अभिरुचिम् उन्नेतुं वयं द्रष्टुं शक्नुमः । भाषायाः प्रयोगरीतीनां संज्ञानं छात्राः मनसि निधाय नाटकावतरणेन सम्यक्तया ज्ञापयन्ति इति परीक्षणेन निर्णीतवन्तः । एकवर्षदीर्घपाठ्यक्रमे एकं नाटकं भवति चेत् तदा तस्य अवतरणं भवति चेत् छात्रस्य मनसि तन्नाटकं पूर्णरूपेण अवगम्यते । एकं श्लोकम् उचितभावाविष्काररूपेण अभिनयं कृत्वा प्रतिफलनं करोति चेत् कक्ष्यायाः पठनोपरि छात्राः श्लोकस्य हृदि स्थिरीकरणमेवं भावार्थसम्पादनं च वेगेन प्रकटीकुर्वन्ति । छात्राः वेदिकायां नाटकस्य अवतरणं कुर्वन्ति, तन्नाटकं दृष्ट्वा प्रेक्षकछात्राः अल्पसमये एव आस्वादनं तथा तस्य अवगमनं च कुर्वन्ति ।

नाटके छात्राः अन्तर्भवन्ति चेत् ते झटित्येव सम्भाषणानि हृदि स्थीरीकुर्वन्ति इति नाटकस्य प्राधान्यं भवति । एवं व्याकरणस्य उपयोगः अपि सम्भाषणस्य अर्थावगमने छात्रेभ्यः उपकारकः भवति । कुत्र कीदृशः प्रयोगः करणीयः इति ते नाटकमाध्यमेन अवगच्छन्ति । नाटकरचना इत्युक्ते नाटकलेखकस्य जीवितानुभवानां संस्काराणां च प्रतिफलं भवति । कालिदासः, भासः, भवभूतिः एतेषां नाटकेषु छात्राणां मनः रञ्जयति चेत् एकस्य उत्तमसंस्कारस्य मार्गः तेषां पुरतः दृश्यते। अन्यासु भाषासु विद्यमाननाटकसाहित्यस्य अपेक्षया संस्कृतभाषायां

विद्यमानसाहित्य- साङ्केतिकसिद्धान्ताः सन्ति इति कारणेन संस्कृतनाटकावतरणं, शिक्षणं च पाठ्यचर्यायामन्तर्भवति चेत् छात्राणां अध्यापकानां च भाषणकौशलम् उत्तरोत्तरं गच्छति।

भरतमुनिना नाट्यशास्त्रे नाटकं चतुर्णां वेदानां सारमिति, पञ्चमवेदमिति च वर्णितम् । यथा– **जग्राह पाठ्यं ऋग्वेदात् सामभ्यो गीतमेव च।**

**यजुर्वेदादभिनयात् रसानाथर्वणादपि ॥ इति ॥**

नाटकाभिनयः बालकानां मानसिकविकासे महत्त्वपूर्णं साधनं भवति । नाटकस्य कथाद्वारा विभिन्नानां पात्राणां स्वभावः व्यवहारश्च बालकैः ज्ञातुं शक्यते । नाटकीयपात्राणामनुभवानाम् आदर्शानाञ्च ग्रहणेन अधीतस्य इतिहासस्य, साहित्यस्य च अध्ययनं सफलीकुर्वन्ति। अभिनयेन साकं शब्दानां स्पष्टोच्चारणम्, आरोहावरोहपूर्वकं ध्वनीनाम् उच्चारणं, प्रवाहरूपेणभाषणं, भावनानाम् अभिव्यक्तिः इत्यादिगुणाः शिक्षयितुं शक्यन्ते। एवं नाटके अभिनयेन सहयोगभावना वर्धते। सभायां जनानां पुरतः भाषणे संकोचः न भवति।

भरतमुनिना नाट्यशास्त्रे नाटकस्य त्रीणि प्रयोजनानि उक्तानि।

- हितोपदेशजननम् - जनानां कल्याणार्थमुपदेशः।
- विश्रान्तिजननम् -सामाजिकानां मानसिकग्लानेः अपनयनेन विश्रान्तिकल्पनम्।
- विनोदजननम् - जनानां मनोरञ्जनम्।

महाकविना कालिदासेन मालविकाग्निमित्रे प्रतिपादितं यत् "प्रयोगप्रधानं हि नाट्यशास्त्रम्" इति। अर्थात् नाटकं प्रयोगप्रधाना कला भवति। नाटकशिक्षणेन मानवस्वभावस्य अध्ययनं सरलं भवति । बालकाः नाटकस्य विभिन्नपात्राणां व्यवहारस्य अवगमने समर्थाः भवन्ति । नाटकेषु अनेकविधानि पात्राणि भवन्ति। येषां जीवनदर्शनं भिन्नं भवति। अनेक प्रकाराणां जीवनदर्शनानां प्रतिनिधिभूतानां पात्राणां दर्शनेन छात्राः जीवनदर्शनस्य ज्ञानं प्राप्नुवन्ति । नाटकेषु अनेकविधानि पात्राणि स्वभावानुसारं भाषाप्रयोगं कुर्वन्ति। कुत्रचित् भाषायां माधुर्यम्, अन्यत्र ओजः, कदाचित् प्रसादश्च भवति । रसानुगुणं भाषणे एतेषां गुरूणां प्रयोगं नाटकद्वारा छात्राः शिक्ष्यन्ते । नाटकशिक्षणेन छात्राः आरोहवरोहक्रमेण विभिन्नभावानां व्यक्तीकरणमभ्यसन्ति। स्वकीयभावानां भाषणद्वारा प्रकाशनेन आत्माभिव्यक्तेः अवसरं लभ्यते। अनुकरणं मानवस्य स्वभावो भवति। तस्य पुर्तिः नाटकशिक्षणेन सम्पादयितुं शक्यते । छात्रेभ्यः विभिन्नानामवस्थानाम् अनुकरणस्य महत्त्वपूर्णमुद्देश्यं भवति । नाटके विभिन्नपरिष्ठितीनां वर्णनं भवति । मानवजीवने यासां परिष्ठितीनामनुभवः प्राप्यते, तासां ज्ञानं नाटकशिक्षणेन छात्रैः प्राप्तुं शक्यते। एतादृशं ज्ञानं बालकस्य भाविजीवने देशकालानुसारं प्रवर्तितुं साहाय्यं प्रददाति। नाटकशिक्षणं बालकस्य मानसिकसंवेगानां

बहिरानयनेन स्वस्य मनोरञ्जनस्य अवसरं कल्पयति । अनुचितकार्येभ्यो निवृत्तिं प्राप्य मानसिकस्वास्थ्यं सम्पादयति । मानवमूल्यानां धर्मस्य, सत्यस्य, न्यायस्य च बोधनेन जीवितस्य हितकरं मार्गं प्रदर्शयति नाटकम् । जीवनसंघर्षे उचितकार्यनिर्णयस्य शक्तिं ददाति । एवं नाटकशिक्षणं बालकानां जीवनस्य हितकरमुपदेशं ददाति ।

**सन्दर्भग्रन्थावली -**

संस्कृतशिक्षणम्- नवीनप्रविधयश्च - डॉ .च .ल .ना. शर्मा फतेहसिंहः .डॉ ,।

## संस्कृतं संस्कृतिश्च

**शारदा भारती**

शिक्षाशास्त्रिद्वितीयवर्षम्

विश्वस्मिन् विश्वे भारतमेव एतादृशः देशः वर्तते यस्य पार्श्वे एतादृशी भाषा अस्ति । या “विश्वभाषाणां जननी” इति स्थानं प्राप्तवती । सा भाषा नान्यत् अस्माकं देवभाषा आधुनिकभारतीयभाषाणां जननी संस्कृतमिति । क्रमेऽस्मिन् संस्कृतं संस्कृतिश्चानूचानः वर्तते । यतोऽहि परम्परापेक्षत्वं प्रतिभाति इति मन्ये । तर्हि आदौ ज्ञातव्यमस्ति संस्कृतमिति । “सम्” उपसर्गपूर्वक “कृ” धातोः “क्त” प्रत्यये कृते सति संस्कृतमिति शब्दः निष्पद्यते । यस्यार्थः भवति परिमार्जितं व्यवस्थितं संस्कृतं चेति । वस्तुतः आविश्वे मूलत्वेन संस्कृतभाषायामेव वैज्ञानिकत्वमस्ति । किञ्चित् ज्ञातव्यं वर्तते संस्कृतभाषायाः इतिहासः । यथा - देवताः अमराः तथैव संस्कृतभाषा विशाला साहित्य – लोककल्याणभावना - परोपकारः इत्यादि विभिन्नप्रयासेन विशालशब्दसाहित्येन अमरः वर्तते । यदि आधुनिकानां मतं पश्यामश्चेत् तर्हि अस्याः प्रवाहः पञ्चसहस्रवर्षेभ्यः वर्तते । अनया भाषया भारतीयज्ञानमीमांसा मूल्य-विवेक-प्रतिभा-चिन्तन-मनन-निधिध्यासन-सर्जनात्मकता-आचारण-व्यवहारेत्यादि वैचारिकप्रकृष्टतायाः स्फोटः अभवत् । अस्याः संस्कृतभाषायाः वैशिष्ट्यविषये लिखितमस्ति यत् -

**अनादिनिधना नित्या वागत्सृष्टा स्वयम्भुवा ।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥** महाभारतम् (शान्तिपर्व)

इतोऽपि किञ्चित् शङ्का समाधानाय परिष्करणं कृत्वा वाक्यपदीयकारः आचार्यभर्तृहरिः वदति यत् - **अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥** वा.प

विद्वद्भिः प्रमाणितं यत् विश्वस्य प्रथमभाषा संस्कृतभाषा । अतः प्रथमतया अनादित्वं संस्कृतमेव धारयति । अनन्तरक्रमेऽस्ति संस्कृतेः । वस्तुतः संस्कृतात् पृथग्नास्ति संस्कृतिः । कस्यापि समाजस्य कुक्षिगह्वरे व्याप्तगुणानामादर्शानां समन्वितरूपमेव संस्कृतिरिति । संस्कृतिः इति शब्दस्यार्थः भवति उत्तमा सुव्यवस्थिता स्थितिः । अस्माकं संस्कृतेः परिचयः अस्माकं चिन्तनेन, विचारेण, वदनेन, अन्वेषणेन, व्यवहारेण, नृत्यगायनसाहित्येन, कलावस्तु इत्यादि माध्यमेन भवति । भारतीयसंस्कृतिः जगतः संस्कृतिषु सर्वप्राचीना संस्कृतिरिति निगद्यते । यथोक्तम् - **"सा प्रथमा संस्कृतिर्विश्ववारा"** अत्रैव **"परोपकाराय पुण्याय पापाय परपीडनम्", "सहना ववतु सहनौ भुनक्तु"** इतोऽपि **"वसुधैव कुटुम्बकम्'** इत्यादि विचाराः समुपलब्धाः पालिताः च वर्तन्ते । एतादृशी दृष्टिः भावना च अन्यत्र कुत्रापि न दृश्यते । वस्तुतः संस्कृतेः संरक्षकं संस्कृतं, संस्कृतस्य संरक्षिका संस्कृतिः । अस्माकं वेदाः, पुराणानि, उपनिषदः सर्वं तु संस्कृतभाषायामेव सन्ति । तथा च वेदादिकाः अस्माकं संस्कृतेः ज्ञानविज्ञानस्य च ज्ञानाय संस्कृतमपेक्षते, तथा च संस्कृतस्य ज्ञानाय संस्कृतिः अर्थात् किमपि एतादृशं ज्ञानं नास्ति यः संस्कृतेः नास्ति ।

बहवः वैदेशिकाः अस्माकं संस्कृतसंस्कृतेश्च विनाशाय प्रयासं कृतवन्तः । परं ते स्वयमेव नष्टाः नास्माकं संस्कृतं संस्कृतिश्च । साम्प्रतमपि अत्र **"मातृदेवो भव - पितृदेवो भव - आचार्यदेवो भव - अतिथिदेवो भव"** इत्यादि विचाराणामनुपालनं भवति ।

अत्र लिखितपाणिनीयव्याकरणं सर्वत्र प्रतिष्ठितं जातम् । सार्वभौमिकमिति वचने नास्ति संशीतिः । अस्माकं संस्कृतेः मूलतत्त्वानि धर्मपरता, आध्यात्मिकता, उदारता, परोपकारिता, त्यागतत्परता, विश्वबन्धुत्वभावना च सन्ति । सर्वत्र पूजिता भवति सनातनसंस्कृतिः ।

अन्ते विश्वात्मभाषा संस्कृतभाषा, तथा च विश्वात्मसंस्कृतिः सनातनसंस्कृतिः । अथ च - **समानीव आकूतिः समाना हृदयानि वः। समानमस्तु वो मनो यथा वः सुसहासति ॥** ऋग्वेदः ।

## बौद्धशिक्षा

**सस्मिता कुमारि साहु**

शिक्षाशास्त्रिद्वितीयवर्षम्

**उपोद्घातः -**

वैदिककालिकी शिक्षा खलु धर्मानुप्रणीता आसीत् । परिवर्तितकाले वैदिकशिक्षायां ज्ञानकर्मणोः समन्वयस्य ह्रासो सञ्जातः । यज्ञेषु पश्वादीनां बलिप्रथा अनिवार्यरूपेणासीत् प्रचलिता।

ब्राह्मणानां प्रामुख्यं शिक्षणव्यवस्थायां सामाजिकदशायाञ्च प्रभूतत्वेन सञ्जातम् । कर्मकाण्डेषु बाह्मणेतरवर्णानां मुक्तेः नासीत् किमपि साधनम् । स्त्रीशुद्राद्विजबन्धूनां कृते श्रुतिर्निषिद्धा जाता ।

**बुध्दस्य सामान्यपरिचयः -** क्रि.पू. ५६३ शतके गौतमबुद्धस्य जन्म अभवत् । जन्मावसरे सिद्धार्थः इति नाम आसीत् । बाल्ये एव मातृवियोगात् विमात्रा पालितः एषः शैशवादेव गम्भीरप्राकृतिकः आसीत् । यौवनदशायां यशोधरा इत्यनया सह विवाहः समजनि । राहुलः इति नाम्ना पुत्रोऽपि उत्पन्नः । तदा अनेन उक्तं यत् -

**"संसारबन्धनशृङ्खलायाः समभिवर्धनाय पुत्रोऽसौसमुत्पन्नः"** इति ।

संसारबन्धनात् मुक्तिं प्राप्तुं रात्रावेव गृहत्यागमकरोत् । तदीयं गृहत्यागं नाम निर्गमनं "महाभिनिष्क्रमणम्" इत्युच्यते ।

**बौध्दयुगीना शिक्षाव्यवस्था -** बौध्दकालीनशिक्षायां वर्ण-लिङ्गयोराधारेण भेदभावः न दृश्यते । परन्तु केवलं बौद्धधर्मस्य अनुयायिनां कृते शिक्षा प्रदीयते स्म । बौद्धानां काले शिक्षायै संस्कारद्वयं विधीयते स्म । प्राथमिकशिक्षार्थं पबज्जा संस्कारः । उच्चशिक्षार्थं उपसम्पदासंस्कारः ।

शिक्षायाः समारम्भः 'प्रव्रज्या' (पबज्जा इति पालिभाषायाम् ) इत्यनेन संस्कारेण भवति स्म । पालिभाषायां पबज्जा पदस्यार्थः वर्तते 'बहिर्गमनम्' इति । संस्कारेऽस्मिन् प्रायशः अष्टवर्षीयबालकाः स्वगृहात् पृथक्भूत्वा संघे प्रविष्टो जायते स्म । प्रार्थनास्वीकारात् परमुपाध्यायस्य समक्षे प्रणवत्रयस्य तीव्रध्वनिना त्रिवारमुच्चरति स्म -

**बुद्धं शरणं गच्छामि ।**
**धम्मं शरणं गच्छामि ।**
**संघं शरणं गच्छामि ।**

द्वादशवर्षात्मकस्य शिक्षणसत्रस्य समाप्त्यनन्तरं श्रमणस्य कृते मार्गद्वयं प्रचलितमासीत् । तत्रादौ गृहस्थमार्गः भिक्षुमार्गश्च द्वितीयः । भिक्षुमार्गे प्रचलनार्थम् 'उपसम्पदा' इत्याख्यः संस्कारः आयोज्यते स्म । उपसम्पदासंस्कारे श्रमणस्य कृते कार्यत्रयम् आयोज्यते स्म । तद्यथा ज्ञाप्तिरनुश्रवणं धारणा चेति ।

**बौद्धशिक्षायाः उद्देश्यानि -** बौद्धधर्मस्य सर्वप्रथमावश्यकता धर्मस्य प्रचारः प्रसारश्च आसीत् । तात्कालिकायाः शिक्षायाः प्रमुखानि उद्देश्यानि भवन्ति ।

ज्ञानप्राप्तिः । धार्मिकतायाः सञ्चारः ।
सामाजिकविकासः । जीविकोपार्जनम् ।

बौद्धधर्मप्रचारस्य बौद्धशिक्षाकेन्द्ररूपेण नैकाः संस्थाः प्रसिद्धिं प्राप्ताः । यथा - नालन्दाविहारः, ताम्रलिप्तिविहारः, वल्लभीविहारः, विक्रमशिलाविहारः, उदन्तपुरीविद्यापीठम् ।

**निष्कर्षः -** शिक्षायाः प्रचारप्रसाराय बौद्धशिक्षा प्रचलितो आसीत् । बौद्धशिक्षायै वैदेशिकच्छात्राः अपि शिक्षां प्राप्तुं समर्थाः आसन् । ज्ञानप्राप्त्यर्थं जीविकोपार्जनार्थं सामाजिकविकासार्थञ्च बौद्धशिक्षा मुख्यभूमिकाम् आवहति स्म ।

**परिशीलितग्रन्थाः -**

1. पुरातनीशिक्षा - डा. लोकमान्यमिश्रः ।
2. शिक्षायाः दार्शनिकसामाजिकाधाराः – डा. प्रेमसिंह सिकरवारः ।

## प्राचीन – अर्वाचीन साक्षरमहिलाः

**स्वातिलक्ष्मी के. यु.**

शिक्षाशास्त्रिद्वितीयवर्षम्

**“मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव ।”**

**“मातृदेवो भव”** इति वाक्यश्रवणेन मातुः वैशिष्ट्यं ज्ञायते । भारतीयमहिलाः प्राचीनकालतः आरभ्य ज्ञाने शौर्ये च अग्रेसराः आसन् । माता एव शिशूनां प्रथमः गुरुः इत्युच्यते ।

**“विद्या समस्ताः तव दैवी भेदाः ।**
**स्त्रियः समस्ताः सकलजगत्सु ॥”** इति

**शिक्षा -** शिक्षा नाम आत्मसाक्षात्कारः इति जगद्गुरुः श्रीशङ्कराचार्येणोक्तम् । **“सा विद्या या विमुक्तये”** तैत्तिरीयोपनिषद्वाक्यं भवति । **“मानवान्तर्निहितपूर्णताया अभिव्यक्तिरेव शिक्षा”** इति स्वामिविवेकानन्दः । **“स्वस्थे शरीरे स्वस्थं मनः”** इति अरिस्टाटिल् महोदयेनोक्तम् । एतादृशरूपेण शिक्षायाः लक्षणानि भवन्ति ।

**वैदिकपुराणेतिहासेषु साक्षरमहिलाः -**

वैदिकयुगे स्त्रीणां कृते पृथग् रूपेण शिक्षासंस्थायाः सम्मुल्लेखो न प्राप्यते । परन्तु स्त्रीभिः शिक्षा नासीत् इति वक्तुं न शक्यते । स्त्रीणां कृते वेदादिविशेषशास्त्रेषु ज्ञानमासीत् इति विवरणं तत्र तत्र प्राप्यते ।

तत्र ‘उपाध्याय’ इति प्रयोगः अध्यापनकर्मणिरतानां स्त्रीणां कृते वर्तते । उपध्यायस्य कृते तु ‘उपाध्याया’ इति च प्रयोगः अस्ति । पुनः वेदाध्ययनम् अध्यापनं वा याः महिलाः कुर्वन्ति ताः

ब्रह्मवादिन्यः इति आहूयन्ते स्म । ब्रह्मवादिनीनाम् अग्निहोत्रं, वेदाध्ययनं तथैव स्वगृहे शिक्षास्वीकरणाधिकारः इत्यादिकमासीत् । वैदिकययुगे मैत्रेयी - गार्गी – विश्ववारा - सुलभा इत्यादिब्रह्मवादिन्यः आसन् ।

अत्र वाल्मिकेराश्रमे आत्रेयी छात्रैः साकं अध्ययनं कृतवती इति भवभूतेः उत्तररामचरिते सम्मुलेखो वर्तते । गार्गी तु विदर्भस्य राज्ञः जनकस्य आस्थाने महर्षिना याज्ञवल्क्येन सह आध्यात्मिकविषये चर्चां कृतवती । मैत्रेयी मोक्षार्थं यत् ज्ञानमावश्यकं तत् ज्ञानं प्राप्तवती । बृहदारण्यकोपनिषदि एतादृश्यः कथाः लभ्यन्ते ।

वाल्मीकिरामायणे सीता वैदिकप्रार्थनां करोति स्म । रामस्य माता कौसल्या प्रतिदिनं मन्त्रपूर्वकम् अग्निहोत्रं निर्वहति स्म । रामस्य वनगमनसमयेऽपि सा अग्नौ मन्त्रसहितम् आहुतिं यच्छन्ती आसीत् इति अनेन श्लोकेन ज्ञायते ।

**"सा क्षौमवसनां दृष्ट्वा नित्यं व्रतपरायणा ।**
**अग्नौ जुहोति स्म तदा मन्त्रवत्कृमण्डलम् ॥"**

द्वापरयुगे श्रीकृष्णस्य पत्नी सत्यभामा गरुडनामके वाहने देवासुरयुद्धार्थं गतवती । अर्जुनस्य भार्या सुभद्रा युद्धे सारथिरूपेण अर्जुनस्य रथं चालितवती । कन्याः स्त्रियः वा गृहे एव स्थित्वा गुरोः अथवा पित्रोः सकाशात् वा शिक्षां प्राप्तवत्यः । मातृपक्षे श्वसुरपक्षे च अनेके गुरवः आसन् स्त्रीणामिति ज्ञातुं शक्यते ।

**"श्वश्रुः पितामही ज्येष्ठा धात्री च गुरवः स्त्रियः ।**
**इत्युक्ते गुरुवर्गोऽयं पितृतः मातृतः द्विधा ॥ "**

**अर्वाचीनभारते नारीशिक्षा -** अर्वाचीनभारते ( क्रि.श.नवमे शतमाने) बह्व्यः महिलाः संस्कृतभाषायां कविताः लिखितवत्यः । रामभद्राम्बा इति नामिका कवयित्री रघुनाथाभ्युदयः नामकं ग्रन्थं लिखितवती ।

सुप्रसिद्धः शिवाजीमहाराजः शिक्षणं प्राप्तवान् इति विचार्यमाणे स्पष्टम् अवगम्यते यत् तस्य माता जीजाबाई तस्य औन्नत्यस्य मूलम् अभूत् इति । 'महाराणाप्रताप' इति वीरनायकस्य माता जेवन्ताबाई बाल्ये एव रामायणे, महाभारते विद्यमानानां महावीराणां कथाः उक्त्वा स्वदेशस्नेहार्थं प्रेरणां दतवती । तस्य पत्नी अजब्दा तं युध्दे साहाय्यं कृतवती । स्वरक्षायां स्वदेशरक्षणार्थं च महिलानां कृते शिक्षां दत्तवती ।

'चेन्नम्मा' दक्षिणभारतस्य कित्तूर नामकस्य राज्यस्य राज्ञी आसीत् । दीर्घदृष्टिः, ज्ञानी, सैनिका च आसीत् । सैनिकप्रशिक्षणार्थं नारीणां प्रेरणां दत्तवती । नागरिकेषु देशसेवायाः भावं जनयितुं तया विद्यालयेषु सामाजिकसभासु च राष्ट्रप्रार्थनायाः गानमनिवार्यं कृतम् । तया चिन्तितं राष्ट्रप्रार्थनायाः अन्ते सरलभाषया प्रतिज्ञा अपि भवेत् इति । तर्हि प्रभावः अधिकः भविष्यति इति ।

भारतस्य प्रथमे स्वतन्त्रसंग्रामे तस्याः प्रमुखं योगदानमासीत् । राणी लक्ष्मीबाई उत्तरभारते स्थितस्य झान्सी राज्यस्य राज्ञी आसीत् । सा युद्धकलासु विशिष्टासीत् । संस्कृतादिविषयेषु विशिष्टं ज्ञानमासीत् पुराणज्ञानेन सह श्लोकज्ञानमपि आसीत् । नारीणां कृते प्रशिक्षणं दत्तवती । समूहे विद्यमानविचाराणां निषेधार्थं प्रयत्नं कृतवती । एवं प्राचीनार्वाचीनकाले भारतस्य शिक्षाव्यवस्था उत्कृष्टा आसीत् । प्रत्येकं परिवारेष्वपि स्वशैल्या स्वदेशानुगुणं संस्कारानुगुणं विशिष्टा एका संस्कृतिः आसीत् । तत्र प्रमुखाः नार्यः एव आसन् । अतः उच्यते मनुस्मृतौ -

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ॥"

## समाजे मूल्यशिक्षायाः आवश्यकता

**रुद्रनारायणमहापात्रः**
शिक्षाशास्त्रिद्वितीयवर्षम्

**शिक्षा -** संस्कृतभाषायां 'शिक्षा' इति पदस्य व्युत्पत्तिः शिक्ष विद्योपादने इति धातोः "गुरोश्चहलः" इति पाणिनिसूत्रेण 'अ' प्रत्यये सति निष्पन्ना भवति । अस्यार्थः भवति यत् विद्याग्रहणमिति । पर्यायपदरूपेण आलोचयामश्चेत् शिक्षायाः विद्या इति बहुत्र स्वीकृतो वर्तते । प्रसिद्धसुभाषितेऽपि उक्तं वर्तते यत् कामधेनुसमा विद्या सदैव फलदायिनी इति ।

परन्तु साम्प्रतिकयुगे प्रचाल्यमानं शिक्षापदं यत् वर्तते तत्तु आङ्ग्लभाषायाः एजुकेशन (Education) इति पदस्यानुवादभूतं वर्तते । एजुकेशन् इति पदं लेटिन् भाषायाः अन्तः इत्यर्थकस्य 'E' इति पदस्य बहिरानयनम् इत्यर्थकस्य ड्युको ( Duco) इति च पदाभ्यां निष्पन्नं वर्तते । एवम्प्रकारेण एजुकेसन् (Education) इति पदस्यार्थः भवति आभ्यन्तराद् बहिरानयनमिति ।

**किं नाम मूल्यम् ?**

भारतीयधर्मग्रन्थेषु 'मूल्यशब्दस्य' प्रयोगः शीलशब्दार्थे कृतोऽस्ति । आङ्ग्लभाषायाः भवति Value इति । Value इति शब्दः लेटिन् भाषायाः Valere इति शब्दात् उत्पन्नोऽस्ति ।

यस्य च अर्थः भवति कस्यचित् वस्तुनः मूल्यं, गुणं, विशेषताम्, उपयोगितां वा सूचयति । इदं मूल्यम् एतादृशी एका आचारसंहिता आहोस्वित् सद्गुणानां समूहः भवति, यत् मूल्यमाधारीकृत्य व्यक्तेः व्यक्तित्वं विकासं कर्तुं समर्थो भवति । अत्र मानवस्य धारणा विचारः विश्वासः मनोवृत्तिः स्थितिः च समन्विता भवति । जीवने शीलमेव सद्गुणसाधनं यत्र शीलं तत्रैव धर्मः सत्यं तेजो बलं च निवसति । उक्तञ्च महाभारते -

**शीलेन हि त्रयो लोकाः शक्त्या जेतुं न संशयः ।**
**नहि किञ्चिदसाध्यं वै लोके शीलवतां भवेत् ॥**

भर्तुहरिणोक्तम् - सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् । महात्मना शीलगुणस्य महत्त्वं वर्ण्यते यत् -

**चन्दनं तगरं वापि उप्पलम् अथ वस्सिकी ।**
**एतेसां गन्धजातानां सीलगन्धो अनुत्तरो ॥**

अतः मानवस्य गुणाः तु मूल्यत्वेनैव गण्यते । मानवजीवनमूल्यं स्थूलरूपेण भेदद्वयेन विभज्यते । **परिवर्तनमूल्यम्, शाश्वतमूल्यञ्चेति ।** परिवर्तमानमूल्यं कालानुगुणं परिवर्तते । परन्तु शाश्वतमूल्यं नित्यं भवति । कालानुगुणमेतस्य परिवर्तनं न सम्भवति । एतत् तु मनसा, वाचा, कर्मणा परिनिष्टितं भवति । एतदेव सनातनधर्मः इति कथ्यते । एतदेव मानवमूल्यं जीवनमूल्यं वा उपरोक्तभेदद्वयस्य आधारेण पृथक् पृथक् विधातुं शक्यते । यथा -

**शैक्षिकमूल्यानि -**

- शिक्षणे नियमितता एवं निष्ठा ।
- छात्राणां सर्जनात्मकतायाः पोषणम् ।
- मौलिकतायाः कृते सद्भावः ।

**नैतिकमूल्यानि -** आत्मनिष्ठता - करुणा - दया - नम्रतागुणाः अस्मिन् अन्तर्भवन्ति ।

**सामाजिकं राजनैतिकं च मूल्यम् -** सामाजिकदायित्वं, नागरिकता, लोकतन्त्रं, मानवतावादः सामाजिकसंवेदनशीलता, राष्ट्रियैकता च अत्र अन्तर्भवति ।

**वैश्विकमूल्यानि -** देशहिताय देशप्रगतये च यानि मूल्यानि अपेक्षितानि तानि सर्वाणि अपि अत्र अन्तर्भवन्ति ।

**वैज्ञानिकमूल्यानि -** वस्तुनिष्ठता, सर्जनात्मकचिन्तनं, तर्कयुक्तानां ज्ञानोत्सुकता च अत्र अन्तर्भवति ।

**सांस्कृतिकमूल्यानि -** संस्कृतेः संरक्षणाय, सांस्कृतिकैकतां, समीचीनतया रक्षितुं येषां मूल्यानाम् आवश्यकता वर्तते तानि सर्वाणि अस्मिन् समागच्छन्ति ।

**पर्यावरणीयमूल्यानि -** वृक्षाणां संरक्षणं, पर्यावरणसंरक्षणं, पर्यावरणशुद्धतायै जागरूकता, वृक्षारोपणादीनि कार्याणि अत्र अन्तर्भवन्ति।

**आध्यात्मिकमूल्यानि -** जीवनस्य आध्यात्मिकचिन्तनानि यथा - परोपकारजीवात्मा - परमात्मज्ञानं - जीवनस्योद्देश्यमित्यादीनि आध्यात्मिकमूल्यानि।

**राष्ट्रियमूल्यानि -** राष्ट्रहिताय चिन्तनं मननं राष्ट्रन्नत्यै कार्यकरणम् ईर्ष्याद्वेषादीनां निवारणं, कुप्रथानां निवारणव्यवस्था, मातृभावना एतादृशानि सर्वाणि अपि अस्मिन् अन्तर्भवन्ति। एवमेव मूल्यानां प्रकाराः वर्णयितुं शक्यन्ते।

**समाजे मूल्यशिक्षायाः आवश्यकता -** मूल्यद्वारा अभिप्रेरणायाः मार्गं मिलति। अस्माकं व्यवहारस्य नियन्त्रणं कर्तुं मूल्यस्य भूमिका महत्त्वपूर्णं वर्तते। अतः आधुनिकजीवनं मूल्याधारितं कर्तुमिच्छन्ति।

**चरित्रनिर्माणार्थम् -** महात्मागान्धिमहोदयानुसारं ज्ञानस्य अन्तिमलक्ष्यं चरित्रनिर्माणम्। सच्चारित्र्यस्य अभावे केवलं बौद्धिकज्ञानं सुगन्धितशव इव भवति।

स्वामी रामकृष्णपरमहंसस्य विचारनुगुणं चरित्रवान् भवतु जगत्। राजनैतिकाः सामाजिकाः व्यावसायिकाः एवं प्रशासनिकक्षेत्रे अद्य या दुर्नीतिः भवति तस्य मुख्यकारणं भवति चरित्रवान् व्यक्तेः अभावः। अतः चरित्रनिर्माणार्थं शिक्षायां मूल्यस्य अत्यन्ताविरम्यता दृश्यते।

**भविष्यनिर्माणम् -** समाजे परिवर्तनस्य गतिः अनुमानतः तीक्ष्णं भवति। अतः विद्यार्थिनां कृते सा शिक्षा दातव्या यया बालकबालिकयोः भविष्यनिर्माणं भविष्यति। मूल्यपरकशिक्षा व्यक्तिं सामाजिकपरिवर्तनमेवं निहितार्थम् अवगन्तुं सक्षमं करोति। अतः वयं शिक्षां तादृशं मूल्यपरकं कुर्मः यथा विद्यार्थिनां भविष्यस्य सुरक्षां करोति।

**अनैतिककार्याणां विरोधे जागृतिः -** इदानीं समाजे सर्वत्र अनैतिककार्यं दृश्यते। यथा गृह - विपणि - कार्यालय - मित्रमण्डली - सम्मेलन शिक्षासंस्थानसंसदादि विभिन्नेषु क्षेत्रेषु मूल्यस्य उल्लंघनं कृत्वा नैतिकदुर्नीतिः भवति। ये मूल्याधारेण जीवन्ति ते अत्यन्तं कष्टम् अनुभवन्ति। अतः एतादृशीं दुर्नीतिं निवारयितुं राष्ट्रस्य प्रगत्यर्थं जनकल्याणाय च शिक्षायाः मूल्यस्य आवश्यकता अवश्यमावश्यकम्।

**जीवनशैल्याः उन्नयनस्य आधारः -** वर्तमान समाजे अधिकांशजनाः भौतिकसौविध्यं प्राप्तुम् एवमन्यस्य दृष्टौ स्वस्य स्तरमुन्नतिं कर्तुमिच्छन्ति। स्वार्थपरता, अन्यस्य भावनां प्रति अनादरः मूल्यस्योपरि आचरणम् अकर्तुं प्रलोभनमनैतिकता, पक्षपातः बाहुबलस्य शक्तेः विश्वासादि

अस्माकं जीवनशैल्याः कानिचन लक्षणानि भवन्ति । परन्तु वयं सर्वदा सुखेन जीवितुमिच्छामः । तदर्थं वयम् अस्माकं जीवनशैल्याः उन्नयनं कर्तुं मार्गं प्रशस्तं कुर्मः ।

**मातृपितृगुरुभक्तिः -** मातृपितृगुरूणां च आदेशोऽनवरतं पालनीयः भवति । मानवजीवने ते एव भगवात्सदृशाः भवन्ति, ते अस्माकं शुभचिन्तकाः । तथा उपनिषद्वाक्यं यत् -

**मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव ।**

माता सर्वादपि गरीयसि । पितास्वर्गतुल्यमेवं गुरुः ब्रह्माविष्णुमहेश्वरोऽपि वर्तते ।

**निष्कर्षः -** अत्र समाजे मूल्यशिक्षायाः आवश्यकताम् अधिकृत्य लेखनं कृतम् । समाजे मूल्यरूपेण किं किं प्रतिष्ठितं वर्तते तस्य ज्ञानेन तस्य पालनं परिपालनं च अस्माभिः करणीयम् । यथा - सामाजिकविकासेन समाजे व्यवह्रियमाणाः सामान्यजनाः मूल्यं विना सर्वदा अपूर्णाः भवन्ति । मूल्यं व्यक्तेः व्यवहारं निर्दिशति नियन्त्रयति च । मूल्यं धर्माधर्मयोः गुणदोषयोः निर्णये व्यक्तेः साहाय्यमाचरति । मानवेभ्यः एते गुणाः मूल्याधारितशिक्षा द्वारा एव प्राप्यन्ते ।

एवं प्रकारेण मानवं परिष्कर्तुं मूल्यशिक्षायाः आवश्यकता अत्यन्तम् अपरिहार्यम् । एवञ्च विद्यार्थिनः अनुशीलनशीलाः भवेयुः ।

## छात्रेभ्यः अनुशासनस्य महत्त्वम्

**पूर्णिमा परिडा**

शिक्षाशास्त्रिप्रथमवर्षम्

भारतीयप्राचीनाधिगमप्रणाल्याम् इदं महत् तत्त्वं वर्तते यत् अनुशासनम् (Discipline) मानवानां सर्वेषां लक्ष्याणामुद्देश्यपूर्तिः तदैव भवति यदा विद्यार्थिष्वनुशासनं भवति। अनुशासनेन विना छात्रजीवनस्य सिद्धिर्न भवति। आधुनिकशिक्षाशास्त्रिभिः पेस्टालोजी महाभागैरुक्तं यत् "Discipline must be based on and controlled by love" – Pestalozzi. अनुशासनस्य आङ्ग्लशब्दः भवति Discipline। अस्य शब्दस्य उत्पत्तिः Disciplina इति लाटिन् शब्दान्मन्यते। यस्यार्थो वर्तते व्यवस्था, नियमः, शिक्षा, अभ्यासः, अध्यापनम्, प्रशिक्षणव्यवस्था च। भिन्नरूपेणापि, Discipline शब्दस्योत्पत्तिः Discipulum इति लैटिनभाषातः मन्यते। यस्यार्थो वर्तते गुरवः शिष्यसकाशात् आकाङ्क्षन्ते यच्छिष्याः श्रद्धापूर्वकमादेशपालकाः भवेयुरिति। स्वजीवने आवश्यकवाञ्छितगुणानां विकासं च कुर्युः। एवं प्रकारेण डिसिल्पिन् (Discipline) शब्दस्य अर्थो वर्तते आचरणेषु नियमिततासम्पादनम्।

वस्तुतोऽनुशासनशब्दस्यार्थो व्यापको वर्तते इत्युक्ते विद्यार्थिजीवने प्रतिपदं दुर्गुणाः स्वाभाविकतया प्राप्नुवन्ति। अतस्सर्वदा दुर्गुणानां निरोधनमेवानुशासनम्। संस्कृतवाङ्मयानुसारम् अनुशासनशब्दस्य विश्लेषणं स्पष्टं भवति यत् अनुपूर्वकं शास् धातोः विभक्त्यादिकार्यान्तरं समुत्पन्नमनुशासनम्। यतोऽहि शास् धातोरर्थो वर्तते नियमः नियन्त्रणं वा । अतः अनुशासनस्यार्थो वर्तते स्वेच्छापूर्वकं नियमानां नियन्त्रणानां वा स्वीकरणम्। अस्यापरं नाम वर्तते आत्मसंयमः। भारतीयविद्याविधानं सर्वमपि गुरुकुलेषु एव आसीत्। अतः अधिकतया जनपदात् दूरे प्रतिष्ठितेषु गुरुकुलेषु वसन्तो विद्यार्जनं कुर्वन्ति स्म, यत्र वेदानां तदितरविषयाणाञ्च शिक्षा दीयते स्म। तत्र वसन्तः छात्राध्ययनेन सहैव अनुशासनमपि शिक्षन्ते स्म। मुख्यतया अनुशासनं द्विधाऽऽसीत्। १. बाह्यनुशासनम् २. आन्तरिकानुशासनञ्चेति।

**१. बाह्यानुशासनम् -** छात्राणां वेषभूषा तद्विहितकालकृत्यादयः बाह्यानुशासनेन व्यपदिश्यन्ते। स्नानादिना स्वास्थ्यं गुरुकुलनियमविहितं वेषभूषादिधारणं छात्रैः अवश्यं कर्तव्यमासीत्। **मेखला च भवेन्मौञ्जी भवेन्नित्योदकस्तथा। यज्ञोपवीती स्वाध्यायी अलुब्धो नित्यसंव्रतः** इति महाभारतोक्तदिशा छात्राणां वेषभूषादिविषयाः अवश्यं पालनीयाः। केचन नियमाः पतञ्जलिकालेऽपि आसन्निति स्फुटं ज्ञायते। **कमण्डलपाणिं छत्रमद्राक्षीत्** इत्यादिभाष्योक्तयः भाष्ये बहुश उपलभ्यमानाः छात्राणां बाह्यानुशासनं समर्थयन्ति।

**२. आन्तरिकानुशासनम् -** प्राचीनाधिगमप्रणाल्याः आत्मानुरूपतत्त्वमिदं भवति यत् आन्तरिकानुशासनमिति। यदि व्यक्तेः आन्तरिकानुशासनं न भवति तर्हि बाह्यव्यवहारः भिन्नः भवति। अतः आन्तरिकानुशासनं मानवं समग्रतया शासयति अपि तु सर्वविषयेषु अवधानं दातुं समर्थो भवति। अतः प्राचीनाधिगमप्रणाल्यां ब्रह्मचारिणां / छात्राणां कृते आन्तरिकानुशासनं बोधयन्ति स्म। तेन छात्राः अध्याप्यमानविषयान् समर्थतया अधिगन्तुं शक्नुवन्ति स्म। कुत इति चेत् आन्तरिकानुशासनेन मनसि सामर्थ्यं भवति। तेन विषयाधिगमः जायते।

**३.दैनिकाभ्यासात्मकम् अनुशासनम् -** अनुशासनसम्पादनाय दैनिकाभ्यासस्य महत्त्वपर्णूं स्थानं भवति स्म। छात्रदैनिककार्यक्रमाणां व्यवस्थासीत्। काव्यसाहित्यपिपासवः विद्यार्थिनो निबन्धछन्दोरचनाभ्यासे निरन्तरं संलग्ना आसन्। एवं प्रकारेण प्रत्येकं शास्त्रस्य अध्ययने पटुपिपासवः ब्रह्मचारिणः प्रतिदिनं पुनः पुनरभ्यासेन विद्यर्थिनस्स्वस्वविषयेषु निष्णाताः भवन्ति स्म। विद्यार्थिनां सङ्गतिस्सद्भिरेव सङ्घटयति स्म। यतोहि पण्डितानां साहचर्येणानुकरणेन च मन्दाधिगन्ता अपि उत्तमाधिगन्ता भवितुमर्हति। अतस्सत्यस्य पालनं सज्जनैस्सह सङ्गतिश्च

अनुशासननिर्माणस्य श्रेष्ठोपायो वर्तते। सत्यस्य पालनेन स्वर्गप्राप्तिर्भवति। वैदिककाले जना: सूर्यचन्द्रावादर्शौ मत्वा कल्याणमार्गोपरि गमनाय प्रार्थयन्ते स्म। अनुशासनसम्पादनाय छात्राणां मनोनियन्त्रणमवश्यमेव भवेत्। मनस्सत्त्वे सति सर्वमाचरणमपि समीचीनं भविष्यति। अतो ब्रह्मचारिणां मनश्शुद्धम् पवित्रसङ्कल्पयुक्तं च भवेत्। तदर्थं ब्रह्मचारिण: प्रतिदिनं प्रार्थनां कुर्वन्ति स्म । यथा हे भगवन् अस्माकं मन: कल्याणमार्गानुगमनं कुर्यादिति। प्रतिदिनं मनस: नियन्त्रणमेव जीवने संयममर्यादादिसद्गुणानामुदयो भवति। संयम: मर्य्यादा च प्राचीनाचारस्य मूलमासीत्। प्राचीनकाले मर्य्यादा चरित्रस्य विशेषगुणरूपेण स्वीकृतमासीत्, यथा हिंसा-चौर्य-व्यभिचार-द्यूतक्रीडा-मद्यपान-असत्यभाषण-पापकार्येभ्य: दूरे स्थापयितुं छात्रा: प्रेरिताश्च भवन्ति स्म।

**निष्कर्ष: -** विद्यर्थिजीवने सर्वत्र अनुशासनस्य महत्त्वं दरीदृश्यते। यदि वयं महापुरुषाणां जीवनम् अवलोकयाम: तर्हि निश्चयेन तेषां जीवने महत: अनुशासनस्य दर्शनं कुर्म:। यथा देशस्य आधारशिलाभूता: छात्रा: भवन्ति तथैव छात्राणां तात्कालिकजीवनस्य आधारशिलारूपेण गुरव: विराजन्ते। ते शूरान्, वीरान्, दानशीलान्, कर्मठान्, देशभक्तान्, वैज्ञानिकान् वा रचयिष्यन्ति । यथा ते भाविनिकाले उत्तमं कार्यं समाचरिष्यन्ति। अत: अस्माभि: सर्वै: सदैव स्वकल्याणाय समाजकल्याणाय च सर्वदा अनुशासनं पालनीयम्। अनेन अस्माकं सर्वेषाम् उन्नति: भविष्यति।

**सहायकग्रन्थसूची :-**

१. शिक्षाया: दार्शनिकाधारा: - डा. सोमनाथ साहु:।

२. संस्कृत निबन्ध मञ्जूषा - डा. उदयशङ्कर झा ।

## <u>स्त्रीशिक्षा</u>

**तापस् मिश्र:**

शिक्षाशास्त्रिप्रथमवर्षम्

**प्रस्तावना -**

अस्मिन् ब्रह्माण्डे समेषां मानवानाम् आध्यात्मिक - सामाजिक - चारित्रिक – बौद्धिकविकासमानेतुं प्रभवति शिक्षैव। शिक्षैका गतिशीला प्रक्रिया भवति। यया मानव: मानवत्वं

प्राप्नोति। चक्रद्वयेनैव यथा यानस्य गतिप्रक्रिया लक्ष्यनिर्दिष्टा तथैव स्त्रीपुरुषयो: द्वयो: परस्परसहयोगेन राष्ट्रोन्नति:, मानवोन्नति: समस्तसमाजोन्नति: वा भवति। काले काले राष्ट्रस्याभ्युन्नत्यै स्त्रीशिक्षाया: महती भूमिका वर्तते। तत्रापि शिक्षा ताभ्य: परमावश्यकी भवति। परिवारीया एका स्त्री, पत्नी, माता, अनुजा, भगिनी, पुत्री वा राष्ट्राभ्युदयाय आत्मन: योगदानेन स्वीयोत्तरदायित्वं प्रदर्शयितुं शक्नोति। अत: तासां कृते शिक्षाप्रदानमेव स्त्रीशिक्षा इत्युच्यते।

**स्त्रीशिक्षाया: सम्प्रत्यय: -**

प्राचीनकाले स्त्रीणां स्थानमतीवमहत्त्वपूर्णमासीत्। प्राचीनकाले स्त्रिय: न केवलं गृहकार्येषु भागभाज: अपि च नैकेषु सामाजिककार्येषु अपि स्वयोगदानेन धन्यधन्या: सञ्जाता: इति इतिहासाध्ययनेन ज्ञायत एव। प्राचीना: स्त्रिय: सर्वा: गृहस्था: भूत्वैव स्वीयाचारव्यवहारवेषभूषादि नैकप्रकारकशिक्षाविचारेषु निपुणा: आसन्। औपचारिकरूपेण तत्काले ताभ्य: प्रत्यक्षरूपेण, पृथक्तया विद्यालया: नासन्नित्येव दु:खात्मकविषय:। तथापि वर्तमानस्त्रीणामपेक्षया तत्कालीना: स्त्रिय: समाजस्य सर्वेषु कार्येषु सुगृहीतार्था:, स्वनामधन्याश्चासन्। अत एव भारतीयसाहित्ये स्त्रीशिक्षाप्रमाणरूपेण तत्र तत्र बहव: विषया: कविभि: प्रतिपादिता: सन्ति। तथैव स्वातन्त्र्यानन्तरशिक्षाऽयोगेषु सर्वेषु स्त्रीशिक्षाविषये विशेषतया प्रतिपादितमपि वर्तते।

**स्त्रीशिक्षाया: आवश्यकता -** समाजे समेभ्य: शिक्षैव दर्पण इव कार्येषु सहकरोति। अर्थात् शिक्षया विना मानवस्य गति: समाजे अन्धानां गतिरिव भवति। तत्रापि स्त्रीशिक्षाया: आवश्यकता प्रत्येकस्मिन् क्षेत्रे अपेक्षते यथा -

१. उत्तमपरिवारस्य निर्माणाय।

२. जन्मारम्भादेव बालकेभ्य: अपेक्षितशिक्षाप्रदानाय ।

३. समाजस्य राष्ट्रस्य च निर्माणाय ।

४. ये अधिकारा: ताभ्य: कल्पिता: तेषां प्राप्तये।

५. स्वप्रतिभाया:, कौशलानां, चिन्तनानां, सर्जनात्मकशक्ते:, विचाराणां च सद्विनियोगाय।

अत: कथ्यते यन्मानवस्य बालकस्य वा प्रथमगुरु: भवति माता। प्रथमगुरुत्वेनाधुनिके कालेऽपि स्त्रिय: स्वीययोगदाननिर्वहणाय ताभ्य: अवश्यं शिक्षा प्रदेया वर्तते।

**स्त्रीशिक्षाया: उद्देश्यानि -**

१. स्त्रीशिक्षाया: मुख्यतया उद्देश्यानि विद्यन्ते। तानि यथा –

२. पुरुषाः इव स्त्रीणामपि स्थानं समाजे उन्नतस्तरे भवेत्।

३. सर्वेषु कार्येषु पुरुषा इव स्त्रियः कार्यकरणाय सक्षमाः यथा भवेयुः तथा कार्याचरणम्।

४. स्त्रीष्वपि आत्मनिर्भरतासम्पादनम्।

५. समाजे स्वस्य वैयक्तिकापेक्षासु दिशानिर्देशनं संरक्षणज्ञानप्रदानञ्च।

६. समाजे समानाधिकारकल्पनं, भेदभावनिर्मूलनम्।

**स्त्रीशिक्षायाः समस्याः-** प्राचीनकालादारभ्य अद्यावधि भारते स्त्रीशिक्षायाः विषये नैकाः समस्याः शिक्षाविद्भिः अवलोकिताः। यथा-

१. सामाजिकतायाः अभावात् ताभ्यः संरक्षणव्यावस्थाभावः।

२. कस्मिन्नपि क्षेत्रे ताभ्यः स्वतन्त्रतायाः अभावः स्थानराहित्यञ्च।

३. शिक्षा ताभ्यः अनावश्यकीति मूढविचाराः अन्धविश्वासाश्च।

४. मूलप्रवृत्तिकारणैः नैकविधप्रक्रियासु स्त्रियः अयोग्याः इति साम्प्रदायिक-सांस्कृतिक-पारिवारिकचिन्तनानि।

५. स्त्रीष्वपि स्वकार्यदृष्ट्या, शक्तिदृष्ट्या च शिक्षाविषये आसक्त्यभावः।

६. जन्मैकत्र, तस्याः जीवनमपरत्रेति पारिवारिकभावना।

७. पठनाय, विवाहाय, पोषणाय, संरक्षणाय, शारीरिकावसरकल्पनाय च इत्येवं सर्वत्र आर्थिकचिन्तनम्।

८. निर्धनता, चैतन्याभावः, मार्गदर्शनाभावः, प्रोत्साहनाभावः इत्यादीनि बहूनि कारणानि समस्यात्वेन सन्ति।

**स्त्रीशिक्षायाः समस्या समाधानानि च -** उपरि कृतचिन्तनानुगुणं स्त्रीशिक्षायै बह्व्यः समस्याः सन्ति। तासां समस्यानां दूरीकरणाय प्रयासः नितरां स्यादेव। ते उपायाः यथा –

१. स्त्रीशिक्षाविषयकनियमानां व्यवस्थीकरणं, सामाजिकक्षेत्रेषु कार्यान्वयनञ्च।

२. सामाजिकक्षेत्रेषु सर्वेषु स्त्रीणां कृते उद्योगावसरकल्पनम्।

३. अवसराः, आवश्यकताः, योग्यताः, नैपुण्यानि च गणयित्वा विशेषशिक्षाव्यवस्थायाः कल्पनम्।

४. समाजे स्त्रीणां कृते सर्वत्र संरक्षणव्यवस्था सम्पादनीया ।

५. अनैतिकविचारान्, असमाजिककृत्यानि च निवारयेत्।

इत्थञ्चेदपि खेदस्यायं विषयः वर्तते यत् या व्यवस्था साम्प्रतिकसामाजिकैः स्त्रीशिक्षाविषये कल्पिता सा स्त्रीणां कृते नानुकूला इति। ये राष्ट्रनिर्मातारः, समाजोद्धारकाः, शिक्षाविदः च विद्यन्ते ते एवात्र कारणीभूताः सन्ति। एतेषां सर्वेषां निर्णयस्वीकारे विचारे वा अधिकारः अवकाशो वा नास्ति। सावधानरहितानाम् एतेषां चिन्तनानि देशहिताय योग्यानि न विद्यन्ते। सर्वे सम्भूय उत्तमानां विचाराणां स्वीकारे कृतकृत्याः भवामः तथैव स्त्रीशिक्षया राष्ट्रोन्नतिः साध्यते। अतः कथ्यते यत् -

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वा तत्राफलाः क्रियाः।।**

**उपसंहारः -** समाजस्य मुख्यभूतौ भवतः स्त्रीपुरुषौ। अतः यथा एकस्य नाणकस्य पार्श्वद्वयं तथैव स्त्रीपुरुषौ समाजप्रगत्यामपि । कमपि एकं त्यक्त्वा जीवनं प्रगतिः वा न भवति। विशेषतया समाजे पुरुषापेक्षया स्त्रीणां मानसिकशक्तयः दृढा इति विशेषः। ततः स्त्रीणां तादृशानां शिक्षाभावात् समाजस्योन्नतिः न चिन्तनार्हा एव। ततः उत्तममानवनिर्माणाय समाजनिर्माणाय वा स्त्रीशिक्षा अत्यावश्यकी भवति।

**परिशीलितग्रन्थसूची -**

१. पुरातनी शिक्षा, डा. लोकमान्यमिश्रः।

२. भारतीयशिक्षा और उसकी समस्याएँ , पि. डि. पाठक्।

## <u>सांख्यदर्शनस्य परिचयः</u>

**देवयानी रथः**

शिक्षाशास्त्रिप्रथमवर्षम्

दर्शनमित्यस्य व्युत्पत्तिः 'दृश्' धातोः ल्युट्प्रत्यये दर्शनमिति शब्दः निष्पन्नः । तत्र आदौ मनुष्य एकः चिन्तनशीलः प्राणी अस्ति । चिन्तनशक्तिकारणात् सः मनुष्यः प्राणिषु श्रेष्ठस्थानमलङ्करोति । अरस्तू महोदयः अपि कथयति यत् "मनुष्यः एक विवेकशीलप्राणी वर्तते"। विवेकः अर्थात् बुद्धिः, बुद्धेः प्राधान्यात् सः मनुष्यः यं कमपि वस्तु यदा पश्यति तदानीं

तस्य स्वरूपं किमिति ज्ञातुं जिज्ञासां प्रकटीकरोति। मनुष्यस्य बौद्धिकता स्वं प्रति बहून् प्रश्नान् पृच्छति। तद्यथा –

विश्वस्य स्वरूपं किम् ? आत्मनः स्वरूपं किम् ? सत्यं किम् ? असत्यं किम् ? शुभं किम् ? अशुभं किम् ? जीवः किमर्थम् अत्र तिष्ठति ? इत्येतेषां प्रश्नानां युक्तियुक्तं समाधानं दर्शने एव प्राप्तुं शक्यते। तदर्थम् अनादिकालात् एतेषां प्रश्नानां समाधानं दातुं भारतखण्डे द्वादशदर्शनानाम् उद्भवः जात इति मन्यते। भारते दर्शनेष्वपि वेदपरकाः आस्तिकाः, वेदनिन्दकाः नास्तिकाः इति विभागः परिलक्ष्यते।

'सम्' उपसर्गात् 'ख्या' प्रकथने धातोः अङ्, टाप् प्रत्यये च संख्याशब्दोऽयं निष्पद्यते। तस्य इदमनेन अण् प्रत्यये सांख्यमिति शब्दमुत्पद्यते। संख्यायाः वर्णनं यत्र क्रियते तत् सांख्यमिति महाभारते कथ्यते। यथा :-

**" संख्यां प्रकुर्वते चैव प्रकृतिश्च प्रचक्षते।**
**तत्त्वानां चतुर्विंशतिस्तेन सांख्याः प्रकीर्तिताः ॥"**(महा.भा.शा. -३०६/ ४३)

सांख्यदर्शनस्यास्य प्रवर्तकः महर्षिकपिलाचार्यः। सांख्यदर्शनमतीव प्राचीनदर्शनत्वेन परिगण्यते। यतोहि - भगवद्गीतायामस्ति यत् - **"ऋषीणां कपिलमुनिः"** इति। महर्षिकपिलाचार्यस्य चर्चा ग्रन्थेषु बहुत्र दृश्यते। श्वेताश्वेतोपनिषदि, रामायणे, महाभारते च तस्यावताराः प्रकथिताः।

**सांख्यदर्शनस्य विषयवस्तु -** दर्शनस्यास्य मुख्यविषयः भवति दुःखत्रयाणां निवृत्तिपरकं मोक्षप्राप्तिरिति। प्रकृतिपुरुषयोः भेदज्ञानं तत् प्रयोजनं च। पञ्चविंशतितत्त्वानां समीक्षणम् एतेषां विषयाणां सम्यक् ज्ञानेन पुरुषार्थप्राप्तिः अस्य दर्शनस्य मुख्योद्देश्यं भवति। यथा उच्यते -

**"पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे वसेत्।**
**जटी मुण्डी शिखी वाऽपि मुच्यते नात्र संशयः ॥"**

पञ्चविंशतितत्त्वानां सम्यक् ज्ञानेन जीवः आधिभौतिक-आध्यात्मिक-आधिदैविकश्चेति त्रिविधानां दुःखानां निवारणपूर्वकमीश्वरं प्राप्नोति। यथा ईश्वरकृष्णेन सांख्यकारिकायां निगद्यते यत्-

**दुःखत्रयाभिघाताज्जिज्ञासा हेतौ तदपघातके।**
**दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात् ॥"**

अर्थात् संसारेऽस्मिन् प्राणिः स्वजीवने दुःखत्रयस्यानुभवं करोति। तेषां दुःखानां निवृत्तिकारणीभूताः एव एतानि पञ्चविंशतितत्त्वानि। यथा – कस्यचन रुग्णस्य औषधं तस्य दुःखस्योपायं भवति तद्वदेव।

**सांख्यप्रमाणम् -** दर्शनेऽस्मिन् त्रीणि प्रमाणानि सन्ति। यथा ईश्वरकृष्णेन कारिकायामुल्लिखति –

**“दृष्टवदानुश्रविक स ह्यविशुद्धिक्षयातिशययुक्तः ।**
**तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानम् ।।”**

श्लोकेऽस्मिन् सांख्यदर्शनानुरीत्या प्रमाणत्रयस्य चर्चा परिलक्ष्यते। तानि यथा :-

**१. प्रत्यक्षप्रमाणम् ।**

**२. अनुमानप्रमाणम् ।**

**३. शब्दप्रमाणम् ।**

घटपटादीनां प्रमेयपदार्थानां शुद्धिः प्रमाणेनैव सिद्ध्यति।

**पुरुषस्वरूपम् -** सांख्यदर्शनस्य द्वैतवादे प्रकृतिः यथा सत्तात्वेन तिष्ठति तद्वदेव पुरुषोऽपि सत्तारूढः भवति। पुरुषः नाम आत्मा। अस्य पुरुषस्य सांख्यदर्शनानुसारं त्रिविधः सम्बन्धः वर्तते।

**१. पुरुषस्य स्वरूपम् ।**

**२. पुरुषस्यास्तित्वहेतोः तर्कः ।**

**३.पुरुषानेकबहुत्वं च ।**

उक्तं च यथा कारिकायाम् :-

**“संघातपरार्थत्वात् त्रिगुणादिविपर्ययात् अधिष्ठानात्।**
**पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थप्रवृत्तेश्च ।।”**

जगदिदं प्रकृतेः गुणत्रये निर्मितोऽस्ति । प्रकृतिः जडात्मिका कारणसाधिकात्मिका च भवति। तर्हि साध्यः कः ? साधकः कः ? साधकः अत्र चेतनात्मकः भोक्ता च । स एव पुरुषः प्रयोजनमूलकः भवति।

**प्रकृतिस्वरूपम् -** सांख्यदर्शने पञ्चविंशतितत्त्वेषु एका भवति प्रकृतिः। अस्य दर्शनानुसारं प्रकृतेः ज्ञानमनुमानप्रमाणेन सिद्ध्यति। विश्वस्यास्य द्वे वस्तुनी स्तः।

१. स्थूलपदार्थः – (मृत्तिका, जलं, पवनः)

२. सूक्ष्मातिसूक्ष्मपदार्थः –(इन्दियम्, मनः, अंहकारः)

इयं प्रकृतिः नित्या शाश्वती च। इयमुत्पत्तिविनाशस्य परे तिष्ठति। अस्याः प्रकृत्याः बहूनि नामानि सन्ति। यथा :-

अव्यक्तम् - अव्यक्तम् इत्युक्ते विश्वरूपीकार्यमव्यक्तम्।

प्रधानः – विश्वस्य मूलकारणात् प्रधानः।

अजा – न जायते न उत्पद्यते या सा अजा।

**सांख्यमतानुसारं सृष्टिक्रमः -** सांख्यकारिकायाम् ईश्वरकृष्णेन सृष्टक्रमः वा विकासवादस्य प्रस्तावना प्रतिपादिता। तद्यथा:-

> **"प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः।**
> **तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि ॥"**




श्लोकेस्मिन् सम्पूर्णस्य जगतः उद्भवं कथं जातमिति सम्यक् परिदृश्यते। यथा आदौ प्रकृतिपुरुषयोः संयोगेन महत् वा बुद्धिः तस्मात् अहंकारः, ततः गुणत्रयं क्रमशः पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनसः च उद्भवमभवत्। ततः पञ्चमहातत्त्वानि, पञ्चतन्मात्राणि च। अनेन सृष्टिवादेन इयं प्रकृतिः प्रलयात्मिका सत्त्वेऽपि नूतनसृष्टेः कर्त्री भवति। अतः इयमजा इति कथ्यते।

## व्यक्तित्वम्

**श्वेता महन्ति**
शिक्षाशास्त्रिप्रथमवर्षम्

जीवनस्य सर्वासु परिस्थितिषु जनानां विशिष्टाचरणस्य व्यवहारशैल्याश्च प्रदर्शनं दृश्यते। सर्वे जना: स्वकीयया अन्त:क्रियया कार्यपद्धतिं प्रभावयन्ति। सर्वेष्वपि परिस्थितिषु व्यक्तित्वम् एकं महत्त्वपूर्णपक्षरूपेण विद्यमानं भवति। व्यक्तित्वम् आत्मन: व्यवहारमन्येषां समक्षम् उपस्थापयति, विशिष्टञ्च कार्यशैलीमाप्नोति। एतत् सर्वं तस्य व्यक्तित्वमेव सूचयति।

व्यक्तित्वस्य प्रचलितस्वरूपविषये भारतीयशास्त्रेषु विद्वद्भिश्च विचार: कृतो वर्तते। भारतीयवाङ्मये व्यक्तित्वस्याध्ययने आत्मन: स्वस्य च केन्द्रीयं स्थानं वर्तते। दर्शनशास्त्रे आत्मस्वरूपं विवेचितं वर्तते। उपनिषत्सु निरूपिता: अन्नमयादिपञ्चकोषा: शरीरादात्मानं प्रति उत्तरोत्तरविकासस्य परिचायका: वर्तन्ते। एतेषां कोषानां सम्बन्धो व्यक्तित्वस्य विविधैरायामैर्वर्तते। यदि उत्तमव्यक्तित्ववान् न भवति तर्हि तस्य व्यवहारे परिवर्तनमपेक्षते। अत: अधिगमस्य व्यक्तित्वस्य च कार्यकारणसम्बन्ध: वर्तते।

व्यक्तित्वं यथा - अथेत्ययं शब्दोऽधिकारार्थ: प्रयुज्यते। अधिकार: प्रस्ताव:। अनेकसिद्धान्तसमन्वितव्यक्तित्वस्य जिज्ञासाविषयिणी आरभ्यमाणता अथ शब्दसन्निधाने प्रतीयते। ननु व्यक्तित्वजिज्ञासा किमर्थम् इत्यत्र विचार्यते। समग्रशिक्षाप्रक्रियाया: प्रधानमाद्यं चोद्देश्यं समग्रव्यक्तित्वविकास: एव। सर्वाङ्गीणविकास इति शिक्षाया: प्रथितोद्देश्यम्। समग्रव्यक्तित्वविकास एव अर्थत: पर्यवस्यति। एवं तर्हि समसमाजस्यावश्यकतानुगुणम् अभीष्टदिशि व्यक्तित्वविकास एव शिक्षोद्देश्यमिति फलितार्थ:। तथैव व्यापृतसकलजीवनरङ्गस्य नानाशाखाशाखिन: अभिनवमनोविज्ञानमहीरुहस्य अध्ययनोद्देशश्च व्यक्तित्वव्यवहारस्य विशिष्य मानवव्यवहारस्य वर्णन - व्याख्यान - भाविकथन - नियन्त्रणानीति व्यक्तित्वस्वरूपनिरूपणमन्तरा तदीयविकाससम्भव एवेति तदीय जिज्ञासा । साम्प्रतमत्र ऐदम्प्राथम्येन किं नाम व्यक्तित्वम् इति अर्वाचीनमनोविज्ञानानुसारमत्र विचार्यते।

**परिभाषा -** मानवीया: कतिपयशरीरमानसप्रणाल्य: (इच्छा-विश्वासादय:, कोप-दैन्यादिसंवेगा:, भोजन-भाषणाद्यभ्यासा:) परिवेषानुगुणं मानवेन कर्तव्यमसाधारणं सामञ्जस्यं तत् समये निश्चिन्वन्ति। आसां प्रणालीनां येन क्रियाशीलैकसूत्रत्वमापाद्यते। तस्य व्यक्तित्वम् इति नाम। सारतो व्यक्तित्वमधिकृत्येत्थं वक्तुं युक्तम् - मानव: परिपूर्णतया यच्छीलो वर्तते तच्छीलत्वमेव तदीयं व्यक्तित्वम् इति लक्षणमभिधातुं साम्प्रतम्। मानवस्य शरीरसंस्थानं मन: परिपाकसांवेगिकावस्थानं तदीयानुभवज्ञानवृत्त्यभ्यासादीनां पुञ्जं विषयीकुर्यादिदं पदम्। इत्थं च नैकैर्विचारविशेषै: व्यक्तित्वं मनोविज्ञानानुगुणं नरस्य कृत्स्नां सत्तां सूचयति। अत्र बहुविधा: परिभाषा: वर्तन्ते तथापि साररूपेण परिभाषा दत्ता वर्तते।

**व्यक्तित्वविषयकं भारतीयं मतम्** - अस्मदीयास्तु व्यक्तित्वव्यवहारं सत्त्वरजस्तमोगुणाः प्रभावयन्तीति आमनन्ति। अत्र अचित् तमोगुणेन, अहं रजोगुणेन, अध्यहञ्च सत्त्वगुणेन तोलयितुमलम्। सत्त्वादित्रिगुणविवर्द्धनेन व्यक्तेः मानसशारीरव्यवहारे परिवर्तनं सम्भवति इति मुङ्क्षु वर्णयति भगवती गीता।

**आत्मनं रथिनं विद्धिः शरीरं रथमेव तु।**
**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।।** (भ.गीता)

**व्यक्तित्ववैशिष्ट्यम्** :- पृथिव्यां यावन्तो मानवाः सन्ति, तेषां व्यक्तित्वमनन्यमेव वर्तते। प्रत्येकं जनः विशिष्टं व्यक्तित्वं धारयति। एतेषु केषाञ्चिद् वैशिष्ट्यानां नामानि अत्र प्रस्तूयन्ते। यथा- आत्मचैतन्यम्, सामाजिकता, समायोजनम्, निर्देशितलक्ष्यप्राप्तिः, द्विधा इच्छाशक्तिः, मनोशारीरिकस्वास्थ्यम्, एकत्वमेकीकरणम्, विकाससातत्यमित्यादिवैशिष्ट्यानि भवन्ति।

व्यक्तित्वं कथं स्यात् कीदृशव्यक्तित्ववान् कथं व्यवहरति इति निरूपितम् । तस्य किमभीष्टम् तस्य व्यवहारो कीदृशः इति निरूपितम्। प्रायः भारतीयानां व्यक्तित्वविचारः प्रौढव्यक्तित्त्वविचारः इति चर्चितः। पाश्चात्यानां व्यक्तित्वलक्षणानामपेक्षया अस्मदीयव्यक्तित्वं किञ्चत् अग्रे अस्तीति मे मतिः।

**सहायकग्रन्थसूची -**

१. शिक्षायाः मनोवैज्ञानिकाधाराः - डा. बि. पद्ममित्रश्रीनिवासः - पुरि - ओडिशा ।
२. प्राच्यपाश्चात्यमनोवैज्ञानिकतत्त्वानि - स्वातीप्रकाशनम् - तिरुपतिः।

## <u>संस्कृतशिक्षक:</u>

**रम्या के. आर्.**
शिक्षाशास्त्रिप्रथमवर्षम्

**गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।**
**गुरुः साक्षात् परं ब्रह्मा तस्मै श्री गुरवे नमः।।**

भारतीयसंस्कृतौ गुरोः स्थानं विशिष्टं वर्तते। **गुरु** शब्दस्य व्याख्या इत्थं प्रसिद्धा अस्ति - गिरति अज्ञानान्धकारात् इति गुरुः। प्राचीनकाले शिक्षकः स्वस्य त्यागेन आदर्शेन च समाजे विशिष्टां प्रतिष्ठां लभते स्म। वर्तमानकालेऽपि शिक्षकः एव विद्यालयस्य शिक्षापद्धतेश्च वास्तविकगत्यात्मिका शक्तिः वर्तते। वर्तमानकाले सर्वत्र भ्रष्टाचारः, स्वार्थपरतायाश्च वातावरणं दृग्गोचरी भवति। आसु परिवर्तितपरिस्थितिषु संस्कृतशिक्षकाणामुपरि तु विशिष्टं दायित्वं वर्तते यत् ते समाजे मानवीयमूल्यानां संरक्षणाय, भारतीयसंस्कृतेः रक्षणाय, शाश्वतमूल्यानां विकासाय च सततप्रयत्नशीलाः सन्तु। आधुनिके भारते संस्कृताध्यापनस्य महत्त्वम् अत्यधिकं वर्तते । आधुनिकभारते संस्कृतभाषाध्यापकस्य महत्त्वं बहुविधम्। संस्कृताध्यापनस्य महत्त्वं विना किञ्चिदपि भाषाशिक्षायाः उद्देश्यं पूर्णं न जायते ।

**संस्कृतभाषाशिक्षणस्य महत्त्वम् -**

* वसुधैव कुम्बकम् इति भावनाविकासार्थं संस्कृतभाषाशिक्षणम् ।
* भारतीयभाषाणां संरक्षणार्थं संस्कृतभाषाशिक्षणम् ।
* शैक्षिकविकासः भाषा-साहित्य-व्याकरणादिज्ञानार्थं संस्कृतभाषाशिक्षणम् ।
* बौद्धिकविकासार्थम् आध्यात्मिक-नैतिकज्ञानार्थञ्च संस्कृतभाषाशिक्षणम् ।
* चरित्रनिर्माणे संस्कताध्यापनस्य महत्त्वम् ।
* मानसिकविकास-आनन्दानुभूति-रसानुभूतीनाञ्च प्राप्त्यर्थं संस्कृतभाषाशिक्षणम् ।

संस्कृतभाषायाः स्थानम् अधुना अधोभागे वर्तते । संस्कृतभाषां पठितुं पाठयितुं च कोऽपि न इच्छति । अत एव संस्कृताध्यापकः एव संस्कृतभाषासमस्याः उत्पादयति। शिशवः प्रधानतया अनुकरणशीला भवन्ति। मातृभाषां विना अन्ये यां कामपि भाषां प्रायः अनुकरणेनैव शिक्षन्ते। संस्कृतशिक्षणस्य परमं प्रयोजनं भावग्रहणं भावव्यक्तीकरणञ्च वर्तते। संस्कृतशिक्षणं एकमात्र-उपायो मार्गे वा वर्तते। संस्कृतशिक्षणस्य समाधानाय संस्कृतशिक्षणस्य उत्तरदायित्वं

समूहदायित्वमस्ति । इदानीं प्रायः सर्वाः भाषाः अनुवादपद्धत्या अध्याप्यन्ते । संस्कृतभाषाऽपि अनुवादपद्धत्या अध्याप्य संस्कृतशिक्षणावसरे संस्कृतशिक्षकाणां समक्षम् अद्य बहूनि काठिन्यानि सन्ति । तत्र प्रमुखाः समस्याः एताः भवन्ति ।

* संस्कृतशिक्षणार्थमुपयुक्तवातावरणस्य अभावोऽस्ति।
* कुशल-प्रशिक्षिताध्यापकानामभावः।
* संस्कृतपाठशालासु विद्यालयेषु च दृश्यश्रव्योपकरणानाम् अभावोऽस्ति ।
* प्रशिक्षणमहाविद्यालयेषु आधुनिकतमोपकरणानाम् अभावोऽस्ति ।
* संस्कृतपाठ्यक्रमेषु वैज्ञानिकदृष्ट्या परिष्कारः अपेक्षतिः अस्ति ।
* संस्कृतपत्रपत्रिकाणामभावोऽस्ति ।
* जीविकोपार्जनस्य समस्या प्रमुखा ।

एताः प्रधानाः समस्याः संस्कृतप्रकृतौ दृश्यन्ते । एताः दूरीकर्त्तुं संस्कृताध्यापकेनैव शक्यते। संस्कृताध्यापकानाम् उत्तरदायित्वानि वर्तन्ते संस्कृतक्षेत्रे विद्यमानानां समस्यानां दूरीकरणम्। संस्कृताध्यापकः उत्तमव्यवहारवान् प्रयत्नशीलवान् च भवेत्। मानवस्य युक्तायुक्तविवेचनज्ञानमावश्यकम्। अहिंसा, सत्यम्, अक्रोधः, त्यागः, शान्तिः, क्षमता, तेजः, धैर्यम् इत्यादि गुणाः प्रत्येकं मानवस्य कृते आवश्यकम् ।

**संस्कृताऽध्यापकः -**

| **व्यक्तिगतम्** | **शिक्षणगतम्** |
|---|---|
| * स्वीयाध्यापकपदे गौरवप्रदर्शकः भवेत् । | शुद्धोच्चारणस्य ज्ञानं स्यात्। |
| * अध्यापनविषयेषु कुशलः भवेत् । | लेखने भाषणे च स्पष्टता स्यात्। |
| * सहनशीलयुक्तः भवेत् । | संस्कृतमाध्यमेन पाठनशीलता स्यात्। |
| * बोधनसामर्थ्यं भवेत् । | पाठनं स्फूर्तिप्रदायकं स्यात्। |
| * समभावयुक्तः स्यात् । | संस्कृतसाहित्ये अधिकारः स्यात्। |
| * अनुशासनप्रियः भवेत् । | शिक्षकस्य चिन्तनं वैज्ञानिकं स्यात ्। |
| * समयस्फूर्त्तिः अनुसर्तव्यः । | निरन्तराध्ययनशीलः स्यात्। |
| * आत्मसम्माननं भवेत् । | संस्कृतसम्भाषणशीलः स्यात्। |

* परोपकारभावयुक्तः भवेत् ।  आधुनिकताम् अनुकुर्यात् पाठने।

एतादृशः अध्यापकः चेत् संस्कृतस्य औन्नत्यम् एवमेव संस्कृतस्योपरि सर्वेषामिच्छाभावः अपि भविष्यति। सामान्यविषयपरिज्ञानेन साकं प्रत्येकं विषये समुचितं ज्ञानमपि अध्यापकस्य भूषणं वर्तते । बोधनसमये प्राचीन-आधुनिकशिक्षणविध्योः एतयोः समन्वयं कृत्वा बोधनीयम्। छात्राणां शारीरिकविकासं मानसिकाभिवृद्धिं बुद्धिं व्यक्तित्वं वैयक्तिक भेदाञ्च मनसि निधाय अध्यापनीयम्। ''अयं निजः अयं परः'' इति भावना कदापि न प्रदर्शनीया । परोपकारार्थमिदं शरीरम्, स्वाभाव एषैव परोपकारिणाम्, परोपकारः पुण्याय पापाय परपीडनम्, स्वाध्यान्मा प्रमद इत्यादयः अनुकरणीयाः। अर्थात् विषयाणां पुनरावर्तनं, स्वाध्यायश्च आजीवनं करणीयम् । संस्कृतसाहित्याध्यापनसमये कुलं, मतं, वर्गमित्यादिकं सङ्कुचितभावनां परित्याज्य समीचीनं विमर्शनं करणीयम् । संस्कृताध्यापकेषु सौहार्द्रता आवश्यकी। वस्तुतः संस्कृतभाषा आस्तिक्यभावना अनयोर्मध्ये अन्तरमेव नास्ति । भारतीयसंस्कृतेः प्रसारणं संस्कृताध्यापकस्य प्रमुखकर्त्तव्यम् इति। संस्कृताध्यापकेन संस्कृतछात्रसंख्यावर्धने प्रयत्नो विधेयः। तदर्थं छात्राणाम् आत्मसाक्षात्कारः आवश्यकः। उपरिनिर्दिष्टानि सर्वाणि लक्षणानि संस्कृताध्यापकाय आवश्यकानि।

**सन्दर्भग्रन्थसूची -**

१. संस्कृतशिक्षणम् - प्रो. सन्तोषमित्तलः ।

## पाठ्यचर्या

**एलिना राय्**

शिक्षाशास्त्रिप्रथमवर्षम्

विद्यालयः समाजस्य एकं लघुरूपं भवति। समाजस्य यथा उन्नतिः भवेत् तादृशी पाठ्यचर्याऽपि निर्मातव्या। पाठ्यचर्या शिक्षायाः उद्देश्यप्राप्तये एकं साधनं भवति। पाठ्यचर्यामाध्यमेन बालकस्य सर्वाङ्गीणविकासः उत्तमरीत्या कर्तुं शक्नुमः। पाठ्यचर्यायाः निर्माणे प्रमुखतया चत्वारः आधाराः भवन्ति यथा दार्शनिकाधाराः, सामाजिकाधाराः, मनोवैज्ञानिकाधाराः, वैज्ञानिकाधाराश्चेति।

**पाठ्यचर्यायाः अर्थः - (Meaning of Curriculum)**

पाठ्यचर्या इत्ययम् आङ्ग्लभाषायां Curriculum इति कथ्यते। Curriculum इति शब्दः लैटिनभाषायाः Currer इति शब्दात् निष्पन्नो वर्तते। यस्यार्थः भवति धावनक्षेत्रम्। यस्मिन् बालकः स्वलक्ष्यमधिगन्तुं धावति। विद्यालये जायमानानां संपूर्णक्रियाकलापानां समूहः भवति पाठ्यचर्या इति। पुरा पाठ्यचर्यायाः अर्थः "पाठ्यवस्तूनां सूचीबद्धता" इत्येवासीत्। परन्तु आधुनिककाले पाठ्यचर्यायाः परिभाषाः व्यापकतां गताः। इमाः परिभाषाः आत्मनि केवलविद्यालयीयविषयानेव न वस्तुतः छात्रस्य समस्ताः क्रियाः अनुभवान् चापि संगृह्य तिष्ठन्ति।

**पाठ्यचर्यायाः परिभाषाः - (Definitions of Curriculum)**

* शिक्षायां पाठ्यचर्या एकस्यां शैक्षिकप्रक्रियायां घटितानां विद्यार्थ्यनुभवानां समग्रता वर्तते। (Wikipedia)

* पाठ्यचर्यायां ते समस्तानुभवाः सम्मिलिताः भवन्ति यान् बालकः स्वविद्यालयनिर्देशने प्राप्नोति। (Dewanga)

**पाठ्यचर्यायाः महत्त्वम् (Importance of Curriculum)**

१. पाठ्यचर्या शिक्षोद्देश्यानां लक्ष्यानाञ्च प्राप्तये एकं साधनमस्ति।

२. पाठ्यचर्या शिक्षणं विधातुं शिक्षकेभ्यः निश्चिताधारं प्रयच्छति।

३. औपचारिकशिक्षायाः व्यावहारिकप्रयोगः पाठ्यचर्यया एव सम्भवति।

४. पाठ्यचर्या समाजस्य संस्कृतेश्च दर्पणः भवति।

५. पाठ्यचर्या विद्यार्थिनां व्यक्तित्वविकासे साहाय्यं प्रयच्छति।

**पाठ्यचर्यायाः प्रकाराः (Types of Curriculum)**

पाठ्यचर्यानिर्माणे व्यक्तेः समाजस्य राष्ट्रस्य च स्थितिः आकाङ्क्षा च अवलोक्यते। पूर्वोक्तान् विषयान् द्रढयन्ति निम्नोक्ताः पाठ्यचर्यायाः: प्रकाराः। यथा -

१. विषयकेन्द्रितपाठ्यचर्या (The subject Centered Curriculum)।

२. अनुभवकेन्द्रितपाठ्यचर्या (The Experiened Curriculum)।

३. कार्यकेन्द्रितपाठ्यचर्या (The Activity Centered Curriculum)।

४. बालकेन्द्रितपाठ्यचर्या (Child Centered Curriculum)।

५. जीवनकेन्द्रितपाठ्यचर्या (The life Centered Curriculum)।

६. सन्तुलितपाठ्यचर्या (Balanced Curriculum)।

७. अन्तर्भागात्मिकपाठ्यचर्या (Core Curriculum)।

१. **विषयकेन्द्रितपाठ्यचर्या** - अस्यां पाठ्यचयायां बालकानाम् अपेक्षया विषयस्य कृते महत्त्वम् अधिकं दीयते। किं पाठनीयमिति विषये एव अध्यापक अधिकमवधानं प्रदर्शयति, न तु कथं पाठनीयमिति विषये। अत: बालक: व्यावहारिकसमस्या: समाधातुं न प्रभवति। अस्माकं देशे इयमेव पाठ्यचर्या प्रचलन्ती वर्तते।

२. **अनुभवकेन्द्रितपाठ्यचर्या** - इयं पाठ्यचर्या विषयाणाम् अपेक्षया अनुभवानामुपरि आधारिता भवति। अस्यां पाठ्यचर्यायां बालकानाम् अनुभवा: एव महत्त्वपूर्णस्थानं प्राप्नुवन्ति। अत्र बालका: विविधक्रियाभि: अनुभवान् प्राप्नुवन्ति। यथा – शैक्षिकयात्रा, जन्तुशालाप्रदर्शनम्, चित्रवस्तुप्रदर्शनशाला: इत्यदय: साक्षात् अनुभवं सम्पादयितुमुपकुर्वन्ति।

३. **कार्यकेन्द्रितपाठ्यचर्या** - अस्यां पाठ्यचर्यायां विविधकार्याणां महत्त्वं स्वीक्रियते। जान् डूयीमहोदयस्य आशय: वर्तते यत् अनया पाठ्यचर्यया बालक: समाजोपयोगीनि कार्याणि करोति। तेन तस्य सर्वाङ्गीणविकास: जायते।

४. **बालकेन्द्रितपाठ्यचर्या** - अस्यां पाठ्यचर्यायां बालकानां मुख्यं स्थानं भवति न तु विषयाणाम्। इयं पाठ्यचर्या बालकानां विविधावस्थानुगुणं निर्मीयते विद्वद्भि:। तेषां रुचीनां क्षमतानां योग्यतानामपि प्रयोग: क्रियते अत्र। यथा माण्टेस्सोरी, किण्डरगार्डेन्, ह्यूरिष्टिक्विधि:।

५. **जीवनकेन्द्रितपाठ्यचर्या** - अस्यां पाठ्यचर्यायां बालकानां दैनन्दिनजीवनेन सह सम्बद्धानां विषयाणां कृते एव प्राधान्यं दीयते। सुखशान्तिमयजीवनयापनाय के विषया: आवश्यका: ? इति विचार्य ते एव विषया: पाठ्यचर्यायां स्थाप्यन्ते। प्रयोजनवादीजना: अस्या: पाठ्यचर्याया: समर्थका: भवन्ति।

६. **सन्तुलितपाठ्यचर्या** - पाठ्यचर्यासंरचनासिद्धान्तान् सर्वानपि मनसि संकल्प्य पाठ्यचर्यानिर्माणं क्रियते चेत् तत् भवति सन्तुलितपाठ्यचर्या। अस्यां पाठ्यचर्यायां मानवजीवनसम्बद्धानां सर्वप्रकाराणां क्रियाणां सर्वाङ्गीणविकासस्य कृते समप्राधान्यं दीयते। पुन: अस्यां पाठ्यचर्यायां कालानुगुणं भविष्ये कथम् आचरणीयम् इत्यपि समालोच्यते।

७. **अन्तर्भागात्मिकपाठ्यचर्या** - अस्यां पाठ्यचर्यायां केचनविषया: अनिवार्या: तथा केचन ऐच्छिका:। अस्यां पाठ्यचर्यायां विषयवस्तु जीवनस्य विविधै: आवश्यकैस्सह सम्बन्धितं भवति।

अत्र विद्यालय: सामाजिकदायित्वानां विषये ध्यानं दद्यात् तथा सामाजिककुशलकार्यकर्तॄणां निर्माणं कुर्यात्। राष्ट्रियशिक्षानीतौ राष्ट्रियपाठ्यक्रमस्य रूपरेखा अन्तर्भागात्मिकपाठ्यचर्यायाम् एव आधारिता भवति।

**पाठ्यचर्याया: सिद्धान्ता:-** आदर्श-समर्पण-सम-संरक्षण-उपयोगि-सर्जनात्मक-आवश्यकता-कार्य-क्रीडा-रुचिसिद्धान्ता: पाठ्यचर्याया: चयने प्रमुखा: सिद्धान्ता: भवन्ति।

**उपसंहार: :-**

अत: ज्ञायते यत् केवलम् उत्तमशिक्षया एक: उत्तमसमाज: वा उत्तमनागरिकनिर्माणं वा कर्तुं न शक्नुम: अपि तु उत्तमनागरिकनिर्माणे उत्तमविद्यालय: अपि च उत्तमपाठ्यचर्या अत्यन्तम् आवश्यकं भवति। सा पाठ्यचर्या समाजानुगुणं, कालानुगुणं, प्रान्तानुगुणं च भवेत्। तस्मात् छात्राणां सर्वाङ्गीणविकास: तथा समाजस्य अपि विकास: भवितुमर्हति।

**सहायकग्रन्थसूची: -**

शिक्षाया: दार्शनिकाधारा: - सोमनाथ साहु।

आधुनिकशिक्षा - लोकमान्यमिश्र:

## सज्जनानां सान्निध्यम्

**जागृति आढ्य**

शिक्षाशास्त्रिप्रथमवर्षम्

**चन्दनं शीतलं लोके चन्दनादपि चन्द्रमा।**
**चन्द्रचन्दनयोर्मध्ये शीतला साधु सङ्गति:।।**

अस्माकं समाजे चन्दनसदृशं शीतलवस्तु नास्ति। चन्द्रमा चन्दनात् अपि शीतला, तथैव साधुजनानां सङ्गति: सत्सङ्गति: इति कथ्यते। मानव: एक: सामाजिकप्राणी भवति। स: सर्वदा साधुजनै: साकं निवासं कर्तुं न शक्नोति, संसारे न कोऽपि मानव: संसर्गेण विना स्थातुं शक्यते। यदि तत् सङ्गति: सत्सङ्गति: भवति, तर्हि तस्य जीवनं सुखमयं भवति। यथा – **एका लता वृक्षेण विना स्वजीवनं सम्यक् रूपेण जीवितुं न शक्नोति, सा वृक्षस्य उपरि आधारितं भवति।**

पशुपक्षिण: स्वमित्रै: सह निवासं कृत्वा प्रसन्ना: भवन्ति। कथनस्य तात्पर्यं यत् संसारेऽस्मिन् नैव कोऽपि जीव: स्वजीवनं धारणं कर्तुं शक्नोति, यत्र कुत्रापि स: तिष्ठति, उत्तिष्ठति, खादति, पिबति, आनन्दं च अनुभवति, तत् सर्वं वातावरणस्य उपरि आधरित: भवति। एवं वस्तुत: जना: यादृश्यां सङ्गतौ वसन्ति, तादृश: एव प्रभाव: तस्मिन् परिदृश्यते, यदि स: दुष्टै: जनै: सह निवसति तर्हि स्वभावेन स: दृष्ट: भवति, परन्तु यदि सज्जनानां सङ्गतौ वसति, तर्हि सज्जनो भवति, तर्हि नीतिवाणी अस्ति- **संसर्गजा: दोषगुणा: भवन्ति।**

प्राचीनकाले वाल्मीकि: स्वस्य जीवने दस्युरेव आसीत्, परन्तु परवर्तिकाले सज्जनानां संगत्या महाकवि: भूत्वा रामायणमहाकाव्यं रचितवान्। सज्जनानां सङ्गत्या एव कबीर: समाजे प्रतिष्ठावान् सञ्जात:। परन्तु समाजे विद्वान् मानव: भवति, किन्तु तस्य कार्याणि दुष्टानि भवन्ति, तादृशानां जनानां सङ्गति: कदापि न विधेया, भर्तृहरिणा उक्तम् :-

**दुर्जन: परिहर्तव्य: विद्ययाऽलंकृतोऽपि सन्।**
**मणिना भूषित: सर्प: किमसौ न भयङ्कर:।।**

संसारेऽस्मिन् यदि जन: सुखी भवितुम् इच्छति तर्हि तेन सदैव सज्जनानां सङ्गति: करणीया। दुष्टेभ्य: जनेभ्य: सदैव दूरीभूयात्। दुष्टानां सङ्गत्या जनस्य चरित्रम् अपि कलुषितं भवति। अत एवोच्यते -

**सद्भिरेव सहासीत् सद्भि: कुर्वीत सङ्गतिम्।**
**सद्भिर्विवादं मैत्रीं च, नासद्भि: किञ्चिदाचरेत्।।**

प्राय: दृश्यते सुसंस्काराणाम् अपेक्षया कुसंस्काराणां प्रभाव: मानवेषु शीघ्रमेव भवति। यदि जन: गुणिनां संसर्गे वसति, तर्हि तस्मै कस्यापि शिक्षकस्य अध्यापकस्य वा आवश्यकता न भवति। अत: अस्माभि: सदैव सत्सङ्गति: विधेया ।

## दलशिक्षणम्

**सुषमा मिश्रः**

शिक्षाशास्त्रिप्रथमवर्षम्

**दलशिक्षणस्य अर्थः -** दलशिक्षणं शैक्षिणिकसङ्गटनस्य एकम् ईदृशं रूपम् अस्ति, यस्मिन् शिक्षणे कक्ष्यायाम् एकस्य अध्यापकस्य स्थाने विभिन्नविषयाणां विशेषज्ञाः अध्यापकाः सहायकाः भवन्ति एवं ते सर्वे मिलित्वा प्रभाविरूपेण शिक्षणकार्यं कुर्वन्ति। छात्राध्यापकयोर्मध्ये कक्षायां प्रचलितायाः क्रियायाः नाम भवति शिक्षणम्। अस्मिन् एकं तु दलम् अपरं तु शिक्षणम्। अर्थात् दलस्य समूहस्य वा शिक्षणम्। दलशिक्षणे कतिपयविद्वांसः समूहशिक्षणं सहकारिताशिक्षणम् इत्यपि कथयन्ति। वर्तमानसमये शिक्षाशास्त्रिणः वदन्ति यत् दलशिक्षणं कक्षायां शिक्षणाधिगमप्रक्रियां सम्यग्रूपेण सञ्चालयितुम् एकं महत्त्वपूर्णं साधनं भवति । संयुक्तराष्ट्रामेरिकायाः विद्यालयेषु प्रयाशः पञ्चाशत्वर्षतः दलशिक्षणपद्धतेः प्रयोगः कक्ष्यायां क्रियते।

**दलशिक्षणस्य परिभाषाः -** दलशिक्षणविषये केचन विद्वांसः इत्थं वदन्ति। डेविड्वारविक् महोदयानुसारं दलशिक्षणं शिक्षणव्यवस्थायाम् एकं स्वरूपमस्ति दलशिक्षणम् अत्र अनेके शिक्षकशिक्षकाणां माध्यमरूपेण, अभिरुचीः, दक्षताश्च एकत्रीकुर्वन्ति। छात्राणामावश्यकतानुसारं शिक्षकाणाम् एकः गणः प्रस्तूयते तथा च विद्यालयस्य सौविध्यानुसारमुपयोगः क्रियते। कञ्चन छात्रसमूहं कञ्चित् विषयविशेषम् अध्यापयन्ति इति।

**दलशिक्षणस्य वैशिष्ट्यम् -**

१. अयमेकः शिक्षणविधिरस्ति।

२. अस्य प्रविधेः योजना परिवर्तनशीला भवति।

३. परस्परसहयोगस्य उपरि आधारितः भवति एषः प्रविधिः।

४. अत्र सर्वे शिक्षकाः मिलित्वा योजनां निर्मान्ति अध्यापयन्ति मूल्याङ्कनमपि कुर्वन्ति।

५. अस्मिन् प्रविधौ शिक्षकः स्वक्रियाणां निर्धारणं स्वयमेव करोति।

६. अयमेकः प्रविधिः अनुदेशनपरिस्थितीनामुत्पादनार्थं भवति।

**दलशिक्षणस्य प्रकाराः -** विभागशः दलशिक्षणम्।

अन्तः अनुशासनदलशिक्षणम्।

## अन्त: विद्यालयदलशिक्षणम्।

अत्र दलशिक्षणस्य स्वस्य विभागानुसारं दले विद्यमाना: अध्यापका: छात्रा: च स्वीयदायित्वं सम्पादयन्ति। एकस्मिन् स्थाने अध्यापकानां सदस्यानाञ्च अंशग्रहणं भवति चेत् तत्र विभागीयदलशिक्षणम्। पुन: यत्र अनुभवरता: अध्यापका: छात्रेभ्य: सम्यक्तया ज्ञानं प्रदातुं प्रयत्नशीला: भवन्ति तत् भवति अन्त: अनुशासनदलशिक्षणम्। एकस्मिन् नगरे एकाधिकप्रशिक्षणसंस्था: भवन्ति, चेत् तत्र अन्त: विद्यालयदलशिक्षणम् अतीव प्रभावशाली भवति।

**गुणा:** :-

१. अनुदेशनस्य गुणवत्ताया: विषये संशोधनं कर्तुं शक्यते।

२. दलशिक्षणेन समयस्य शक्तेश्च अपव्यय: न भवति।

३. छात्रेभ्य: अधिकविशेषज्ञानं सम्मुखीकरणाय अवसर: प्रदीयते।

४. शिक्षकाणां व्यावसायिकस्तरस्य विकास: भवति।

५. प्रत्येकं छात्राय स्वतन्त्ररूपेण विचारप्रकटनाय अवसर: प्रदीयते।

**दोषा:** :-

१. दलशिक्षणस्य व्यय: अधिक: भवति।

२. शिक्षणस्य मुख्याधार: भवति सहयोग:, परन्तु अस्य अभावे अर्थात् एक: शिक्षक: अपर शिक्षकाय सहयोगं न करोति चेत् अस्य शिक्षणस्य चालने क्लिष्टता आगच्छति।

३. अस्मिन् शक्षणे बहुभि: शिक्षकै: सह मिलित्वा कार्यं क्रियते। एतदर्थं विचारेषु भिन्नता परिलक्ष्यते।

४. शिक्षकाणां कार्यभार: वर्धते।

५. दलशिक्षणस्य सम्प्रत्ययस्य नवीनकारणानां विषये शोधकार्यं नाभवत्। केवलं प्रयास: एवं त्रुटिसिद्धान्तेन शिक्षणस्य प्रयत्न: क्रियते।

**सहायकग्रन्थसूची** :-

१. शैक्षिकप्रविधि: - डा. स्नेहलता मिश्रा।

२. भाषाशिक्षणे नवाचारा: - सन्तोषमित्तल:।

# विद्या

**एलिना जेना**

शिक्षाशास्त्रिप्रथमवर्षम्

**विद्या** शब्द: विद् धातो: क्यप् कृत्वा स्त्रीप्रत्यय: टाप् संयोजनेन निष्पद्यते। मानवजीवने सर्वदा विद्याया: महत्त्वं वर्तते। विद्वान् जन: अस्मिन् प्रपञ्चे विद्यमानं सर्वं सुखम् इच्छति। सा विद्या न केवलम् इहलोके अपि तु परलोके अपि आनन्दं ददाति। अत: एव कथ्यते शास्त्रेषु- **विद्ययाऽमृतमश्नुते, विद्यया विन्दतेऽमृतम्**।

विद्या मानवस्य गुप्तधनम् अस्ति। विद्या कामधेनु: इव असमये अपि फलं ददाति। विद्या प्रवासजनानां कृते माता सदृशी भवति। अत: केनापि उक्तम् :-

**कामधेनुगुणा विद्या ह्यकाले फलदायिनी।**
**प्रवासे मातृसदृशी विद्य गुप्तं धनं स्मृतम्।।**

अस्मिन् संसारे सर्वं धनं व्यये कृते तस्य नाश: भवति। परन्तु विद्या एकं धनं तस्य व्यय: सत्यपि तत् वर्धनं भवति। सञ्चयेन विनष्टं भवति। अत: विद्या वस्तुत: अतीवाद्भुतं धनमस्ति। अत: उच्यते -

**अपूर्व: कोऽपि कोशोऽयं विद्यते तव भारति।**
**व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्।।**

विद्याया: अन्यैका विशेषता अपि अस्ति। कोऽपि चोर: विद्यानामकं धनं चोरयितुं न शक्नोति, राजा अपि बलपूर्वकं ग्रहीतुं न शक्नोति। भ्राता अपि विभाजनं कर्तुं न शक्नोति। अस्य धनस्य भारोऽपि न भवति वहनेन । अनेन कारणेन अन्येषु धनेषु एषा विद्या मुख्या। उक्तञ्च -

**न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।**
**व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्।।**
**विद्या ददाति विनयं विनयाद् याति पात्रताम्।**
**पात्रत्वात् धनमाप्नोति धनात् धर्म: तत: सुखम्।।**

एक: राजा स्वस्मिन् राज्ये पूजार्ह: भवति। परन्तु विद्वज्जन: सर्वत्र पूजार्ह: भवति। अत:

**विद्वत्त्वं च नृपत्वञ्च नैव तुल्यं कदाचन।**
**स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।।**

वस्तुत: राज्ञः पूजा स्वदेशे भवति। यदि स: देशान्तरं गच्छति तर्हि तस्य सम्मानं स्वदेशवत् न भवति। किन्तु विदुषः सम्माननं यत्र कुत्राऽपि गच्छति तत्रापि भवति तस्य सम्माननम्।।

भारतीयसंस्कृतौ मानवजीवनं चतुर्षु आश्रमेषु विभक्तमस्ति तेषु आश्रमेषु प्रथमो ब्रह्मचर्याश्रम: विद्यते विद्यार्जनं करोति। विद्यार्थिजीवने स: परिश्रमं करोति। परिश्रामनुसारेण विद्या नामकं रत्नम् अपि लभते। अत: कथ्यते:-

**सुखार्थिन: कृतो विद्या विद्यार्थिन: कृतो सुखम्।**
**सुखार्थी चेत् त्यजेद् विद्यां विद्यार्थि चेत् त्यजेद् सुखम्।।**

विद्या मानवस्य सर्वोत्कृष्टं भूषणं भवति। विद्यावीहिन: जन: सभायां न शोभते यथा हसंमध्ये बक:। अत: विद्या सर्वदा महनीया। अत: सर्वदा अस्माभि: विद्यार्जनार्थं प्रयत्न: करणीय:। **सा विद्या या विमुक्तये।।**

**सन्दर्भग्रन्था:** :- संस्कृतप्रबन्धशतकम् - प्रमोदकुमार पाढि।
संस्कृतनिबन्धचन्द्रिका - डि. राकेश शास्त्री।
शिक्षाया: दार्शनिकाधारा: - सोमनाथ साहु।

## सामाजिकपरिवर्तने शिक्षाया: भूमिका

**सस्मिता बिसोइ**
शिक्षाशास्त्रिप्रथमवर्षम्

**उपोद्घात:** - को नाम समाज: इत्युक्ते मानवानां समूह: समाज: इति कथ्यते। समाजे सर्वेऽपि तिष्ठन्ति यथा मनुष्या:, पशव:, कीटा: इत्यादय:। पशव: अरण्ये स्वाभाविकं जीवनं प्राप्नुवन्ति। मनुष्या: समाजे अपि स्वीयं जीवनं यापयन्ति। अत्र मनुष्याणाम् आश्रयस्थलं भवति समाज:। अत: मनुष्य: सामाजिकप्राणी इति कथ्यते। परन्तु पशव: यत्र निवसन्ति तत् समज: इति उच्यते।

**विषय:** :-

| **समाज:** | **समज:** |
|---|---|
| विचार: | निद्रा |
| विनय: | कलह: |
| भाषा | व्यसनम् |

| | |
|---|---|
| समाजः - सम् + अज + घञ् इति पदात् शब्दः निष्पद्यते मानवानां समूहः समाजः कथ्यते। अत्र विचारः, विनयः, आचारः, भाषाशालीनता इत्यादिगुणयुक्ताः जनाः विलसन्ति। यत्र व्यवस्थितरूपेण सर्वं कार्यं प्रचलति। | समजः सम् + अज + अप् इति व्युत्पत्या पशुसमूहः इत्यर्थः। पशूनां समूहः समजः इति कथ्यते। अत्र वृथा निद्रा, कलहः, व्यसनम्, हुतम् प्रचलति। यत्र व्यवस्थितरूपेण किमपि न चलति। |

अत एव डा. सर्वेपल्लि राधाकृष्णन्महोदयैः कथितम् - **चिन्तनशीलमस्तिष्कानि पुष्पितुं च कलाविज्ञानयोः समृद्धयै च प्राथमिकदशा इयमावश्यकी वर्तते यत् संघर्षरहितः कश्चन समाजः यः समाजः सुरक्षावकाशं च प्रदातुं शक्नुयात्।**

**किं नाम सामाजिकपरिवर्तनम्** - समाजः संसारो वा परिवर्तनशीलः। समाजशास्त्रिणां दृष्ट्या समाजः गत्यात्मकः। सः विकासशीलः परिवर्तनशीलश्च भवति। समाजस्य स्थिरता समाजस्य अवनतिं द्योतयति। अतः टी.पि.नन् महोदयानुसारम् - राष्ट्रियपरम्पराणां संस्थानां स्थिरता व्यक्तेः जीवनं महत्त्वहीनं करोति। मानवः सामाजजीवी भवति। समाजस्य संरचना मनुष्याधीना भवति। समाजः मनुष्याणं नीतिनियमानुसारेण प्रचलितो भवति। समाजे जातिभेदः, धर्मभेदः दृश्यते। उच्चजातिजनाः अनुसूचितजनानां परिहासं कुर्वन्ति। समाजस्य मूलाधाराः मानवानाम् अन्तःक्रियाः एव। ताश्च अन्तःक्रियाः निरन्तरं परिवर्तनशीलाः। तस्मात् कारणात् समाजोऽपि परिवर्तनशीलः। वयं प्रतिक्षणमिदम् अनुभवामः साक्षात् कुर्मश्च ईदृश्यः परिस्थितयः शिक्षया परिवर्तयितुं शक्यन्ते।

**सामाजिकपरिवर्तने शिक्षायाः भूमिका** - समाजद्वारा शिक्षायां शिक्षाद्वारा च समाजे परिवर्तनं जायते इति प्रतिपादितम् अनुभूयते च। अतः सामाजिकपरिवर्तने शिक्षायाः भूमिका किञ्चित् विशदीक्रियते। इदानीं समाजे जातिभेदाः दृश्यन्ते उच्चजातिजनाः किमर्थं निम्नजातिजनैः साकं समाजे एकत्र न उपविशन्ति, निम्नजातिजनान् मन्दिरं प्रति गमनार्थं वारयन्ति। किम् ईश्वरः द्वयोः मध्ये भेदं पश्यति वा ? तर्हि जात्योः मध्ये भेदं किमर्थम् आयाति ? तथैव धर्मयोः मध्येऽपि भेदः अस्ति। ईदृशाः भेदाः न भवेयुः। एतदर्थं शिक्षा सर्वेभ्यः समानतया दातव्या वर्तते। स्वतन्त्रतायाः

प्राप्तेः अनन्तरं धर्मनिरपेक्षराज्यस्थापनार्थं भारते शिक्षास्वरूपस्य परिवर्तनं कृतम्। किन्तु अद्यापि धर्मनिरपेक्षता द्वेष-वैषम्य-वैमनस्यादिकं तथैव स्थापयन्तः जीवामः इति विरोधाभासः एव।

**उपसंहारः -** विभिन्नपारिवारिकभूमिकां धरन्तौ द्वौ बालकौ यद्यपि एकस्मिन् विद्यालये पठन्तौ स्तः। तैरेव शिक्षकैः शिक्षितौ, तथापि स्व-अभिरुचि-आचार-विचारेषु भिन्नौ भवतः कारणं परिवारस्य प्रभावः। अतः परिवारेण सह शिक्षायाः घनिष्ठसम्बन्धः अस्ति। शिक्षाविषये परिवारे या सहानुभूतिः लभ्यते सा नान्यत्र लभ्यते। तथा च शैक्षिकेतिहासस्य सर्वेषु स्तरेषु परिवारस्य शिक्षया सह सम्बन्धः भृशं वर्तते। समाजः तादृशशिक्षासंस्थानां स्थापनार्थं प्रयतेत यत्र स्वसदस्यानां कृते ज्ञानं कौशलम् आदर्शः शिक्षते, यत्र च निरन्तरविकासो जायते।

**सहायकग्रन्थाः -**


१. दर्शनशिक्षणम् – शिक्षायाः सामाजिकाधाराश्च – डा. परमेश्वर नारायण शास्त्री।

२. शिक्षायाः दार्शनिकसामाजिकाधाराः - डा. प्रेमासिंहसिकरवारः ।


## आदर्शवादे शिक्षकछात्रयोः सम्बन्धः


**स्वागतिका चम्पति**

शिक्षाशास्त्रिप्रथमवर्षम्


**क्षणे क्षणे यन्नवतामुपैति तदेव रूपं खलु शिक्षकस्य**

निखिलभुवने न कोऽपि नरः विद्यते, यः शिक्षकं न नमति। संसारेऽस्मिन् विद्यमानाः देवतुल्याः पथप्रदर्शकरूपेण राराजन्ते शिक्षकाः। वर्तमानसमाजे गुरुः, शिक्षकः, अध्यापकः, आचार्य इत्यादिभिः नामभिः अभिधीयते, येषां पार्श्वे विद्यायाः वारिधिः पुष्पसदृशं शोभते तां विद्यामुपार्जयितुं छात्रः सर्वदा शिक्षकस्य सुव्यवहारेण सुसम्बन्धस्थापनेन मधुरवाचा च प्रभावितः भवति। एतादृशं व्यवहारं दृष्ट्वा छात्रः तं शिक्षकम् आदर्शशिक्षकरूपेण मनुते। अतः उक्तं यत् -

**श्लिष्टा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता।**
**यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव।।**

आध्यात्मिकप्रपञ्चः एव भाववादः आहोस्वित् आदर्शवादः इत्यपि व्यवह्रियते। आदर्शवादे व्यक्तेः शरीरस्य महत्त्वं न भवति अपि तु तस्य व्यक्तित्वस्य महत्त्वं भवति। व्यक्तित्वम् आदर्शानां विचाराणाञ्च मिश्रणमेव भवति। शिक्षा एका सोद्देश्यप्रक्रिया भवति यत्र व्यक्तित्वस्य,

सुचरित्रस्य, सुनागरिकस्य च निर्माणं क्रियते। अत एव शिक्षा मानवम् अधिगम्य मानवस्य निर्माणं करोति। व्यक्तित्वनिर्माणे तिस्रः शक्तयः कार्यं कुर्वन्ति ताश्च **- वातावरणं, वंश-परम्परा, संकल्पशक्तिश्चेति।**

**आदर्शवादे शिक्षायाः उद्देश्यानि :-** आदर्शवादानुगुणं यदि शिक्षायाः स्वरूपं विविच्यते तर्हि वेदेषु शिक्षास्वरूपरूपेण अध्यात्मज्ञानं, नैतिकज्ञानम्, आस्तिक्यं, बाह्यक्रिया, अन्तःक्रिया, वाचिकं, मानसिकं, हृदात्मकं, बौद्धिकञ्च समुन्नतिं प्रतिपादयति। शिक्षायाः उद्देश्यरूपेण सच्चारित्र्यं, विनयः, संस्कृतिः, सभ्यता, गुणग्राहिता, कलाप्रियत्वादिगुणानां विस्तृतरूपेण अन्वयं करोति। शिक्षायाः उद्देश्यम् आत्मसाक्षात्कारः इति स्वीक्रियते आदर्शवादिभिः।

**आदर्शवादे शिक्षक-छात्रसम्बन्धः** - शिक्षकस्य स्थानं प्रमुखं शिष्यस्य स्थानं गौणं च भवति। आदर्शवादे शिक्षकः एकाधारेण दार्शनिकः, मार्गनिर्देशकश्च भवति। शिक्षकेन विना छात्रस्योन्नतिः न सम्भवति। आत्मानुभूतेः समये शिक्षकस्य आवश्यकता नितराम् अपरिहार्या वर्तते। शिक्षकस्य मार्गनिर्देशानुसारं छात्रः स्वीयचरित्रं, व्यवहारं च निर्माति। आदर्शवादे शिक्षकाः चतुर्धा विभक्ताः ते **आचार्यः, प्रवक्ता, श्रोत्रियः, अध्यापकश्चेति।** शिक्षकापेक्षया आचार्यः दशगुणेषु अग्रभाक् भवति। आचार्यानन्तरं द्वितीयं स्थानं प्रवक्तुः भवति। सैव महाभारते पाणिनिग्रन्थे च आख्याता इति नाम्ना सुपरिचितः। यः विचक्षणः धीमान् अध्येतृणां सर्वसंशयच्छिन्नविचिकित्सः भवति, छन्दसः अथवा वेदशाखायाः कण्ठस्थीकर्ता च यः भवति स एव श्रोत्रियपदवाच्यः भवति।

**आदर्शवादः - छात्रः** :- आदर्शवादे छात्रस्य आध्यात्मिकपक्षस्योपरि अधिकं महत्वं भवति। प्रकृतिवादिनः यथा छात्रकेन्द्रितशिक्षायाः संरचनां कुर्वन्ति न तथा आदर्शवादिनः। एते विचारकेन्द्रितशिक्षायाः संरचनां कुर्नन्ति। विचारस्य प्रधानस्थानं, गौणस्थानं तु छात्रस्य। अत्र छात्रः आदर्शभूतः, नीतिमान्, श्रद्धावान् च भवेत्। शान्तचित्ताय, जितेन्द्रियाय एव शिष्याय ब्रह्मविद्यायाः उपदेशाः दातव्याः।

**श्रद्धावांल्लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छाति।।** पुनश्च
**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।।**

**आदर्शवादे शिक्षकच्छात्रयोः सम्बन्धः :-** आदर्शवादे शिक्षणविधेः द्वे प्रमुखे अङ्गे भवतः। प्रमुखाङ्गत्वेन शिक्षकः द्वितीयाङ्गत्वेन छात्रः। यावत्पर्यन्तम् अनयोर्मध्ये मधुरतमः स्नेहयुक्तश्च सम्बन्धो न भवेत्। तावत्पर्यन्तं शिक्षणं न कल्याणकरं फलदायकञ्च भवतीति। आदर्शवादे शिक्षकछात्रसम्बन्धः दृढतरः भवति।

**A teacher is a Friend, Philosopher and Guide**

सन्दर्भग्रन्थाः :-

१. शिक्षायाः दार्शनिकाधाराः - डा. सोमनाथ साहुः।

२. शिक्षामनोविज्ञानम् – प्रो. फतेहसिंहः, आदित्यप्रकाशनम्।

३. भारतीयविचारदर्शनम्।

## त्रिभाषासूत्रे संस्कृतभाषायाः महत्त्वम्

**राज्यलक्ष्मी बिश्वाल**

शिक्षाशास्त्रिप्रथमवर्षम्

भाषा अस्माकं व्यवहारस्य माध्यमं भवति। भाषणात् भाषा इति कथ्यते। विभिन्नानि रूपाणि सन्ति भाषायाः । यथा - मातृभाषा, राष्ट्रभाषा, अन्ताराष्ट्रियभाषा च। **भाष् व्यक्तायां वाचि** इति धातोः निष्पन्नः भवति भाषा शब्दः। भाषा भवति अभिप्रायप्रकटनसाधकम्। भावविनिमयार्थं भाषां विना अन्यत् साधनं नास्ति। समाजे मानवो हि श्रेष्ठप्राणी वर्तते, किमर्थम् इत्युक्ते मानवः केवलं तस्य भावं भाषया प्रकटयितुं शक्नोति। अत एव उच्यते आंग्लभाषायां – Man is man Because of his Speech। त्रिभाषाः यथा – मातृभाषा, राष्ट्रभाषा, अन्ताराष्ट्रियभाषा च । त्रिभाषासु संस्कृतभाषा लोके प्राचीनतमा भाषा भवति। आंग्लभाषायाम् उच्यते Old is Gold इति।

अतः अस्मिन् विषये संस्कृतं विना नैव समर्था भवितुमर्हति। यां भाषां बालकः मातुः अङ्के शिक्षते सा भाषा भवति मातृभाषा। अर्थात् बालकः जन्मात् यां भाषां परिवारात् शृणोति स्वयमपि शुद्धरूपेण जानाति सा तु मातृभाषा भारते बहुभाषाभाषीप्रदेशो वर्तते। प्रत्येकं प्रदेशे एकां मातृभाषा अस्ति परन्तु ताः तु भिन्नरूपेण सन्ति। परन्तु राष्ट्रे प्रत्येकस्मिन् प्रदेशाय समानः एव। यत् द्वारा अनया भाषायैव जनेषु एकात्मकतायाः संचारः भवति। अस्माकं राष्ट्रभाषा भवति

हिन्दी। विश्वस्य अस्य सम्पूर्णराष्ट्राणां विचारविनिमयः पत्राचारः व्यापाराश्च यया भाषया क्रियते सा भवति अन्ताराष्ट्रियभाषा। एषा भाषा राष्ट्राणां सम्बन्धस्थापिका भाषा। वर्तमानसमये अन्ताराष्ट्रियभाषायाः महत्त्वं गौरवं वा आङ्गलभाषां प्रति गच्छति।

प्रत्येकं देशस्य मातृभाषासु १७ प्रतिशतं संस्कृतशब्दाः सन्ति। संस्कृतिः प्रत्येकं देशस्य आधारः भवति। तस्याः संस्कृतेः संरक्षणार्थं कस्यापि भाषायाः नितराम् आवश्यकता अस्ति। इयं भाषा सामान्यतः जनसाधारणभाषाभ्यः भिन्नाः भवन्ति। इमां भाषां जनाः श्रद्धया अवलोकयन्ति। इयं भाषा यद्यपि अल्पजनैः अवगन्तुं शक्यते, तथापि समाजे प्रतिष्ठां धरति। सैव तु सांस्कृतिकी भाषा **संस्कृतम्** वर्तते।

सम् उपसर्गपूर्वक कृञ् धातोः क्तप्रत्यये कृते सति सुडागमे संस्कृतम् इति शब्दः निष्पन्नः भवति। सम्यक् कृतं संस्कृतम्। संस्कृतस्य महत्त्वं यथा सांस्कृतिकक्षेत्रे, ऐतिहासिकमहत्त्वम् आधुनिकयुगे संस्कृताध्ययनस्य महत्त्वं, चरित्रनिर्माणे, वैज्ञानिकभाषारूपेण संस्कृतस्य महत्त्वञ्च।

संस्कृतेर्मूलं संस्कृतम्। भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा। संस्कृतं भारतीयसंस्कृतेः आत्मा।

**सत्यम् अहिंसादिगुणैः श्रेष्ठा विश्वबन्धुत्वशिक्षिका।**
**विश्वशान्ति सुखाधात्री भारतीया हि संस्कृतिः।।**

संस्कृतभाषायाः माध्यमेन भारतीयसंस्कृतिः सुप्रतिष्ठिता। बालकस्य षोडशसंस्काराः अनया भाषया एव साफल्यं प्राप्नुवन्ति। पूजापाठ - यज्ञादयः अस्यां भाषायामेव भवन्ति। ऐतिहासिके व्यक्तित्वविकासाय एषा भाषा साहाय्यं करोति। प्राचीनतमा भाषा भवति संस्कृतम्। भारतीयानां विश्वासानुसारं सृष्टिकर्तुः ब्रह्मणः मुखात् वेदमयी संस्कृतवाणी समुत्पन्ना।

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वा प्रवृत्तयः।।**

आधुनिकभारते एषा भाषा दोषरहिता सरला वैज्ञानिकी च भाषा भवति। आधुनिकभारते संस्कृताध्ययनस्य महत्त्वं बहुविधम्। यथा वसुधैवकुटुम्बकम् इति भावना, भारतीयभाषायाः संरक्षणार्थम् इत्यादयः। महत्त्वं विना भाषाशिक्षायाः उद्देश्यं पूर्णं न जायते। इयं भाषा हिमाचलपर्वततः विन्ध्याचलपर्वतपर्यन्तं विचारविनिमयस्य भाषा आसीत्। संस्कृते वसुधैवकुटुम्बकमिति भावना अस्ति।

भाषाणां जननी संस्कृतभाषा। मातृभाषायाः राष्ट्रभाषायाः अन्ताराष्ट्रभाषायाश्च संरक्षणार्थं संस्कृतभाषा आवश्यकी। उत्तमचरित्रस्य निर्माणाय संस्कृतस्य महत्त्वपूर्णं स्थानं वर्तते। रसायनशास्त्रस्य वर्णनमपि संस्कृतसाहित्ये वर्तते। कौटिल्यस्यार्थशास्त्रं राजनीतेः प्रमुखः ग्रन्थो वर्तते। वैज्ञानिकाः नासा मध्ये घोषितवन्तः यत् संस्कृतं विश्वभाषासु वैज्ञानिकी भाषा अस्तीति।

**उपसंहारः** - संस्कृतभाषा वैज्ञानिकी भाषा वर्तते। संस्कृतव्याकरणं मनोवैज्ञानिकं विश्वप्रसिद्धं च वर्तते। संस्कृतपठनेन शुद्धोच्चारणेन च मस्तिष्कं क्रियाशीलं सक्रियं च भवति। अस्माकं जीवने जन्मतः मृत्युपर्यन्तं षोडशसंस्काराः संस्कृतभाषायामेव सम्पन्नाः भवन्ति। अतः आभारतं संस्कृतस्याध्यापनमावश्यकम्।

## पर्यावरणप्रदूषणनिवारणोपायाः

**मीनकेतन माझी**

शिक्षाशास्त्रिप्रथमवर्षम्

**पर्यावरणम्** – पर्यावरणं नाम किमित्युक्ते पर्यावृत्तिः पर्यावरणम् । अर्थात् यदस्मान् परितः आवृणोति आच्छादयति तत् पर्यावरणम् । ये मानवं परितः आच्छादयन्ति, जीवनं प्रभावयन्ति ते पर्यावरणशब्देन गृह्यन्ते । सर्वेऽपि प्राणिनः प्रकृत्याश्रिताः भवन्ति । प्रकृतिः मानवेभ्यः पूजनीया वन्दनीया चास्ति । एवं पर्यावरणं भौतिक - जैविक तत्त्वानां संकलनेन भवति । भौतिकतत्त्वेषु मृत्तिका, जलं, वायुः, प्रकाशश्च वर्तते । जैविकतत्त्वेषु समस्तं जीव-जगद्, वृक्ष-वनस्पतयश्च अन्तर्भवन्ति।

**पर्यावरणस्यार्थः** – पर्यावरणमिति शब्दः द्वयोः शब्दयोः संयोगेन निष्पद्यते । परि तथा आवरणमिति पदेन पर्यावरणमिति पदं निष्पद्यते । आंग्लभाषायां पर्यावरणाय Environment इति शब्दस्य प्रयोगः क्रियते । एतस्य शाब्दिकार्थः वर्तते यथा Environ इत्यस्य Encircle (आवरणम्), तथा ment इत्यस्य all around (सर्वतः) इति । संक्षेपेण पृथिवीं परितः आवरणमेव पर्यावरणम्।

**पर्यावरणप्रदूषणम्** – किं नाम प्रदूषणमित्युक्ते मानवः स्व क्रियाकलापेन अवशिष्टपदार्थानां विमोचनेन यत् प्राकृतिकं सन्तुलनं दूषयति तत् प्रदूषणम् । प्रदूषणमिति शब्दः आंग्लभाषायां

Pollution इत्युच्यते। मानवस्य सर्वाः क्रियाः याभिः प्राणिनां जीवने प्रतिकूलप्रभावं जनयति तदेव प्रदूषणनाम्ना अभिज्ञायते।

**प्रदूषणशब्दस्योत्पत्तिः** – प्रदूषणशब्दस्योत्पत्तिः लैटिन् भाषायाः पुल्युर इति शब्दात् जायते। यस्यार्थः भवति श्रेणीबद्धप्रदूषणमिति।

**प्रदूषणस्य प्रकाराः (Types of Pollution)** – यद्यपि पश्यामश्चेत् बहूनि प्रदूषणानि सन्ति। तेषु मुख्यप्रदूषणानि यथा -

१. जलप्रदूषणम् (Water pollution)।
२. भूमिप्रदूषणम् (Soil pollution)।
३. वायुप्रदूषणम् (Air pollution)।
४. ध्वनिप्रदूषणम् (Noise pollution)।

**१.जलप्रदूषणस्य कारणानि** –

- मानवानां दैनिकव्यवहारेण।
- कीटनाशकरसायनानां प्रयोगेण।
- औद्योगिकतापप्रदूषणेन।
- मृज्जीवानां जले क्षेपणेन।
- तैलीयपदार्थानां माध्यमेन।
- शवप्रवाहेन।

**जलप्रदूषणस्य निवारणोपायाः** –

- गृहे उपयोगानन्तरं तज्जलं शुद्धीकरणात्परमेव नलिकासु प्रवाहयितव्यम्।
- औद्योगिकसंयन्त्रेभ्यः निस्सरितानाम् अवकरपदार्थानां दूषितजलस्य च जलस्रोतस्सु प्रक्षेपणे प्रतिबन्धः स्यात्।
- नागरिकेभ्यः जलप्रदूषणस्य कारणानितेषां दुष्प्रभावानां , च विषये ज्ञानप्रदानम्।
- नदीनां जलाशयानाञ्च नियमितरूपेण परिष्कारः।
- नदीमुभयतः वृक्षारोपणं करणीयम्।

**२.भूप्रदूषणस्य कारणानि** – गृहापशिष्टेन, नगरपालिकाऽपशिष्टेन, औद्योगिकापशिष्टेन, कृष्यपशिष्टेन, वनानां विनाशेन, भूक्षरणेन, मरुस्थलस्य विस्तारेण च भूप्रदूषणं भवति।

**भूप्रदूषणस्य निवारणोपायाः** –

- सम्पूर्णे राष्ट्रे नागरिकैः वृक्षारोपणं करणीयम्।
- कृषिकर्मसु कीटनाशकानामुपयोगः न्यूनतया करणीयः।
- कृषिकार्येषु रासायनिकोर्वरकाणां स्थाने जैविकतत्त्वानां प्रयोगः अधिकतया कर्तव्यः।
- जलवायोः प्रवाहस्थले रक्षपट्टिकायाः निर्माणं कर्तव्यम्।
- भूक्षरणात् संरक्षणार्थं वृक्षारोपणं करणीयम्।
- पर्वतीयक्षेत्रेषु सोपानपद्धत्या कृषिः करणीयः।

**३. वायुप्रदूषणस्य कारणानि :–**

- आम्लवृष्टेः प्रमुखं कारणं भवति।
- वायुप्रदूषणेन पृथिव्याः रक्षाकवचरूपेण स्थितस्य ओजोनावरणस्य क्षयं भवति।
- वायुप्रदूषणेन रक्तविकारः ,श्वासः ,त्वग्रोगश्चोत्पद्यन्ते।
- इन्धनस्य अपूर्णदहनक्रियया रासायनिकधूमः उत्पद्यते।

**वायुप्रदूषणस्य निवारणोपायाः** –

- वनानां विनाशः सर्वथा प्रतिबन्धितः भवेत्।
- यन्त्रागाराणां स्थापनं नगराद् बहिरेव करणीयम्।
- भोजनं निर्मातुं काष्ठस्य-अङ्गारकस्यइन्धनस्य च न्यून-तमः उपयोगः करणीयः।
- यातायतकर्मणि सीजी वाहनानां प्रयोगे बलं प्रदातव्यम्।.एन्.
- अत्यधिकधूमोत्सर्जितवाहनानामुपरि प्रतिबन्धः करणीयः।

५. **ध्वनिप्रदूषणस्य कारणानि** – सामान्यतः ध्वनिप्रदूषणं द्विप्रकारकं भवति। **मानवकृतं प्राकृतिकं चेति।**

**१. मानवकृतम् -** परिवहनम्, औद्योगिकप्रतिष्ठापनम्, मनोरञ्जनसाधनानि, गृहोपकरणानि च ।

**२. प्राकृतिकम् -** वायुप्रकोपेण,भूकम्पेन,वर्षामाध्यमेन,मेघगर्जनेन,चक्रवातेन च ।

**ध्वनिप्रदूषणस्य निवारणोपायाः –**

- वार्तालापे स्वरः सामान्यः भवेत् ।
- वाहनयन्त्राणां यथाकालं परीक्षणं कर्तव्यम् ।
- ध्वनिरहितसंयन्त्राणां निर्माणं भवेत् ।
- सर्वेषु स्थलेषु ध्वन्यवशोषकप्रणाल्यै अवसराः प्रकल्पनीयाः ।

**सन्दर्भग्रन्थसूची :–**

१.पर्यावरणशिक्षा - डा. कौशलेश शर्मा ।

२. पर्यावरणशिक्षा – प्रो. मदनमोहन झा ।

## संस्कृतशिक्षणे श्रवणकौशलम्

**राजेन्द्र कुमार साहु**

शिक्षाशास्त्रिप्रथमवर्षम्

**उपोद्घातः - संस्कतं नाम किम्** ? **'सम्'** इति उपसर्गपूर्वकात् **'कृ'** धातोः सुडागमे **'क्त'** प्रत्यये संस्कृतमिति शब्दः निष्पद्यते। संस्कृतभाषा परिशुद्धा व्याकरणादिदोषरहिता असाधुशब्दव्यवर्जिता च भवति । अमरभारती – सुरभारती - दैविवागित्यादिनामभिः अपि ज्ञायते। रामायणे वाल्मीकिः संस्कृतभाषाविषयकमहत्त्वम् इत्थं प्रकटयति -

**'यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृतम्**[1]।
**रावणं मन्यमाना मां सीता भीता भविष्यति'**॥

काव्यादर्शे दण्डिनापि स्वाभिमतं प्रकटितं यत्-

'**संस्कृतं नाम दैवीवागन्वख्याता महर्षिभिः**[2]।
**तद्भवस्तत्समो देशीत्यनेकः प्राकृतक्रमः**'॥

**किं नाम शिक्षणम्** ? इत्युक्ते सामान्यरूपेण वदामश्चेत् छात्राध्यापकयोर्मध्ये प्रचाल्यमाना काचित् अन्तःक्रिया भवति शिक्षणमिति।

**वी ओडोविल स्मिथ** - 'शिक्षणं क्रियाणाम् एकः विधिरस्ति यः अधिगमस्य औत्सुक्यस्य च जागरणं करोति'[3]। **इंग्लिश एण्ड इंग्लिश** - 'शिक्षणं हि अन्येभ्यः जनेभ्यः अधिगमस्य कार्ये सहयोग्यकला अस्ति'[4]।

**श्रवणकौशलम् -**

केचन संस्कृतभाषां क्लिष्टा, प्रौढा, व्याकरणाधीना इत्येव चिन्तयन्तः सन्ति। एतद् मनसि निधाय विद्वद्भिः संस्कृतभाषाध्येतॄणां कष्टनिवारणाय कानिचित् कौशलानि प्रकल्पितानि। तानि यथा - श्रवणं, भाषणं, पठनं, लेखनमिति। आंग्लभाषायां संक्षिप्ततया **L, S, R, W** इत्युच्यते। श्रवणेन भाषायाः ग्रहणं झटित्येव भवतीति एषैव अस्माकमनुभवः। यथा - शिशोः मातृभाषाध्ययनमिति। श्रवणे श्रोत्रेन्दियस्य प्राधान्यं भवति। अतः जन्मतः यः कोऽपि श्रोतुमशक्तः सः आजीवनं भाषितुं न शक्नोति। प्रतिदिनमस्माभिः बहवः शब्दाः श्रूयन्ते। परन्तु ते सर्वे शब्दाः अस्माकं स्मरणे न भवन्ति। कारणम् इच्छापूर्वकश्रवणं विषयग्रहणे प्रमुखस्थानमावहति।

**संस्कृतवाङ्मये श्रवणम् -** यदा अस्मिन् संसारे देवनागर्याः ब्राह्म्याः अन्यकस्याश्चिदपि लिपेः आविष्करणं नासीत् तदानीं ज्ञानस्य आदानप्रदानं श्रवणेनैव भवति स्म। यथा वेदानामध्ययनम्। श्रवणेन पठनपाठनहेतोः अस्य नाम श्रुतीत्युच्यते।

**आत्मावारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यसितव्यश्च** इति[5]।

**श्रोतव्यः श्रृतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः**[6]।

**शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा** ॥

महाभारते अभिमन्युः स्वमातृगर्भतः चक्रव्यूहविषयकशिक्षाग्रहणम्[7]।

**श्रवणे प्रतिबन्धकाः** - श्रवणकौशलमधिकृत्य बह्व्यः समस्याः वा प्रतिबन्धकाश्च सन्ति। तेषु प्रमुखप्रतिबन्धकानां विषये किञ्चित् चर्चा क्रियते। श्रवणे प्रतिबन्धकाः त्रिविधाः यथा - वक्तुदृष्ट्या, श्रोतृदृष्ट्या, सामाजिकदृष्ट्या चेति।

**वक्तृदृष्ट्या -** यः वक्ता सुस्पष्टतया भावाभिव्यक्तीकरणे अशक्तः। कक्षायाम् अत्युच्चैः उत शनैः कथनम्। स्वरलयपूर्वकोच्चारणं तथा स्थानप्रयत्नज्ञानस्याभावः। शारीरिकाशिथिलता उत मुखयन्त्रसम्बन्धिसमस्याः। कथनसन्दर्भे धाराप्रवाहस्याभावः। विषयसम्बन्धितज्ञानम् एवम् अपेक्षितधैर्यस्याभावः इत्यादीनि प्रमुखकारणानि भवन्ति।

**श्रोतृदृष्ट्या -** यः वक्तुः मुखात् मौखिकरुपेण श्रवणेन्द्रियाभ्यां विषयान् संगृह्णाति सः भवति श्रोता। परन्तु श्रोता यत् किमपि शृणोति तत्सर्वं तस्य स्मरणे न भवति। यदि श्रोता वक्त्रा उक्तस्य विषयस्य

इच्छापूर्वकश्रवणं न करोति चेद् श्रोतुं न शक्नोति। श्रोतरि यदि अस्वास्थ्यम् अथवा श्रवणेन्द्रियगतसमस्या भवति चेदपि श्रवणे बाधां प्राप्नोति।

**सामाजिकदृष्ट्या -** श्रवणक्षेत्रे जायमानासु समस्यासु इयमप्येका प्रमुखसमस्या वर्तते। यन्त्रागारेभ्यः निर्गताः शब्दाः, विवाहोत्सवादिषु अत्याधुनिकानां ध्वनियन्त्राणां प्रयोगेण निर्गताः शब्दाः, यानेभ्यः निर्गताः शब्दाः वक्तृभ्यः एवं श्रोतृभ्यश्च बाधां जनयन्ति। अतः श्रवणे केवलं वक्ता, श्रोता प्रधानं न भवतः अपि च वक्तृभिः श्रोतृभिः सह उपयुक्तवातावरणस्यापि आवश्यकता वर्तते।

**श्रवणकौशलविकासोपायाः** - संस्कृतभाषाशिक्षणे प्रमुखकौशलं श्रवणकौशलमिति भाषाशास्त्रिभिः मन्यते। अतः श्रोतृभिः संस्कृतभाषाध्ययनाय केचन प्रमुखोपायाः अनुसरणीयाः। ते यथा - संस्कृतभाषायां वार्तायाः श्रवणम्, संस्कृतगीतानां श्रवणम्, संस्कृतभाषया कथानां श्रवणम्, संस्कृतसम्भाषणानां श्रवणम् । ध्वनिमुद्रिकायन्त्रेण श्लोकानां पद्यानाञ्च मुद्रणं कृत्वा श्रवणम् इत्यादयः।

**उपसंहारः** - वयं यत् किमपि कार्यं कुर्मः तद्कार्यसम्पादनाय कौशलानां नितरामावश्यकता भवत्येव । कौशलानि विना कार्यसम्पादने अस्माभिः महान् क्लेशोऽनुभूयते । तद्वत् संस्कृतभाषाशिक्षणेऽपि श्रवणं, भाषणं, पठनं, लेखनञ्चेति चत्वारि कौशलानि सन्ति। परन्तु तेषु चतुर्षु कौशलेषु संस्कृतभाषाशिक्षणे श्रवणस्य महत्त्वपूर्णभूमिका वर्तते । अतः भाषाकौशलेष्विदं श्रवणकौशलं प्रथमस्थानम् आवहति।

**टिप्पणी -**

1. रामायणम्-५३०१८।
2. काव्यादर्शः, का.सं. - ३३।
3. शैक्षिकप्रविधिः,पृ.सं. - २०।
4. शैक्षिकप्रविधिः-पृ.सं. - २०।
5. उपनिषद्।
6. मनुस्मृतिः।
7. महाभारतम्।

**सहायकग्रन्थसूची –**

1. संस्कृतशिक्षणम्-नवीनप्रविधिश्च - डा.च.ल.ना.शर्मा, डा.फतेहसिंहौ - आदित्यप्रकाशनम्, जयपुरम्।
2. कौशलबोधिनी - डा. विश्वासः - संस्कृतभारती, नवदेहली।
3. शैक्षिकप्रविधिः - डा. माताप्रसाद शर्मा - जगदीश संस्कृत पुस्तकालय, जयपुरम्।

## संस्कृतशिक्षणे यन्त्रांशोपागमः

**मनोरमा अगस्ति**

शिक्षाशास्त्रिप्रथमवर्षम्

प्राचीनगुरुकुलशिक्षां पश्यामश्चेत् तदानीन्तनशिक्षा शिक्षककेन्द्रिता, तत्र गुरुः यद्वदति तदेव छात्राः शृण्वन्तः अवगच्छन्ति स्म। परन्तु आधुनिकसमाजे तथा न भवति। इदानीन्तनसमाजे या शिक्षा वर्तते एवं प्राचीनकाले या शिक्षा आसीत् अनयोर्मध्ये महान् भेदः दृश्यते। साम्प्रतिकसमाजं पश्यामश्चेत् शिक्षाक्षेत्रे सर्वत्र अत्याधुनिकप्रणाल्या पठनपाठनं प्रचलति। शिक्षा बालकेन्द्रितं कर्तुं छात्राणाम् अभिरुचिवर्धनाय च सर्वेऽपि शिक्षाशास्त्रिणः प्रयत्नरताः सन्ति। तद्वत् संस्कृतशिक्षाक्षेत्रे विषयान् सरलीकर्तुं, बोधयितुं, छात्राणां रुचिं वर्धयितुं शिक्षाविद्भिः केचन महान्तः प्रयासाः विहिताः वर्तन्ते ते भवन्ति उपागमाः इति।

**उपागमाः -** उपागमः इति कथनेन उपकरणैः सह विधीनां सिद्धान्तानाञ्च बोधः जायते। लुम्सडेन महोदयानुसारम् उपागमाः त्रिधा विभक्तुं शक्यन्ते। यथा - यन्त्रांशोपागमः, तन्त्रांशोपागमः, प्रणालीविश्लेषणमिति।

**यन्त्रांशोपागमः** :- यस्मिन् उपागमे दृश्यश्रव्योपकरणानां प्रयोगः भवति सः यन्त्रांशोपागमः इति उच्यते। अस्य अपरं नाम कठोरवस्तूपागमः एवं शैक्षिकप्रविधिः प्रथमः इति उच्यते।

**संस्कृतशिक्षणे यन्त्रांशोपागमः** :- संस्कृतभाषायाः पठनपाठने अध्यापकानां कृते प्रविधेः प्रयोगः नितरामपेक्षते तत्रापि संस्कृतशिक्षणे यन्त्रांशोपागमस्य आवश्यकता महती वर्तते। यन्त्रांशोपागमः पुनः त्रिधा विभक्तुं शक्यते। यथा - दृश्योपकरणम्, श्रव्योपकरणम्, दृश्यश्रव्योपकरणम् इत्येतेषां प्रयोगेण विना संस्कृतपठनपाठनम् अमनोवैज्ञानिकम्, अरुचिपूर्वकमिति सुस्पष्टञ्च भवति।

**दृश्योपकरणम्**:- येन उपकरणेन केवलं वयं द्रष्टुं शक्नुमः तत् दृश्योपकरणं भवति। यथा- स्फोरकपत्रम्, प्रतिकृतिः, कृष्णफलकम्, प्रक्षेपकयन्त्रम् इत्यादयः।

**श्रव्योपकरणम्** :- येन उपकरणेन श्रोतुं शक्यते तद्भवति श्रव्योपकरणम्। यथा- सान्द्रमुद्रिका, ध्वनिमुद्रिका, ध्वनिवर्धकयन्त्रम् इत्यादयः ।

**दृश्यश्रव्योपकरणम्** :- येन उपकरणेन वयं श्रवणेन सह द्रष्टुमपि शक्नुमः तत् दृश्यश्रव्योपकरणं भवति। यथा - चलदूरवाणी, दूरदर्शनम्, सङ्गणकम् इत्यादयः।

**उपसंहार: :-** आधुनिकसमाजानुगुणम् इदानीन्तनी शिक्षापि आधुनिकी सञ्जाता, अत: सर्वत्र विद्यालयेषु प्रभावपूर्णरूपेण शिक्षाप्रदानाय अध्यापकानां कृते विषयज्ञानं भवेत्। येन छात्राणां सुष्ठुतया विषयाधिगम: भविष्यति तेन संस्कृतभाषाया: समाजस्य संस्कृतेश्च विकास: भवितुम् अर्हति इत्यत्र नास्ति संशय:।

**सहायकग्रन्था: -** शैक्षिकप्रविधि: - डा. रमाकान्तमिश्र:।
शैक्षिकप्रविधि: - डा. माताप्रसादशर्मा।

## संस्कृतशिक्षणस्य सामान्यसिद्धान्ता:

**श्रद्धाञ्जली सेनापति:**
शिक्षाशास्त्रिप्रथमवर्षम्

शिक्षक: प्रत्येकं पाठ्यविषयं प्रकरणं वा पाठयितुमवगमयितुं च शिक्षणं रुचिपूर्णं सरसञ्च कर्तुं काश्चन शिक्षणसम्बन्धिसिद्धान्तानधिगच्छेत् परिपालयेच्च। ते च केचन महत्त्वपूर्णसिद्धान्ता: समुपस्थाप्यन्ते। यथा -

**१. स्वाभाविकताया: सिद्धान्त:** - मानवस्य भाषामधिगन्तुं स्वाभाविकी प्रवृत्तिरालक्ष्यते। शिशु: बाल्यादेव मातु: सकाशाद् अनुकरणेन भाषां शिक्षितुमुत्सुको भवति भाषाञ्चाधिगच्छति। एषा भाषाध्ययनस्य मनुजस्य स्वाभाविकी प्रवृत्ति: संस्कृतभाषाशिक्षणेऽपि उपयुक्ता भवेत्। अध्यापका: छात्रान् भाषां शिक्षयितुं तेषां स्वाभाविकीं प्रवृत्तिमुपयुज्य संस्कृतशिक्षणे व्याकरणशिक्षणे च अभिप्रेरयेयु:। अयमेव स्वाभाविकताया: सिद्धान्त: उच्यते।

**२. अभ्यासस्य सिद्धान्त:** - भाषा अर्जितसम्पद् भवति। तथा च एषा कलापि विद्यते। कलासम्पादनाय अभ्यास: अपेक्षितो भवति। लोके संस्कृतं मातृभाषा नास्ति। अत: इमां भाषामधिगन्तुमभ्यासस्य महती आवश्यकता भवति। असकृदभ्यासेन भाषायां प्रावीण्यं प्राप्यते। व्याकरणाधिगमेऽपि अभ्यासस्यावश्यकता वर्तते। अयमेव अभ्यासस्य सिद्धान्त: उच्यते।

**३. रुचे: सिद्धान्त:** - यावत् पाठ्यमानविषये छात्राणां प्रीति: अनुरागो नोत्पद्यते तावत्पर्यन्तं शिक्षणं प्रभावयुक्तं न भवति। अत: शिक्षणप्रसङ्गे छात्रेषु विषयं प्रति रुचिं सम्पाद्य औत्सुक्यं जनयेत् तेन छात्रा: उत्साहेन विषयं पठन्ति शिक्षणे सक्रियाश्च भवन्ति, ततोऽधिगमो जायते। अयमेव रुचिसिद्धान्त: उच्यते।

**४. सक्रियतायाः सिद्धान्तः** - शिक्षणं द्विमुखी प्रक्रिया विद्यते। अतः उभयतः सक्रियता अपक्ष्यते। शिक्षणे केवलमध्यापकः सक्रियो भवति छात्राः निष्क्रियाः भवन्ति, तर्हि शिक्षणात् छात्राः विमुखाः भवन्ति। शिक्षणञ्च निष्फलं भवति। अतः संस्कृतभाषाशिक्षणे व्याकरणशिक्षणे च छात्राः यावत् सक्रियाः भवन्ति तावत् शिक्षणं सफलं भवति।

**५. वैयक्तिकविभिन्नतायाः सिद्धान्तः** - कक्षायामनेके छात्राः भवन्ति। समेषां रुचिः, प्रवृत्तिः, प्रकृतिः सामर्थ्यं, बुद्धिश्च समाना न भवति। अतः इमां वैयक्तिकभिन्नतां परिलक्ष्य अध्यापकः उन्मुक्तवातावरणे छात्रान् भाषणे वाचने च प्रेरयेत्। अनेन स्वस्वसामर्थ्यानुगुणं भाषणे प्रयतन्ते। भाषितुञ्चारभन्ते। अयमेव वैयक्तिकविभिन्नतायाः सिद्धान्तः।

**६. मौखिककार्यस्य सिद्धान्तः** - भाषाधिगमस्य प्रक्रिया कर्णाभ्यां जिह्वया च जायते। आदौ बालकः कर्णाभ्यां शृणोति तत्पश्चात् वक्तुः वचनम् अनुकरोति, अनुकरणं भाषणेन भवति। मुखस्य कार्यमेतत् भवत्यनेन मुखेन भाषाधिगमो जायते। अतः एष मौखिककार्यस्य सिद्धान्त उच्यते। व्याकरणसूत्राणां कण्ठस्थीकरणं, श्लोकवाचनं मौखिककार्यस्य सिद्धान्तेन जायन्ते।

**७. समवायसिद्धान्तः** - शिक्षणं प्रभावीकर्तुं सर्वविधोपायानां साधनानां समुचितविनियोगः अथवा सुव्यवस्थितसमवायः कर्तव्यः येन अभीष्टं प्राप्यते। अयमेव समवायसिद्धान्तः कथ्यते।

**८. अनुपातक्रमस्य सिद्धान्तः** - शिक्षणोद्देश्येषु शिक्षणकार्येषु च गौणमुख्यानि समीक्ष्य तत्र प्राधान्यानुगुणं लक्ष्यसाधनानुरूपं कश्चन क्रमोऽनुसर्तव्यः। एष एवानुपातक्रमस्य सिद्धान्तो भवति।

**९. अनुकरणसिद्धान्तः** - बाला अनुकरणप्रियाः भवन्ति। भाषाऽपि अनुकरणेन शिक्ष्यते। अतः अध्यापकः आदर्शभूतमुच्चारणं पठनं भाषणं लेखनं च कुर्यात्। छात्राः अपि अध्यापकमादर्शं मत्वा अनुकुर्वन्ति। अनुकरणेन छात्राः शिक्ष्यन्ते। अयमेव अनुकरणसिद्धान्त उच्यते।

एते सिद्धान्ताः भाषाशिक्षणे सौकर्याय भवन्ति।

**उपसंहारः** - विश्वस्य प्राचीनातमा भाषा संस्कृतभाषा। अन्याः भाषाः विश्लेषणात्मकाः परन्तु संस्कृतभाषा संश्लेषणात्मकी भवति। संस्कृतभाषाशिक्षणवर्धनाय एते सिद्धान्ताः अत्यन्तम् आवश्यकाः।

**सान्दर्भिकग्रन्थसूची** :-

१. संस्कृतशिक्षणम् - नवीनप्रविधिः - डा. च. ल. ना. शर्मा।

२. संस्कृतशिक्षणम् - डा. कम्बम्पाटि साम्बशिवमूर्तिः ।

## मूल्यशिक्षा

**सुभद्रा दास**

शिक्षाशास्त्रिप्रथमवर्षम्

शिक्षायाः परमं लक्ष्यं वर्तते सर्वाङ्गीणविकासः। सर्वाङ्गीणविकासो नाम न केवलं शारीरिकविकासः किन्तु शारीरिक-मानसिक-आध्यात्मिक-सांस्कृतिक-नैतिकादिविषयेष्वपि विकास इत्यवगन्तव्यम्। ये आध्यात्मिक - सांस्कृतिक - नैतिकविकासाः परिलक्षिताः सन्ति ते मूल्यशिक्षया एव प्राप्यन्ते। आध्यात्मिकमूल्यानां शिक्षणेन नैतिकमूल्यानां शिक्षणेन च कश्चन पूर्णो भवति। सामाजिकविकासेन समाजे व्यवह्रियमाणाः सामान्यजनाः एतैः मूल्यैः विना सर्वदा अपूर्णाः एव भवन्ति। मानवजीवने नितरामपेक्षितानि सामाजिकमूल्यानि एव अत्र मूल्यशिक्षायां लक्षितानि मूल्यानि। मूल्यं नाम किमिति पश्यामश्चेत् –

१. मूल्यमिति कश्चन अमूर्तः सम्प्रत्ययो भवति।

२. मूल्यं कस्यापि समाजस्य विश्वासानां, सिद्धान्तानाम्, आदर्शानां, नैतिकनियमानां, सम्प्रदायानां, मानदण्डानां च सामाजिकैः कल्पितं महत्त्वं भवति।

३. कस्यापि समाजस्य आदर्शादयः, सामाजिकानां दीर्घानुभवस्य परिणामाः भवन्ति।

४. व्यक्तिषु मूल्यानां विकासः समाजस्य विभिन्नप्रक्रियासु भागस्वीकरणेन सम्भवति।

५. मूल्यं व्यक्तेः व्यवहारं निर्दिशति, नियन्त्रयति च।

६. मूल्यं धर्माधर्मयोः, गुणदोषयोः, सदसदयोश्च निर्णये व्यक्तेः साहाय्यमाचरति।

इयं च मूल्यशिक्षा –

१. पाठ्यविषयाणां द्वारा
२. इतिहासशिक्षणद्वारा
३. भूगोलशिक्षणद्वारा
४. सामाजिकसेवाकार्यक्रमैः
५. अर्थशास्त्रशिक्षणद्वारा
६. विज्ञानशिक्षणद्वारा
७. पाठ्यसहगामिक्रियाद्वारा
८. प्रार्थनादि आध्यात्मिकशिक्षया
९. साहित्यसांस्कृतिकशिक्षया
१०. क्रीडाद्वारा
११. उत्सवानां परिपालनेन

च सम्भवति। पुनश्च मूल्यशिक्षणे सदाचारपालनम्, अहिंसापालनम्, सत्यपालनम्, मातृपितृगुरुभक्तिः, धर्माचरणम्, परोपकारः, विश्वबन्धुत्वभावनायाः विकासः, समाजसेवा च इत्यादि मूल्यानां बोधनं विभिन्नपाठ्यक्रमसाहाय्येन करणीयाम्।

एतेन मूल्यशिक्षणेन विना न कदापि शिक्षायाः प्रधानभूतं लक्ष्यं प्राप्यते। अतः मूल्यशिक्षणस्य नितरामनिवार्यता शिक्षायां वर्तते इति अवधेयांशः।

**उपसंहारः** :- निष्कर्षरूपेण वक्तुं शक्यते यत् पाठ्यक्रमस्य निर्माणं एतादृशं भवेत् येन राष्ट्रस्य नागरिकेषु जीवनं मूल्ययुक्तं भवेत्। ते राष्ट्रविकासाय तत्पराः स्युः।

**सन्दर्भग्रन्थासूची** :- शर्मा . आर्. ए.- मानव मूल्य एवं शिक्षा, आर् लाल बुक् डिपो, मेरट्।

## भारतीयन्यायदर्शनम्

**देवश्री श्वाई**

शिक्षाशास्त्रिप्रथमवर्षम्

षडास्तिकदार्शनेषु भगवता महर्षिगौतमेन विरचितं न्यायशास्त्रं सुप्रसिद्धं भवति। अस्मिन् दर्शने भाष्यं वात्सायनेन, वार्त्तिकम् उद्योतकारेण च कृतम्। अष्टाविंशत्यधिकपञ्चशतसूत्रेषु पञ्चाध्यायेषु दशाह्निकेषु चतुरशीतिप्रकेणेषु इदं दर्शनं प्रोक्तम्। अस्य दर्शनस्य नामान्तरं भवति न्यायशास्त्रं, प्रमाणशास्त्रं, पदार्थशास्त्रम्, हेतुशास्त्रं, तर्कशास्त्रं, योगः, वाकोवाक्यम्, आन्वीक्षिकी चेति। न्यायभाष्यानुसारं प्रमाणैरर्थपरीक्षणं न्यायः इति।

अतः इदं शास्त्रं प्रमाणशास्त्रं भवति। न्यायशास्त्रे प्रत्यक्षानुमानोपमानशब्दभेदेन प्रमाणचतुष्टयं स्वीकुर्वन्ति। अस्मिन् दर्शने पदपदार्थयोः विचारः क्रियते, तत्र प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्ड-हेत्वाभास-छल-जाति -निग्रहस्थानानां षोडशपदार्थानां सम्यक् ज्ञानेन अपवर्गप्राप्तिः इति महर्षिः गौतमः कथयति। अतः इदं शास्त्रं पदार्थशास्त्रं भवति।

"योऽवमन्येत ते मूल्ये हेतुशास्त्राश्रयाद्विजः" इति मनुस्मृतिः अकथयत्। अत्र हेतुशब्दस्यानुमानमर्थः भवति। तथाचानुमानप्रधानमिदं शास्त्रं हेतुशास्त्रमिति व्यपदिष्टम्। तर्कस्तु युक्तायुक्तविचारः प्रमाणानाम् उपकारकः। मीमांसाशब्देनापि तर्कः व्यपदिश्यते। तर्कव्युत्पादकत्वादिदं शास्त्रं भवति। पुरुषकर्मादिनिमित्तो भूतसर्गः इति योगानाम् इति

न्यायभाष्यवचनात् न्यायनामान्तरं योगः इति समुपपन्नम्। वाकोवाक्यमिति न्यायदर्शनस्य नामान्तरं छान्दोग्यपनिषदि स्पष्टम्।

प्रत्यक्षागमाश्रितमनुमानं सान्विक्षा। तया प्रवर्तत इति आन्विक्षिकी न्यायविद्या न्यायशास्त्रमिति भाष्यकारवचनात् न्यायशास्त्रपर्यायवाचकशब्दत्वेन आन्विक्षिकी सिद्धा वर्तते।

प्राचीनपरिभाषानुसारेण समस्तरूपोपपन्नलिङ्गप्रातिपदिकं वाक्यं न्यायः इति तथा च पक्षसत्त्वं, सपक्षसत्त्वं, विपक्षासत्त्वम्, अबाधितत्त्वम्, असत्प्रतिपक्षत्वञ्चेति पञ्चधर्मविशिष्टलिङ्ग-प्रतिपादकं वाक्यं न्यायरीतिं पुनः नीयते विवक्षितार्थे सिद्धिः अनेन इति न्यायः। इदं दर्शनं वेदः अङ्गीकरोति। तर्कप्रमाणमाध्यमेन वेदस्य रक्षाम् अपि करोति। अतः वेदरक्षः इति नाम अपि धारयति। नैयायिकाः वेदस्य पौरुषेयत्वं मन्यन्ते। अतः धर्मार्थकाममोक्षभेदेन पुरुषार्थचतुष्टयं स्वीकरोति।

अस्य शास्त्रस्य अद्भुतमेव वैलक्षण्यम् उपादेयत्वञ्च वीक्ष्यैकस्वरेण, विपश्चितां जगतीदमेवम् अभिनन्दति - **प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रमः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता।।** इति।

गौतमस्य न्यायसूत्रं, वात्सायनादीनां भाष्यग्रन्थाश्च प्राचीनन्याये गण्यन्ते। अयं प्राचीनन्यायः प्रमाणप्रधानः भवति। पुनः नव्यन्यायस्य प्रारम्भः गङ्गेशोपाध्यायात् आरम्भः भवति। तत्त्वचिन्तामणिकारेण गङ्गेशोपाध्यायेन कृतम् अयं न्यायः प्रमेयप्रधानः भवति। नव्यन्याये हि न्यायदर्शनस्य तर्कविज्ञानविषयकाः विचाराः एव सुविशदं गृहीताः सन्ति। नव्यन्यायानुसारं द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः इति सप्तपदार्थाः ग्राह्याः भवन्ति।

ज्ञानं बहुविधं भवति। प्रमाऽप्रमाभेदेन तद् द्विविधं भवति। यथार्थज्ञानं प्रमा इत्युच्यते। अयथार्थज्ञानं तु अप्रमा इत्युच्यते। पुनः अवयवसमुदायात्मकन्याये प्रत्यक्षानुमानोपमान-शब्दप्रमाणानां प्रवृत्तिर्भवति। तथा च प्रतिज्ञा, आगमः, हेतुः, अनुमानम् , उदाहरणं तु प्रत्यक्षम्, उपनयनम्, उपमानमिति, निगमञ्च सर्वेषामेकार्थे समवाये सामर्थ्यप्रदर्शनम् इति। एतानि सर्वाणि न्यायदर्शनस्य सारभूततत्त्वानि भवन्ति।

**सन्दर्भग्रन्थसूची -**

१. तर्कसंग्रहः - अन्नम्भट्टः ।
२. न्यायायनम् - प्रो.कमलेशमिश्रः ।
३. न्यायभाष्यम् - वात्सायनः ।
४. न्यायवार्तिकम् - उद्योतकरः ।

## गणतन्त्रशिक्षाया: महत्त्वम्

**मामा जेना**
शिक्षाशास्त्रिप्रथमवर्षम्

सर्वेषु देशेषु प्रजातान्त्रिक: देश: भारत: श्रेष्ठ: भवति। मानवजीवनस्य प्रजातन्त्रं भवति मार्गविशेष:। प्रजातन्त्रं नाम किमित्युक्ते गणतन्त्रम्, लोकतन्त्रमिति द्विविधं भवति। आङ्ग्लभाषायाम् Democracy इत्युच्यते। Demo नाम गण:, Cracy नाम तन्त्रम् इति।

**गणतन्त्रस्य परिभाषा** :- १. अब्रहंलिङ्कन् - प्रजातन्त्रव्यवस्था एतादृशी प्रशासनिकव्यवस्था भवति या प्रजाभि: निर्मिता प्रजानां कृते प्रजानाञ्च भवति इति प्रजातन्त्रम्।

**जान् डीवि** :- प्रजातन्त्रं जनानामुपरि जनानां शासनं भवति।

**प्रजातन्त्रीयशिक्षाया: अनिवार्याणि उद्देश्यानि** :-

१. जनानां समानतया व्यक्तित्वविकास:।

२. प्रजातन्त्रस्य प्राथमिकावधारणा।

३. सर्वेषां कृते समानावकाशकल्पनम्।

४. उत्तमनागरिकत्वम्।

५. सहनशीलता।

६. परिवर्तनविषये विश्वासप्रदानम्।

७. समस्यानां परिहारविषये शासन्तमयभागग्रहणम्। अहिंसात्मकमार्गाणाम् अवलम्बनम्।

**प्रजातान्त्रिकी शिक्षा**:- वस्तुत: शिक्षां विना प्रजातन्त्रम् ऊहितुमपि न शक्यते। शिक्षाया: फलस्वरूपं भवति प्रजातन्त्रम् । अनयो: मध्ये सम्बन्धम् अधिकृत्य शिक्षाऽयोगेन एवम् उक्तम्। शिक्षा सामाजिकविमोचनस्य एकम् उत्तमं साधनं भवति। येन प्रजातन्त्रं सुस्थिरं भवति। सर्वेषां जनानां समागता परिलक्षिता भवति इति।

**प्रजातन्त्रस्य सिद्धान्ता**: - प्रजातन्त्रस्य मूलभूतसिद्धान्ता: -

१. स्वतन्त्रतासिद्धान्त:। २. समानतासिद्धान्त:। ३. बन्धुतासिद्धान्त:। ४. न्यायसिद्धान्त:।

**न्यायसिद्धान्त**: - प्रजातन्त्रीयशासने सर्वेऽपि समाना:। सर्वेषां कृते न्यायव्यवस्था समाना भवेत्। उत्तमन्यायप्राप्ति: सर्वेषाम् अपि समानाधिकार: भवति। विशिष्टप्रजातन्त्रे जाति-धर्म-वर्ण-लिङ्गादिविहीनस्य अपात्रता न भवेत् न वा ते प्राप्तिविभेद: करणीय: भवेत्।

**प्रजातन्त्रशिक्षायाः गुणाः -**

१. सर्वेषां कृते समानशैक्षिकावकाशकल्पनम्।

२. नागरिकाणां स्वेच्छायाः कृते आदरप्रदानम्।

३. आर्थिकसर्वकारीयसामाजिकपरिस्थितिनाम् च अभिवर्धनम्।

४. सर्वत्र प्रजातन्त्रात्मकपद्धतेः प्रकल्पनम्।

५. नानाविधकर्मचारिणाम् उपयोगः।

६. प्रजातन्त्रे श्रद्धायाः प्रदर्शनम्।

**उपसंहारः** - भारतस्य वैशिष्ट्यं भवति। प्रजातन्त्रं, गणतन्त्रं, प्रजातन्त्रमिति, अत्र प्रजातन्त्रात्मकभारतस्य निर्माणार्थं शिक्षा अनिवार्या भवति। अतः सर्वत्र, सर्वदा, सर्वसन्दर्भेषु च शिक्षा प्रदेया भवति। तेन गणतन्त्रस्य भारतस्य निर्माणं सुसाध्यं भवति।

**सहायकग्रन्थाः :-**

**१.** शिक्षायाः दार्शनिकाधाराः - डा. माताप्रसादशर्मा, जयपुरम्।

**२.** शिक्षायाः दार्शनिक-सामाजिकाधाराः - डा. सोमनाथसाहु।

## संस्कृतभाषायाः भाषावैज्ञानिकमहत्त्वम्

**सुस्मिता पल्हार**

शिक्षाशास्त्रिप्रथमवर्षम्

संस्कृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः ।
वेदः तत्त्वार्थसंजुष्टं लोकालोककरं शिवम् ।।

"वर्णनात्मक - ऐतिहासिक - तुलनात्मकाध्ययनानां माध्यमेन भाषायाः प्रकृतेः विकासस्योत्पत्तेः संरचनायाश्चाध्ययनपूर्वकम् एतेषां समेषां विषयाणां सैद्धान्तिकं निर्धारणमेव भाषाविज्ञानम्" । अर्थात् "भाषाविज्ञाने भाषायाः उत्पत्तेः, तस्याः संरचनायाः, तस्याः विकासस्य, तस्याः ह्रासस्य च अध्ययनं क्रियते"। मानवः केन प्रकारेण वक्ति ? तस्योपभाषायाः विकासः केन प्रकारेण भवति ? भाषासु उपभाषासु च केन हेतुना कदा च परिवर्तनम् अथवा विकासः भवति? केन प्रकारेण काऽपि भाषा विकसिता सति कस्याश्चन स्वतन्त्रतायाः भाषास्वरूपं धत्ते?

एतेषां समेषां विषयाणां विधिवत् अध्ययनं क्रियते। भाषाविज्ञाननामके विषये शास्त्रेऽस्मिन् शब्दैः उत्पादितः रूपविकासः, वाक्यानां संरचना प्रभृतीनां विषयाणां विवेचनं क्रियते। अनेन प्रकारेण भाषाविज्ञानस्य माध्यमेन कस्याश्चन भाषायाः वैज्ञानिकमध्ययनं क्रियते इति निश्चीयते ।

संस्कृतवैदिकवाङ्मये बहूनि रूपाणि प्राप्यन्ते, येषां प्रयोगः सम्प्रति लौकिकसंस्कृते, भाषायां वा नैव दृश्यते। एतस्यामवस्थायां लौकिकालौकिकयोः संस्कृतयोः अध्ययनं करोति भाषाविज्ञानम्। भाषावैज्ञानिकानां प्रयोगेणैव सुनिश्चितं जातं यत् संस्कृत - पालि - प्राकृतानां भाषाणां मूलमेकमेव अस्ति। संस्कृतसाहित्यस्य वैज्ञानिकमध्ययनं करोति भाषाविज्ञानम्। भाषाविज्ञानस्य सम्बन्धः सर्वेषां मानवानां भाषाभिः सममस्ति। इत्थं भाषाविज्ञाने ध्वनेः, ध्वनि-उच्चारणोपयोगिनां स्वरयन्त्रमुखजिह्वाद्यङ्गानां, प्रकृति-प्रत्ययादीनां, संज्ञा - सर्वनाम - क्रिया - विशेषणादीनां, नामाख्यतोपसर्गनिपातानां, पदपदार्थविषयकानां विकारादीनां, विकारमूलक-कारकानाम् अन्येषां विविधविधविषयाणाञ्च अध्ययनं क्रियते ।

पाणिनीयशिक्षायाम् (श्लोकसंख्या षट्तः दशमपर्यन्तम्) वर्णानां विभागः पञ्चधा कृतः। यथा - १) स्वरतः २) कालतः ३) स्थानात् ४)आभ्यन्तरप्रयत्नात् ५) बाह्यप्रयत्नात् इति। संस्कृतभाषाविषयकस्य वर्णोत्पत्तिसिद्धान्तस्य अतीववैज्ञानिकं निरूपणं कृतम् ।

संस्कृतभाषायाः भाषावैज्ञानिकं वर्गीकरणं - संस्कृतभाषायाः वैज्ञानिकमध्ययनमेव भाषाविज्ञानमित्यभिधीयते। इदानीं भाषाविज्ञानस्य पञ्चैव प्रकारास्समुपलब्धाः सन्ति । ते प्रकाराः संक्षेपेण अत्र प्रस्तूयन्ते -

१) **ऐतिहासिकं भाषाविज्ञानम्** - अस्मिन् भाषाविज्ञाने भाषायाः विकासस्य अध्ययनं क्रियते। ऐतिहासिकाः भाषावैज्ञानिकाः इदमपि प्रतिपादयन्ति यत् संस्कृत - पालि - प्राकृतानां भाषाणाम् एकमेव मूलमस्ति।

२) **प्रायोगिकं भाषाविज्ञानम्** - अन्यस्याः भाषायाः शिक्षा केन प्रकारेण प्रदेया ? अनुवादः केन प्रकारेण करणीयः? उच्चारणस्य दोषाः केन प्रकारेण अपाकरणीयाः? इत्यादीनां विषयाणां विचारः अत्र क्रियते।

३) **संरचनात्मकं भाषाविज्ञानम्** - भाषायां प्रयुक्तानां सर्वेषां तत्त्वानां पारस्परिके विशिष्टे सन्दर्भे अध्ययनं क्रियते ।

४) **वर्णनात्मकं भाषाविज्ञानम्** - विश्लेषणात्मकमध्ययनं वर्णनात्मकं च करोति भाषाविज्ञानम्। एतादृशीनामपि भाषाणामध्ययनं वर्णनात्मकेन भाषाविज्ञानेन क्रियते । एतादृशी व्यवहारमात्राश्रिता

संस्कृतभाषा अतीतकालविशेषे कीदृश्यासीत् तस्यां कति ध्वनयः आसन्? पदानां रचना कीदृश्यासीत्? वाक्यानि कीदृशान्यासन्? इत्यादीनां विषयाणामध्ययनं वर्णनात्मकं भाषाविज्ञानं करोति ।

५) **तुलनात्मकं भाषाविज्ञानम्** - एकाधिकानां वा भाषाणां तुलनात्मकमध्ययनं विभिन्नान् कालानाश्रित्य क्रियते ।

**भाषाविज्ञानस्याङ्गानि** - अस्मिन् अध्याये ध्वनीनामुच्चारणस्य, अक्षराणां, शब्दानां, पदानां, वाक्यानाञ्च संरचनायाः विवेचनं क्रियते ।

१) **ध्वनिविज्ञानम्** – सम्पूर्णा भाषा ध्वन्याश्रिता भवति । यथा - क) स्वरयन्त्रं ख) मुखम् ग) जिह्वा घ) ताल्वादिकं च। तदनन्तरं ध्वनीनामुच्चारणस्थानस्य उच्चारणप्रयत्नस्य दृष्ट्यापि वर्गीकरणं क्रियते ।

२) **पदविज्ञानम्** - पदपदार्थनिरूपयता महर्षिणा पाणिनिना अभिहितं सुप्तिङन्तं पदम्। अस्मिन् पदविज्ञाने नानाविधानां पदानामध्ययनं क्रियते। यथा - संज्ञा, सर्वनाम, क्रिया, क्रियाविशेषणादीनां, धातुरूपाणां, शब्दरूपाणां च। पदानि एव भाषायाः मूलभूतानि सन्ति ।

३) **वाक्यविज्ञानम्** - अनेकेषां सार्थकानाम् अन्वितानाञ्च पदानां समूहो वाक्यमित्यभिधीयते। योग्यता, आकांक्षा, आसक्तिश्च अत्र निरूप्यते। अत्र वाक्यानाम् ऐतिहासिकं तुलनात्मकम् अध्ययनमपि प्रस्तूयते ।

४) **अर्थविज्ञानम्** - शब्दार्थयोः शब्दविदः अभेदसंबन्धं स्वीकुर्वन्ति। अर्थविज्ञानं भाषाविज्ञानस्यातीव महत्त्वपूर्णमङ्गं वर्तते। शब्दानामर्थपरिवर्तनानि तेषामर्थपरिवर्तनानां कारणानि प्रभृतयो विषयाः अर्थविज्ञानस्य विषयाः सन्ति।

**भाषायाः वर्गीकरणम्** - सम्प्रति अस्मिन् संसारे त्रिसहस्रभाषाः प्रचलन्ति। एतासां सर्वासां भाषाणां द्विधा वर्गीकरणं कृतमस्ति -

१) **आकृतिमूलकम्** - वाक्यानां पदानाञ्च अध्ययनं क्रियते ।

२) **पारिवारिकं वर्गीकरणम्** - भाषायाः पारिवारिकं वर्गीकरणमतीव वैज्ञानिकमस्ति। वर्गीकरणेऽस्मिन् रचनातत्त्वम् अर्थतत्त्वञ्च समानरूपेण आलोच्यते। ध्वनिः, पदरचना, वाक्यरचना, अर्थः, शब्दसम्पत्तिः, स्थानसान्निध्यं च एतेषु षट्सु विषयेषु साम्ये सति भाषायाः एकः परिवारः भवति ।

**सन्दर्भग्रन्थसूची : -**

१. संस्कृतशिक्षणम् - उदयशङ्कर झा

२. भाषाविज्ञानम् - कपिलदेव द्विवेदी

## स्वस्थपर्यावरणं समाजश्च

**गायत्री महन्ति**

शिक्षाशास्त्रिप्रथमवर्षम्

**पर्यावरणनाशेन नश्यन्ति सर्वजन्तवः।**
**पवनः दुष्टतां याति प्रकृतिर्विकृतायते।।**

पर्यावरणाशब्दोऽयं संस्कृतवाङ्मये महान्तं स्थानम् अलङ्करोति। व्याकरणदृष्ट्या अस्य शब्दस्य व्युत्पत्तिः भवति यत् परि + आ + वृ + ल्युट् = पर्यावरणम्। शाब्दिकदृष्ट्या मनुस्मृतौ मनुना उक्तं सर्वज्ञानमयो हि स परितः सम्यक् वृणोति आच्छादयति इति पर्यावरणम्। संस्कृतवाङ्मये वायुः, जलम्, वृक्षः, अग्निः, पर्वतः, शब्दशक्त्यादीनां महत्त्वं प्रतिपादितमस्ति।

मानवः प्रकृत्याश्रितः। यावत् पर्यन्तं प्रकृतिः सुरक्षिता, प्रदूषणमुक्ता च भवति तावत्पर्यन्तमेव मानवस्य अस्तित्वम् अवशिष्यते। यदि केनाऽपि कारणेन प्रकृतौ विकृतिः समायाति तर्हि तेन कारणेन मानवस्य मानवेतरप्राणिनां च सत्ता नश्यति। प्रकृतिः प्राणिभ्यः आवश्यकतापूर्तये पूर्णसौविध्यं यच्छति। प्रकृतिरेव समाजं प्रति नैकानि संसाधनानि प्रयच्छति। अतः स्वस्थपर्यावरणं स्वस्थसमाजः इति उच्यते।

**संरक्षेत् दूषितो न स्याल्लोकः मानवजीवनम्।**
**न कोऽपि कस्यचिद् नाशं कुर्यादर्थस्य सिद्धये।।**

**परिभाषा - ई.रोजर्** महोदयस्य मतानुसारं पर्यावरणमेका बाह्यशक्तिः भवति। या मानवं प्रभावयति। अर्थात् स्वस्थवातावरणस्योपरि स्वस्थसमाजः निर्भरशीलः भवति। **डगलस्**

महोदयस्य मतानुसारं समस्तजीवधारिणां व्यवहारम्, अभिवृद्धिं, परिपक्वताञ्च प्रति प्रभावोत्पादकानां बाह्यशक्तीनां प्रभावानां तत्त्वानाम् उद्दीपकानां च कृते विवरणप्रदानक्षमं पदं भवति पर्यावरणम्। स्वस्थपर्यावरणं प्राणिनां शारीरिकस्थितिं मानसिकस्थितिं सांवेगिकस्थितिं च प्रतिक्षणं प्रभावयति।

प्रदूषणं मुख्यतः द्विविधम् - प्राकृतिकप्रदूषणम्, मानवनिर्मितञ्चेति।

**प्रदूषणस्य कारणानि** - सम्प्रति जनसंख्यावृद्धेः कारणात् परिवेशः दूषितः भवति। निरक्षरता अविवेकता च परिवशप्रदूषणस्य मुख्यकारणद्वयम्। प्राचीनकाले जनाः वृक्षच्छेदनं पापम् इति अचिन्तयन्। जले वरुणदेवः निवसति इति ज्ञानेन जले आवर्जनादिकं न अक्षिपन्। सम्प्रति मानवाः धनोपार्जनाय बहुसंख्याकान् शिल्पकारान् स्थापयन्ति। फलतः तेभ्यः शिल्पकारेभ्यः निर्गतः धूमराशिः वायुमण्डलं दूषयति। यानम् अत्यधिकं प्रदूषणं जनयति। इन्धनस्य प्रयोगादयः प्रदूषणस्य मुख्यानि कारणानि।

**निवारणोपायाः** - प्रदूषणस्य निवारणेन एव स्वस्थवातावरणं समाजं च निर्मातुं शक्नुमः। तदर्थं जनसचेतनता अपेक्षते। अत एव उच्यते **- स्वस्थशरीरे स्वस्थं मनः** इति। आदौ स्वस्थपरिवेशः तदनु स्वस्थशरीरं तदनु समाजस्य समृद्धिः।

१. जनसंख्यानियन्त्रणं तत्सम्बद्धानि कार्याणि च।

२. प्लाष्टिक् तथा अजैविकपदार्थानां व्यवहारनिषेधः।

३. प्राकृतिकसम्पदः संरक्षणम्।

४. वृक्षारोपणं, पशुसम्पदः सुरक्षा।

**भुक्त्वा यान्ति च पञ्चत्वं दुष्प्लास्टिकमजैविकम्।**
**पशवोऽनुर्वरा भूमिर्जायते ज्वालिते विषम्।।**

**सन्दर्भग्रन्थसूची :-**

१. संस्कृतधारा - प्रो. हरेकृष्ण शतपती।

२. पर्यावरणशिक्षा - डा. कौशलेशशर्मा।

३. पर्यावरणशिक्षा - डा. मदनमोहन झा।

# स्वामिदयानन्दस्य शिक्षादर्शनम् एवम् उद्देश्यानि

**निधि आर्या**

शिक्षाशास्त्रिप्रथमवर्षम्

**गुणानामाधारो विदित श्रुतिशास्त्रार्थनिश्चय:**
**समुद्धर्ता भर्ता पतितजनचित्तार्तिहरण:।**
**नयन्नात्मत्सर्गं परिहितरत: स्वार्थविरतो**
**दयानन्दस्वामी जयतु भुवने भास्कररुचि:।।**

भारतस्य पश्चिमभागे गुर्जरप्रदेश: विराजते। गुर्जरभूमि: अनेकेषां विदुषां नेतॄणाञ्च प्रसवित्री वर्तते। ऊनविंशतिशताब्द्यां स्वामिदयानन्द:, महात्मागान्धि: इत्यनयो: प्रादुर्भावस्य गौरवमार्जितवती गुर्जरभूमि:। गुर्जरप्रान्तस्य काठियावाडक्षेत्रस्य मौरवीनामप्रदेशस्य टङ्करा इत्याख्ये क्षेत्रे एकस्मिन् सुशिक्षिते विप्रवंशे १८२४ तमे वर्षे सितम्बरमासस्य द्वादशे दिनाङ्के भाद्रपदमासे शुक्लपक्षे नवम्यां तिथौ बृहस्पतिवासरे स्वामिदयानन्दस्य जन्म अभवत्।

**जीवनदर्शनम्**:- १८७५ तमेऽब्दे मुम्बायीनगरे स: "आर्यसमाज:" इति संस्थाया: स्थापनां कृतवान्। स्वामिदयानन्द: यद्यपेक: महान् दार्शनिक: आसीत्, तथापि तस्य गणना भारतीयसमाजस्य परिष्कारेष्वेव भवति। एतस्य प्रमुखकारणमासीत् सामाजिक-धार्मिके च परिष्कारस्य परिक्षेत्रे तस्य योगदानम् एतावदधिकं महत्त्वपूर्णञ्च असीत् तस्य दार्शनिकस्य स्वरूपस्य तुलनार्थं परिष्कारस्वरूपं प्रमूखं प्रतीयते। आदिशङ्कराचार्य: इव स्वामिदयानन्द: वेदस्य प्राचीनकाले विद्यमानं गौरवं पुन: प्रतिष्ठापितवान्।

**शिक्षादर्शनम्** :- स्वामिदयान्दमहोदयानुसारं

१. बालकानां पञ्चमे वर्षे बालिकानाञ्च अष्टमे वर्षे ज्ञानार्जनारम्भ: करणीय:।

२. बालिकबालकानां शिक्षासंस्था: नगरस्य कोलाहलात् सुदूरे भवेयु:।

३. बालकानां शिक्षणसंस्थासु सर्वे शिक्षका: कर्मचारिण: सेवकाश्च पुरुषा:, बालिकानाञ्च शिक्षणसंस्थासु सर्वा: स्त्रिय: एव भवेयु:।

४. बालिकानां बालकानाञ्च कृते ब्रह्मचर्यं सेवनीयं यतोऽहि अनेन विना ज्ञानं प्राप्तुमशक्ता: भविष्यन्ति।

५. सर्वेषां वर्णानां पुरुषाणां स्त्रीणाञ्च भेदभावनां विना शिक्षाप्राप्तये समानाधिकारा: भवेयु:।

**शिक्षायाः उद्देश्यानि:-** स्वामिदयानन्दमते शिक्षायाः प्रमुखमुद्देश्यं धर्माचरणं वर्तते। यथा -

१. वैदिकसंस्कृतेः पुनरुत्थानम्।

२. मानवेषु सांस्कृतिकवैयक्तिकतायाः विकासः।

३. मनुष्याणां विशुद्धचरित्रस्य निर्माणम्।

४. जनानां मानवीकरणम्।

५. मनुष्येषु सदसदः विभेददूरिकरणम्।

६. मानवेषु राष्ट्रियैकतायाः विश्वबन्धुत्वस्य च भावनायाः विकासः।

**पाठ्यचर्या :-** स्वामिदयानन्दः शिक्षायाः पाठ्यचर्यायां विविधानां विषयाणां स्थानं निर्धारितवान् यथा- १. सर्वादौ बालकेभ्यः बालिकाभ्यश्च पाणिनिना विरचितस्य ध्वनितत्त्वस्य बोधः करणीयः।

२. ध्वनिविज्ञानात् परं छात्रेभ्यः व्याकरणं शिक्षणीयम्। अष्टाध्याय्याः सूत्रपाठः, धातुपाठः इत्यदयः।

३. व्याकरणाभ्यासान्तरं छात्रेभ्यः निघन्टुः, निरुक्तम् इत्यादयः ग्रन्थाः अर्थसहितं शिक्षणीयम्।

५. निर्दिष्टानामेतेषां विषयाणामनन्तरं छात्रेभ्यः चत्वारः वेदाः अध्यापनीयाः। एतेषाम् अध्ययनं षड्वर्षावधौ समापनीयं भवति।

६. वेदानाम् अध्ययनं परिसमाप्य छात्रैः चत्वारः उपवेदाः अध्येतव्याः भवन्ति।

७. अन्ते छात्रेभ्यः विशिष्टाः विषयाः अपि शिक्षणीयाः। ते यथा - ज्यौतिषशास्त्रम्, बीजगणितम्, अङ्कगणितम्, भूगोलम्, ज्यामिति इत्यदयः।

**शिक्षणविधि:-**महोदयेन प्रतिपादितेषु शिक्षणविधिषु शब्दार्थव्युत्पत्तिः, अनुवादः, व्याकरणम्, प्रवचनम् इत्यादयः मुख्याः । व्याकरणदृष्ट्या शब्दानां पारम्परिकसम्बन्धाः प्रमुखाः आसन्।

**अनुशासनम् :-** स्वामिदयानन्दः अनुशासनस्य स्थापनार्थं दण्डमावश्यकमिति मनुते स्म । अनुशासनस्य स्थापनार्थम् योगाभ्यासः श्रेयस्करः इति मनुते स्म।

**गुरुशिष्ययोः सम्बन्धः :-** स्वामिनः दृढविश्वासः आसीद्यत् अध्यापकाः अध्यापिकाश्च विशिष्टैः गुणैः समन्विताः भवेयुः। तन्मते शिक्षकः इव छात्रेष्वपि केचन विशिष्टगुणानामनिवार्यता आवश्यकी भवति। छात्राः ज्ञानप्राप्तये समर्थाः भविष्यन्ति। अनन्तरं छात्राः सदैव जितेन्द्रियाः शान्ताः स्वकीयं शिक्षकं प्रति सहपाठिनं प्रति स्नेहपूर्णविचारशीलाः अध्ययनशीलाश्च भवेयुः इति।

# वेदकालीन नारीशिक्षा

**शाश्वती सुभदर्शिनी परिडा**
शिक्षाशास्त्रिप्रथमवर्षम्

नारयति पालयति आत्मजा या सा नारी। स्वयम्भूब्रह्माणं विहायास्यां सृष्टौ न कोऽपि जीवो वर्तते यस्य जन्म नारीसहायतां विना अभूत्। समाजे नारी बह्वीषु भूमिकासु तिष्ठति "क्वचित् मातृरूपेण, क्वचित् भगिनीरूपेण, क्वचित् च जायारूपेण परन्तु एतासु भूमिकासु तस्याः मातृभूमिका सर्वोपरि परिगणिता भवति। अस्यां भूमिकायां सा सन्ततिभ्यः आशिषः प्रयच्छति नारी भवति माणवकस्य आदिमः गुरुः। सा एव सर्वाङ्गीणविकासाय पुत्रहितसाधनाय च नितरां चोदयति प्रेरयति च निखिलेऽस्मिन् जगति। जनसंख्यादृष्ट्या नारीणां संख्या पुरुषतुलनया न्यूना न भवति। मानवतादृष्ट्या नार्यपि समानाधिकारिणी भवति। अतः मानवसमाजस्य समुन्नतिः सन्निहिता वर्तते नारीनरयोः समानप्रगतौ एव।

समाजस्य विकासार्थं नारीणां भूमिका महती वर्तते। तत्रापि शिक्षा परमावश्यकी भवति। शिक्षया जनेषु आत्मविश्वासः समुत्पन्नः भवति। समाजस्य विकाससाधनाय गृहस्य भित्तिस्वरूपा भवति नारी। चक्रं विना यथा रथस्य गतिः असम्भवा तथैव नारीं विना सुसमाजनिर्माणम् असम्भवं भवति। समाजे स्त्रियः क्षमतायाः प्रतिभायाः च प्रतिमूर्तिरूपाः भवन्ति। कुत्रचिन्नारीणां सम्मानमाधिक्येन उच्यते।

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वस्तत्राफला क्रिया।।**

कस्यापि देशस्य समाजस्य वा सांस्कृतिक-बौद्धिक-वैज्ञानिकप्रगतिः तस्य देशस्य शैक्षिकस्थित्युपरि आधारिता भवति। शिक्षया समाजस्य व्यक्तित्वस्य निर्माणं भवति। प्राचीनकालेऽपि नारी शिक्षा आसीत्। पुरुषार्थचतुष्टयसाधनं वैदिककाले शिक्षायाः उद्देश्यमासीत्। मोक्षप्राप्तिरेव जीवनस्य चरमलक्ष्यरूपेण गणितम्। **वेदोऽखिलो धर्ममूलम्** इति मनुवचनानुसारं वेदः मानवजातेः धर्मपथप्रदर्शको भवति।

**वैदिककाले स्त्रीशिक्षा -**

वैदिककाले स्त्रीणां कृते अनिवार्या शिक्षा आसीत् । प्राचीनतमविभिन्नेषु ग्रन्थेषु अनेकासां विदुषीणां वर्णनमस्ति । तद्यथा - उर्वशी, घोषा, विश्ववारा, गार्गी, मैत्रेयी, आत्रेयी इत्यादयः।

उपनयनस्य यज्ञोपवीतधारणमेकं लक्षणं भवति। अत: शिक्षादानात् पूर्वं स्त्रीणामपि उपनयनसंस्कार: आसीदिति गोभिलगृह्यसूत्रे स्पष्टं भणितम् ।

हारिनमतानुसारं स्त्रीणां भेदद्वयमस्ति। ब्रह्मचर्यव्रतं पालयित्वा वेदाध्ययनं शास्त्राध्ययनं च कुर्वन्ति। अपरा: बाल्यकालादेव विवाहं कृत्वा स्वतन्त्रतां प्राप्तवत्य:। स्वबुद्ध्या समाजं साहित्यं च समृद्धं कृतवत्य:। ऋग्वेदे विंशतिनारीणाम् उपरि दत्तानां नामोल्लेख: विद्यते।

**नारीणां कृते शिक्षणसंस्था**: - नारीणां कृते स्वतन्त्रशिक्षासंस्थानां व्यवस्था आसीदिति कुत्राप्युल्लेखो न दृश्यते। बौद्धविहारेषु तासां शिक्षाव्यवस्था आसीत्। उत्तररामचरितानुसारम् आत्रेयी वाल्मीके: आश्रमे अधीतवती। भवभूते: मालतीमाधवनाटके कामन्दकी गुरुकुले अधीतवती। पत्नी कन्यावधू च गुरुकुले वासहेतो: तत्र पठनस्यावसरं प्राप्तवत्य:। परन्तु शास्त्रानुसारं गृहेष्वेव कन्या: शिक्षामलभन्त।

**सहायकग्रन्थ**: :- वेदकालीननारीशिक्षा।

## भाषोत्पत्तिसिद्धान्ता:

**अर्पिता अनुपमा**

शिक्षाशास्त्रिप्रथमवर्षम्

**का नाम भाषा -** भाष्यते व्यक्तवाग्रूपेण यस्या: अभिव्यक्ति: क्रियते सा भाषा इति कथ्यते। समग्राणां मानवविचाराणां बोधने यत् परमं साधनमस्ति सा भाषा। शब्दरूपात्मकानाम् आदानप्रदानं भवति भाषा।

**भाषाया: उत्पत्ति**: :- भाषाया: उत्पत्यर्थम् अनिवार्यं अंशौ द्वौ वर्तेते। यथा - वाग्यन्त्रस्य ध्वननम्। उच्चारितध्वनीनाम् अर्थेन सह सम्बन्धस्थापनम्।

**भाषोत्पत्तिसिद्धान्ता**: :- भाषोत्पत्तिसिद्धान्ता: अनुमानस्योपरि आश्रिता: भवन्ति। परन्तु विज्ञानं तथ्याधारितं भवति। अत: भाषाविज्ञाने भाषोत्पत्तिविषयका: विविधा: सिद्धान्ता: प्रस्तूयन्ते। तत्र नववादा: प्रधानतया वर्तन्ते। तेषां विषये अत्र विवरणं प्रस्तूयते।

**दिव्योत्पत्तिसिद्धान्त**: - भाषोत्पत्तिविषये अयं सिद्धान्त: प्राचीनतम:। यथा परमात्मा सृष्टिं कृतवान् तथैव मानवानां कृते परिष्कृतां भाषामापि सृष्टवान् इति अस्मिन् सिद्धान्ते प्रतिपाद्यते।

**सङ्केतसिद्धान्तः** - अस्य सिद्धान्तस्य अपरनामानि वर्तन्ते यत् निर्णयवादः, स्वीकारवादः, निर्णयसिद्धन्तः इत्यादयः। अस्य सिद्धान्तस्य कर्ता रूसो भवति। अस्मिन् सिद्धान्ते मानवः स्वीयभावान् प्रकटयितुम् अङ्गसञ्चालनं करोति तेन सह ध्वनिं करोति अतः सङ्केतसिद्धान्तः इति।

**रणनसिद्धान्तः** - अयं सिद्धान्तः धातुसिद्धान्तः इत्यपि कथ्यते। सर्वप्रथमम् इदं मतं प्लेटो महोदयेन संकेतितम्। रणनसिद्धान्तानुसारं शब्दार्थयोः रहस्यात्मको नैसर्गिकः सम्बन्धः भवति। एतेषां काचित् सीमा भवति। वस्तुनः उपरि आघातं करोति चेत् एकः विशेषः ध्वनिः भवति, एषः विशेषः ध्वनिरेव तस्य विशेषता भवति। एषः भवति रणनसिद्धान्तः।

**मनोभावाभिव्यञ्जकतासिद्धान्तः** - अस्य सिद्धान्तस्य अपरनामानि वर्तन्ते यत् आवेगसिद्धान्तः, व्यञ्जकतावादश्चेति। आदिमकाले मानवः तस्य आवेगस्य प्रकटनार्थं येषां शब्दानां प्रयोगं कृतवान् अनन्तरकाले ते एव शब्दाः भाषारूपेण परिणमिताः वर्तन्ते। अनेन शब्देन मनसः स्थितिः किम् अस्ति इति ज्ञायते।

**श्रम-ध्वनि-सिद्धान्तः** - अस्य सिद्धान्तस्य अपरनाम वर्तते श्रमापहारमूलकतावादः। न्वायर् महोदयः अस्य सिद्धान्तस्य जनकः भवति। श्वासनिःश्वासवेगात् स्वरतन्त्राणां च कम्पनेन शारीरिकपरिश्रमस्य निवारणं भवति अत एव अस्य सिद्धान्तस्य नाम श्रम-ध्वनि-सिद्धान्तः इति।

**अनुकरणमूलकसिद्धान्तः** - एषः सिद्धान्तः ध्वन्यनुकरणसिद्धान्तः, शब्दानुकरणवादः, शब्दानुकरणमूलकतावादः वा कथ्यते। एषः सिद्धान्तः प्रतिध्वनेः उपरि आधारितः भवति। अर्थात् प्रकृतौ जीवाः, वस्तुनः ध्वनिं श्रुत्वा पुनः अनुकुर्वन्ति इति।

**इङ्गितसिद्धान्तः** - अस्य सिद्धान्तस्य प्रवर्तकः भवति डा. राय्। अस्य सिद्धान्तस्य मतानुसारं मानवः आङ्गिकचेष्टाभिः स्वीयभावम् अभिव्यनक्ति। तदाधारेण केषाञ्चित् शब्दानाम् उत्पत्तिः जायते। अत्र भावव्यञ्जकध्वनयः, अनुकरणात्मकशब्दाः, भावसङ्केताः, अज्ञानानुकरणमिति सोपानानि अस्मिन् सिद्धान्ते मुख्यानि।

**प्रतीकसिद्धान्तः** - एतन्मतानुसारं केचन शब्दाः यं कमपि सम्बन्धमाश्रित्य स्वल्पेन रूपेण वृद्ध्यर्थं बोधयित्वा तस्य अर्थस्य प्रतीकाः भवन्ति। एते बालशब्दाः भवन्ति। यथा - माता, पिता, भ्राता, इत्यादयः। एते शब्दाः प्रतीकरूपेण प्रयुज्यन्ते। सूक्ष्मतत्त्वानाम् अर्थानां बोधः न शक्यते।

**समन्वयसिद्धान्तः** - एतस्य सिद्धान्तस्य प्रवर्तकः वर्तते **हेनरी स्वीट्** महाभागः। भाषोत्पत्तिविषये उपरोक्तसिद्धान्तानाम् अङ्गीकारः न भवति इति कारणात् एकस्य नूतनसिद्धान्तस्य प्रस्तुतिस्थाने

विद्यमानान् सर्वान् सिद्धान्तान् सम्मेल्य एकस्य नूतनसिद्धान्तस्य प्रवर्तनं कृतवान्। सः एव सिद्धान्तः समन्वयसिद्धान्तः। अत्र लाक्षणिकशब्दानां प्रयोगः क्रियते। अनुकरणात्मक - मनोभावाभिव्यञ्जक – प्रतीकात्मकाश्च अस्य सिद्धान्तस्य मुख्यबिन्दवः भवन्ति।

**उपसंहारः** - मानवः यदा स्वकीयान् विचारान् प्रकटयितुम् इच्छति तदा तस्य भाषा सुप्रयुक्ता भवेत्। अतः भाषायाः उत्पत्तिं ज्ञातुं विभिन्नानां सिद्धान्तानां एकत्रीकरणेन भाषायाः विकासः जातः।

## अन्तर्दर्शनविधिः

**आशालता दाश**

शिक्षाशास्त्रिप्रथमवर्षम्

अयं विधिः अन्तर्निरीक्षणविधिरूपेण प्रसिद्धः अस्ति । मनोविज्ञाने अयं विधिः अत्यन्तप्राचीनतमो वर्तते । मनोविज्ञानस्य सम्बन्धः यदा दर्शनशास्त्रेण सहासीत् तदा ये दार्शनिकाः आसन् ते बालानामध्ययनाय आत्मदर्शनस्यैव शिक्षां कारयन्ति स्म । स्वस्य मानसिकक्रियाणां अनुभूतीनां च अध्ययनमेव आत्मनिरीक्षणं वर्तते । अस्मिन् विधौ मनः मानसिकक्रियासु युज्यते । आङ्ग्लभाषायां Introspection इति पदम् अस्य कृते उपयुज्यते । आङ्ग्लभाषानुसारमत्र पदद्वयं वर्तते । प्रथमं इन्स्ट्रो यस्यार्थः भवति अन्तः, द्वितीयञ्च स्पैक्शन यस्यार्थः भवति आत्मनिरीक्षणमिति ।

आधुनिके काले वुण्ट-टिचनरमहोदयौ प्रवर्तकौ वर्तेते । वस्तुतः मानसिकव्यापाराणां क्रियाप्रतिक्रियाणाञ्च अध्ययनमेव अन्तर्निरीक्षणं वर्तते । अतः मानसिकव्यापाराणाम् अध्ययनाय एतस्य विधेः प्रयोगो क्रियते । अन्तर्दर्शनस्य अथवा अन्तर्निरीक्षणस्य प्रामुख्येन तिस्रः अवस्थाः विद्यन्ते -

१. यदा जनः स्वस्य मानसिकक्रियाणां विचारं करोति अथवा कस्यचिद् कार्यस्य गुणदोषान् स्वयमेव चिन्तयति ।

२. यदा जनाः कस्यापि कार्यस्य कारणान् अन्विषन्ति ।

३. यदा जनः स्वस्य आचरणं परिमार्जयितुं प्रयत्नं करोति ।

**परिभाषा -** अत्र काश्चन परिभाषाः प्रदत्ताः सन्ति । यथा -

१. टिचनर् महोदयानुसारेण स्वस्य अन्तः निरीक्षणमेव अन्तर्निरीक्षणम् ।

२. स्टौटमहोदयानुसारेण क्रमबद्धप्रणाल्या स्वस्य मस्तिष्कस्य व्यापाराणां निरीक्षणमेव अन्तर्निरीक्षणम् ।

**अन्तर्दर्शनविधेः गुणाः -**

**१.** अस्मिन् जनाः व्यवहारान्तरम् आत्मनिरीक्षणं कर्तुं शक्नुवन्ति ।

**२.** निरीक्षणमिदं सर्वस्मिन् काले सर्वत्र कर्तुं शक्यते ।

**३.** अत्र प्रयोगशालादिकं नापेक्ष्यते ।

**४.** अत्र व्ययादिकम् अधिकं न भवति अतोऽयं विधिः व्ययसाध्यो नास्ति ।

**अन्तर्दर्शनविधेः दोषाः -**

१. अत्र निष्कर्षाणां सत्यापनम् असम्भवो भवति ।

२. अत्र वैयक्तिकतायाः दोषः इत्यस्य सम्भावना बलवती भवति ।

३. अस्मिन् मनः एव मनसः अध्ययनं करोति, मनसः विभागस्तु असम्भवः ।

४. अस्माकं मानसिकप्रक्रिया प्रायशः क्षणिका अस्पृष्टा अस्थिरा च भवति ।

**सन्दर्भग्रन्थः -**

१. श्रीनिवासः पद्ममित्रः, शिक्षायाः मनोवैज्ञानिकाधाराः ।

२. आधुनिकं शिक्षामनोविज्ञानम्, लोकमान्यमिश्रः ।

३. अधिगमकर्ता का विकास एवं शिक्षण - अधिगमप्रक्रिया, एस. के. मङ्गल ।

## प्रजातन्त्रशिक्षा

**सुचित्रा बेहरा**

शिक्षाशास्त्रिप्रथमवर्षम्

**प्रजातन्त्रस्य अर्थः सिद्धान्तश्च –**

प्रजातन्त्रशब्दस्य आङ्ग्लभाषायाम् अर्थो भवति **Democracy** । अस्य शब्दस्य उत्पत्तिः ग्रीक्भाषायाः डेमोस क्रेरोट्स इति शब्दाभ्यां निष्पन्नो वर्तते । डेमोस नाम जनता अथवा जनः तन्त्रञ्च शक्तिः इत्यस्य द्योतको भवति । अर्थात् जनशक्तिः प्रजाशक्तिः वा । अस्य सम्पूर्णार्थो भवति प्रजानां हस्ते प्रशासनिकाधिकारशक्तिः इति । अस्यैव अपरं नाम जनतन्त्रं, लोकतन्त्रम् इत्यपि व्यवह्रियते ।

**प्रजातन्त्रस्य परिभाषाः -**

१. 'Democracy is a form of government by the people, of the people and for the people' - Abraham Lincon. अर्थात् प्रजातन्त्रम् एतादृशी सर्वकारीया व्यवस्था भवति या प्रजाभिः प्रजाभ्यः प्रजानां कृते च भवतीति।

२. ब्रेसिमहोदयानुसारम् 'एकस्मिन् व्यक्तौ, वर्गे, एकस्यां जात्यां वा प्रशासनिकाधिकारः निहितः सीमितश्च न भवति। समस्तजनानां हस्तेषु एव निहितः भवति तं प्रजातन्त्रमित्यभिधीयते इति'।

३. सर्वेपल्लिराधाकृष्णन् महोदयानुसारं 'प्रजातन्त्रं न केवलं राजनैतिकव्यवस्थात्मकस्वरूपं भवति अपि च जाति-धर्म-भाषा-प्रान्त-वर्ण-वर्ग-वृत्ति-लिङ्गादि दृष्ट्या निरपेक्षतया समस्तजनानां स्वतन्त्रता, समानाधिकारसिद्धान्तस्य उपरि आधारितं वर्तते।

**प्रजातन्त्रस्य मूलसिद्धान्ताः** - प्रजातन्त्रस्य मूलतः चत्वारः सिद्धान्ताः सन्ति -

| | |
|---|---|
| स्वतन्त्रतासिद्धान्तः | समानतासिद्धान्तः |
| न्यायसिद्धान्तः | भ्रातृत्वभावसिद्धान्तः |

- **स्वतन्त्रतासिद्धान्तः** - अयं प्रजातन्त्रस्य पृष्ठभूमिर्वर्तते । अनेनैव मानवाः स्वकीयशक्तिसामर्थ्यानां विकासं सम्पादयितुम् अर्हन्ति । अत्र सर्वेषां नागरिकाणां कृते स्वीयपक्षम् अधिकृत्य चिन्तयितुं, स्वीयविचारधारामभिव्यञ्जयितुम्, अभीष्टधर्ममवलम्बयितुम्, अभीष्टकार्यं कर्तुम्, अभीष्टस्थाने उषितुम्, अभीष्टसम्बन्धान् स्थापयितुं, स्वतन्त्रतापूर्वकं च व्यवहर्तुञ्च अवसरो कल्प्यते।
- **समानतासिद्धान्तः** - जाति-धर्म-भाषा-प्रान्त-वर्ण-वर्ग-वृत्ति-लिङ्गादि दृष्ट्या भेदः न भवति एवञ्च समस्तजनानां कृते अत्र समानावसराः भवन्ति।
- **न्यायसिद्धान्तः** - प्रजातन्त्रे कस्यचिदपि व्यक्तेः आर्थिक-सामाजिक-धार्मिक-शैक्षिक-राजनैतिकादि नेपथ्यमाधारीकृत्य प्राचीनकालवद् न्यायो नैव प्रदीयते। न्यायप्रदाने तु भेदभावो न भवति। अत्र समेपि समानाः इति भावना प्रबलीभवति।
- **भ्रातृत्वभावसिद्धान्तः** - मानवः सामाजिको भवति। मानवानां जीवने पारस्परिकसम्बन्धाः, क्रियाणाम् आदानप्रदानञ्चापि आवश्यकं भवति । सर्वैस्सह सहोदरवद्व्यवहारो करणीयः । एवञ्च उचितसामाजिकसम्बन्धान् स्थापयितुं प्रयत्नो विहितव्यः । यावत्पर्यन्तं वयं सर्वे एकस्याः मातुः पुत्राः इति भावः नोदेति तावत्पर्यन्तम् उचितसामाजिकसम्बन्धादीनां स्थापनमसम्भवति। अत एव भ्रातृत्वभावस्योपरि बलमत्र प्रदीयते।

# स्वच्छातायै संस्कृतशिक्षा

**यंग् चन्द् ओझा**

शिक्षाशास्त्रिप्रथमवर्षम्

शिक्षा नाम किम् ? इति प्रश्ने सति शिक्ष् विद्योपादाने इत्यस्मात् भौवादिकधातोः गुरोश्चहलः इति सूत्रेण अप्रत्यये अजाद्यतष्टाप् द्वारा शिक्षा इति शब्दः निष्पद्यते । शिक्षा नाम आजीवनं प्रचाल्यमाना काचिद् गतिशीला प्रक्रिया इति व्यापकार्थः स्वीकर्तव्यः । भारतीयदर्शनेषु शिक्षा, विद्या, ज्ञानम् इत्यादीनि समानार्थकपदानि भवन्ति अतः भिन्नतया वेदपुराणोपनिषत्सु शिक्षायाः विषये उक्तम् । तद्यथा - ''**सा विद्या या विमुक्तये**''।[1] एवञ्च ''**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते**''।[2]

**स्वच्छतायै संस्कृतं नाम किम् ?** इति प्रश्ने सति वक्तुं शक्यं यत् संस्कृतभाषारचितशास्त्रेषु स्वच्छतायाः आग्रहः वर्तते अतः स्वच्छता आवश्यकीया इति तदर्थञ्च संस्कृतस्य पठनं पाठनम् अनिवार्यं भवतु इति धिया अयमालेखो रचितो वर्तते । तद् कथमिति पश्यामः -

**''संरक्षेत् दूषितो न स्यात् लोकः मानवजीवनम् ।**
**न कोऽपि कस्यचिद् नाशं कुर्यादर्थस्य सिद्धये ।''**

स्वच्छता मुख्यतः चतुर्धा । शारीरिक-मानसिक-वैयक्तिक-सामूहिक्यश्च । एतस्मिन् विषये जनेषु चैतन्यम् उत्पादयितुं नैतिकतां धार्मिकताञ्च आनेतुं संस्कृतशिक्षा अत्यावश्यकी ।

**शारीरिकस्वच्छतायै संस्कृतशिक्षा -** उच्यते एव स्वस्थशरीरे स्वस्थं मनः इति । अधुना समग्रविश्वे बहवो रोगिणः सञ्जाताः चिकित्सालयाः अपि एधन्ते । एतस्य निवारणाय योगः खलु कर्तव्यः । एतद्कर्तुं संस्कृतस्य पठनं तच्च संस्कृतमाध्यमेन आवश्यकमिति ।

**मानसिकस्वच्छतायै संस्कृतशिक्षा - 'चिता चिन्ता समा प्रोक्ता बिन्दुमात्रं विशेषता । चिता दहति निर्जीवं चिन्ता दहति सजीवम् ।।'** अस्यार्थः सारत्वेन वदति यत् मनसः निग्रहः आवश्यकः इति । अधुना गेहे गेहे अशान्तेः वातावरणं, प्रति परिवारे च कलहो दृश्यते एतदतिरिच्य मिथ्या-हिंसा-क्रोध-रक्तपातादयः वर्धमानाः वर्तन्ते । जनेषु आध्यात्मिकता, परोपकारिता, दया, क्षमादिगुणानाम् अभावो दृश्यते ।

---

[1] तैत्तरीयोपनिषदि।

[2] श्रीमद्भागवत्गीतायाम्।

**व्यक्तिगतसामूहिकस्वच्छतायै संस्कृतशिक्षा - अयं निजः परोवेति गणना लघु चेतसाम् । उदारचरितानां तु वसुधैवकुटुम्बकम् ।।** अधुना एतादृशजनानां संख्या अधिका जाता । ननु ये आत्मानं विषये चिन्तयन्ति, तेषां तच्च चिन्तनं स्वच्छतायै अपि भवति । अहं किमर्थं कुर्याम् इति अतः स्वच्छताविषये वैयक्तिकचिन्तनं सामूहिकचिन्तनं च विदधातुं संस्कृतशिक्षा अनिवार्या यतः विश्वबन्धुत्वं, सामाजिकोन्नत्यादिषु नैतिकविषयेषु संस्कृते महती परम्परा भवति । अतः एतद् साधयितुं संस्कृतशिक्षा आवश्यकी ।

**सारः -** मानवाः यन्त्रं निर्मान्ति, संस्कृतञ्च मानवान् निर्माति ।

**सन्दर्भग्रन्थाः -** शर्मा च. ल. ना., संस्कृतशिक्षणं नवीनप्रविधयश्च ।

झा मदनमोहनः, संस्कृतशिक्षणम् ।

## भारते मूल्यशिक्षायाः आवश्यकता

**मिता पधानः**

शिक्षाशास्त्रिप्रथमवर्षम्

**उपोद्घातः** - मूल्यशब्दः आङ्ग्लभाषायां वेल्यू इति उच्यते यस्यार्थो लाटिन् भाषायां भवति कस्यचन वस्तुनः गुणः, विशेषता, योग्यता, उपयोगिता वा । जीवनं तु मूल्येन एव परिचाल्यते । अस्य वास्तविकार्थस्तु व्यापको भवति यतः सर्वेषामपि गुणानामाधारो मूल्यमेव । एतदेव यदा शिक्षणसन्दर्भे समायाति तदानीम् उच्यते मूल्यशिक्षेति ।

**मूल्यानां प्रकाराः -** मूल्यानि वस्तुतः पञ्चधा भवन्ति । तच्च नैतिकानि, आध्यात्मिकानि, सामाजिकानि, शैक्षिकानि, राष्ट्रियानि च । तद्यथा -

**नैतिकमूल्यानि -** नैतिकमूल्यानि मानवव्यवहारस्य मार्गदर्शकानि भवन्ति । यथा सत्यं वद, धर्मं चर, मातृदेवो भव, आचार्यदेवो भव, परोपकारः, सहिष्णुतादयः ।

**आध्यात्मिकमूल्यानि -** भारतस्य दर्शनं भवति आध्यात्मिकदर्शनम् । अतः भारते आध्यात्मिकमूल्यानां महत्त्वं वर्तते । अहिंसा परमो धर्मः, परोपकारार्थमिदं शरीरम्, प्रियं च नानृतं ब्रूयाद्, एषः धर्मः सनातनः, पुनः ईशावासोपनिषदि उक्तं यत् - **''ईशावास्यमिदं सर्वं यत्किञ्चिज्जगत्यां जगत्''** एवमेव अन्यच्च **''यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति''** एतानि वाक्यानि आध्यात्मिकमूल्यानि प्रदर्शयन्ति ।

**सामाजिकमूल्यानि -** समाजः एकः नीडसदृशः। अत्र सर्वैः सामानाधिकारेण जीवितुं शक्यते अतो सुखेन स्थातुं सर्वेषां हृदये समाजसेवा, समानता, मानवीयता, दया, परोपकारादीनि मूल्यानि विकासयितव्यानि। संज्ञानसूक्ते अयं मन्त्रः अस्य भावं द्योतयति -

**''संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्**

**देवाभागं यथा पूर्वे संजानाना उपासते।''**

**शैक्षिकमूल्यानि -** शिक्षाक्षेत्रे यानि मूल्यानि भवन्ति तानि शैक्षिकमूल्यानि । अत्र महापुरुषाणां जीवनादर्शः सत्प्रवर्तनम्, समयानुवर्तिता, सम्कग्तया पठनं पाठनं एतानि मूल्यानि शैक्षिकमूल्यानि।

**राष्ट्रियमूल्यानि -** अस्माकम् उद्देश्यं भवति राष्ट्रस्य विकासः । तस्य हितार्थं सदा यद्यद् करणीयं तद्सर्वं वैयक्तिकस्वार्थं त्यक्त्वा राष्ट्रोन्नत्यै करणीयमेव। सर्वेषां मध्ये मातृभावना जागरणीया। तथा एव राष्ट्रभक्तिः समर्पणभावना इत्यादीनि मूल्यानि विकसितानि भवन्ति।

**मूल्यशिक्षायाः आवश्यकता -** प्राचीनकाले अस्माकं राष्ट्रं विश्वगुरुरिति नाम्ना प्रसिद्धः आसीत्। अस्य कारणं भारतस्य नैतिकाध्यात्मिकादीनि मूल्यानि एव आसन् । परन्तु अधुना अस्माकं शिक्षाव्यवस्था चतुर्दिक्षु बन्धिता भारतीयमूल्यहीना चास्ति। भारतीयाः पाश्चात्त्यपद्धतिं स्वीकृत्य स्वीयपरम्पराणां विस्मरणं कुर्वन्तः सन्ति । वर्तमानशिक्षाव्यवस्थायाः परिवर्तनेन अस्माकं शिक्षाजगतः भारतीयचिन्तनधारा मूल्याधारिता भवति इति । अतः अधुना वयं न पूर्णरूपेण भारतीयाः न पाश्चात्त्याः। सर्वे जानन्ति अस्माकं देशस्य मूल्यं किमिति ? परन्तु जीवने आचरणस्य स्थिरता नास्ति। भारतीयजीवनमूल्यं जीवनदर्शनं केवलं ग्रन्थान्तर्गते एव प्रतिभाति न तु आचरणे। अतः भारते सर्वं स्थित्वा अपि भारतस्य उन्नतिः न भवति।

**उपसंहारः -** राष्ट्रस्य उन्नतिनिमित्तं प्रत्येकं विद्यालये, महाविद्यालये, विश्वविद्यालये च मूल्यशिक्षायाः व्यवस्था कल्पनीया । अनेन अस्माकं वेदेषु, पुराणेषु, उपनिषत्सु च स्थितानि मूल्यानि ज्ञात्वा अस्माकम् आचरणे व्यवहारे आनेतव्यानि। एतत् भवति चेत् भारतं पुनः विश्वगुरुः स्थानम् अवश्यम् अलङ्करिष्यति।

## शिक्षाक्षेत्रे नवमाध्यमानां प्रसारः

**ज्योति ए. के.**

शिक्षाशास्त्रिप्रथमवर्षम्

सर्वासु मेखलासु शास्त्रसांकेतिकविद्यायाः तद्द्वारा पठन्तः सन्तः जीवामो वयम् । अस्माकं सांकेतिकविद्या प्रतिक्षणं पुरोगम्यमाना इति कथने नास्त्यतिशयोक्तिः । वैयक्तिकविकासे, सामाजिकविकासे तद्द्वारा राष्ट्रस्य पुनरुद्धरे च अनेकानि परिवर्तनानि एतया सञ्जातानि ।

सामाजिकपरिवर्तनेन साकं शिक्षाक्षेत्रेष्वपि साङ्केतिकविद्यायाः प्रसारेण नूतनाः बहवः विधयः उद्भूताः इदानीमपि उद्भूयन्ते च । विषयाणामवतारणे अध्यापने च शिक्षकैः नूतनपद्धतयः यथाशक्यं चिन्तनीयाः एव । तथैव शिक्षणम् आस्वाद्यकरं रक्षात्मकञ्च भविष्यति । यदि शिक्षणविधयः कठिनाः तर्हि छात्राणां पठनं क्लेशाय भवति, तस्मात् छात्राणां क्लेशनिवारणाय औत्सुक्यसम्पादनाय च साङ्केतिकविद्यायाः अनिवार्यता अस्मिन् जगति वर्तते इत्यत्र नास्ति सन्देहलेशः ।

**शिक्षणे आविर्भूताः परिष्कारः -** पुराकाले गुरुकुलसम्प्रदाये गुरोरेव प्रमुखस्थानमासीत् । रटनाभ्यासद्वारा शिष्याः विद्यामधीतवन्तः । कालान्तरे लिपेराविर्भावः यदा सञ्जातः तदा अक्षराणां पठनेन लेखनेन च पठनम् अग्रे अगच्छत् । पश्चात् यदा मुद्रणमारब्धं तदा अस्माकं शिक्षाक्षेत्रे महत्त्वपूर्णानि परिवर्तनानि सञ्जातानि । पाठ्यपुस्तकानि, वार्तापत्रिकाः, मासिक्यश्च विद्यायाः आर्जने दत्तसम्भावनाः निस्तुलाः भवन्ति ।

**सङ्गणकम् अन्तर्जालश्च -** साङ्केतिकविद्यायाः अतिविशिष्टा मेखला भवति एषा । सङ्गणकान्तर्जालयोः उपयोगः शिक्षाप्रक्रियां नूतनावस्थायामस्थापयत् । एतयोः आगमनानन्तरं शिक्षणे सरलता विशालता च सञ्जाता । यदा वयं पाठयामः तदानीं सूचनासम्प्रेषणप्रविधेः उपयोगमपि कुर्मः चेत् छात्राणां मनसि पाठितांशं चिरकालं यावत् तिष्ठति ।

संस्कृतशिक्षाक्षेत्रेऽपि सूचनासम्प्रेषणप्रविधेः उपयोगः करणीयः एव । आदिशंकराचार्यः भगवद्गीता, प्रियमानसम्, इष्टिः, सूर्यकान्तः अनुरक्तिः इत्यादीनि चलनचित्राणि संस्कृतभाषया निर्मितानि सन्ति । एवम् अन्नदाता, पुत्रो रक्षति, अजेयः, नीरजम् इत्यादीनि लघुचित्राण्यपि सन्ति । एतेषां प्रदर्शनमपि पठनोद्देश्यमाधारीकृत्य अस्माभिः कर्तुं शक्यते । संस्कृतं केवलं चिरपुरातनी न नित्यनूतना एषा इति बोधं जनयितुम् एवं कर्तुं शक्यते । शिक्षाक्षेत्रे उपयोगयोग्यानि अन्तर्जालस्थानानि नैकानि सन्ति । यथा -

- www.samskritam.org
- www.spokensanskrit.de
- www.sanskritdocuments.org
- www.sanskrit.nic.in
- www.sanskritlibraries.nic.in
- www.sanskritkerala.gov.in
- www.sanskritjnu.ac.in
- www.jampudveepa.com
- www.ignca.nic.in

एवं विचारे सति अस्माभिरवगन्तुं शक्यते यत् अस्मिन्नाधुनिके लोके शिक्षाक्षेत्रे नवमाध्यमानां प्रसक्तिः अत्यधिका वर्तते। एतेषामुपयोगः अध्यापकैः अतीव श्रद्धया करणीयम् इत्येवः सारः।

## मनोविज्ञाने मानवव्यवहारस्य अध्ययनपद्धतयः

**अनुपमा मोहान्ति**
शिक्षाशास्त्रिप्रथमवर्षम्

मानवव्यवहारस्य अध्ययनं भवति मनोविज्ञानम्। शिक्षाक्षेत्रे छात्राणां व्यवहारस्य अध्ययनं भवति शिक्षामनोविज्ञानम्। छात्राणां व्यवहारस्य अध्ययनं विविधपद्धतीभिः ज्ञातुं शक्यते। यथा -

१. **अन्तर्निरीक्षणपद्धतिः-** मनोविज्ञानस्य प्राचीना इयं पद्धतिः। अस्याः पद्धत्याः प्रवर्तकौ द्वौ वुण्ट-टिचनेरमहोदयौ। इन्ट्रोस्पैक्शन अस्याः आङ्ग्लशब्दः यस्यार्थो भवति अन्तर्निरीक्षणम्। कस्याऽपि व्यक्तेः अन्तः किं चलति तज्ज्ञातुं ज्ञानस्यावश्यकता भवत्येव। अनया च पद्धत्या ज्ञातुं शक्यते यत् मानवः केन कारणेन सुखदुःखमनुभवति। एतदर्थं शिक्षकैः दक्षैर्भाव्यम्। एवञ्चानेन न केवलमन्येषामपि तु आत्मनश्चापि अध्ययनं सम्भवति।

२. **निरीक्षणपद्धतिः -** जीवव्यवहरस्य अध्ययनं निरीक्षणपद्धत्या कर्तुं शक्यते। अस्याः पद्धतेः जे .बी. वाट्सनमहोदयः आविष्कर्ता। मनुष्यः अपरमनुष्यस्य व्यवहारस्य निरीक्षणं कृत्वा तस्य स्वभावम् अवगच्छति। उदाहरणार्थम् अध्यापकः छात्रस्य आचार- अभ्यास– क्रिया-

प्रतिक्रियादीनाम् अध्ययनं अनया पद्धत्या क्रियते । तत् द्विधा औपचारिकम् अनौपचारिकं चेति ।

३. **व्यक्तिवृत्ताध्ययनम् -** छात्राणां बह्व्यः समस्याः सन्ति । सामूहिकी वैयक्तिकी चेति । कक्षाप्रकोष्ठे छात्रस्य व्यवहारः सामान्यः स्यात् । तस्य मूलकारणं भौतिकपरिवेशः अथवा पारिवारिकपरिवेशः अथवा सामाजिकपरिवेशो वा । अध्यापकः छात्रस्य व्यक्तित्वाध्ययनं कृत्वा कथं छात्रस्य समस्यायाः समाधानं भवितुम् अर्हति । समाधानमावश्यकम् । कदाचित् छात्रः समूहे तस्य समस्याम् अध्यापकाय न वदति । अध्यापकः वैयक्तिकरूपेण तं पृष्ट्वा समस्यायाः निदानं करणीयम् । एवं रूपेण व्यक्तिवृत्ताध्ययनं करणीयम् ।

४. **प्रायोगिकपद्धतिः -** प्रायोगिकपद्धत्या परिस्थितेः नियन्त्रणं कृत्वा जीवव्यवहारस्य अध्ययनं क्रियते । एतां नियन्त्रितनिरीक्षणपद्धतिरिति व्यवह्रियते । भौतिकशास्त्रे रसायनशास्त्रे च प्रयोगशालायां विविधनियन्त्रितपरिस्थितिषु पदार्थानां स्वभावस्य प्रायोगिकाध्ययनं क्रियते । मनोविज्ञानेऽपि एषा पद्धतिः उपयुज्यते ।

**सन्दर्भग्रन्थः -** श्रीनिवासः पद्ममित्रः, शिक्षायाः मनोवैज्ञानिकाधाराः ।

## शिक्षायाम् आदर्शवादस्य प्रभावः

**कल्पना नन्दः**

शिक्षाशास्त्रिप्रथमवर्षम्

मानवानां विचाराणां विश्लेषणं कुर्मश्चेत् मुख्यतया त्रयः विचाराः दृश्यन्ते । आदर्शवादः, प्रकृतिवादः, प्रयोगवादश्चेति । आदर्शवादः दर्शनस्य एका अतीवप्राचीनचिन्तनधारा अपि च वर्तमाने अपि मानवानां चिन्ताजगति विभिन्नरूपेण प्रभावविस्तारं करोति । पुरातनभारतस्य ऋषिमुनयः पाश्चात्त्यदार्शनिकाश्च प्लेटो-अरस्त्वादयः आदर्शवादस्य महान्तः चिन्तकाः आसन् । पुनः वर्तमानस्य विज्ञाने, व्यावहारिकज्ञाने, वास्तववादी जगति दर्शनमिदम् अस्मान् प्रभावयति । वस्तुतः शिक्षायामादर्शवादस्य प्रभावः कः इति प्रश्नः वारं वारम् आधुनिकानां चिन्तकानां मनस्सु आयाति अतः अस्य किञ्चित् निदर्शनं कुर्मः ।

**शिक्षायाम् आदर्शवादस्य प्रभावः -** आदर्शवादस्य प्रभावस्तु प्राचीनकालादेव शिक्षां प्रभावयति एव । पुरा भारते तु शिक्षायाः प्रमुखाधारः आदर्शवादः एव आसीत् । छात्राणाम् आत्मिकोत्कर्षसाधनम् ईश्वरोपलब्धेः दिव्यज्ञानलाभः एभिः आत्ममुक्तिः उत निर्वाणप्राप्तिः एव

लक्ष्यमासीत् । आदर्शवाददर्शनं वर्तमाने छात्राणां व्यक्तित्वस्य पूर्णविकाससाधने सर्वाधिकं गुरुत्वपूर्णं प्रेरणादायकञ्च।

**आदर्शवादिशिक्षायाः लक्ष्यम् -** आदर्शवादिशिक्षायाः लक्ष्यं तु बहुविधं भवति तथाप्यत्र एतेषां बिन्दुशः विचारः क्रियते। तद्यथा -

१. शिक्षया व्यक्तेः आध्यात्मिकजीवनस्य विकाससाधनं स्यात्।

२. शिक्षा व्यक्तेः आत्मोपलब्धिः, आत्ममुक्तिलाभे सहायिका स्यात्।

३. व्यक्तेः शरीरं, मनः, आत्मनः समग्रव्यक्तित्वस्य च विकासो स्यात्।

४. व्यक्तेः मनसि सत्यं शिवं सुन्दराणां चिरन्तनं मूल्यबोधः प्रभावितः स्यात्।

५. शिक्षया मानवानां सांस्कृतिकपरम्परा रक्षा अपि च सर्जनात्मकविकाससाधनं स्यात्।

६. पदार्थानां भौतिकं स्वरूपम् असत्यम् इति स्यात्।

**पाठ्यक्रमे आदर्शवादस्य प्रभावः -** आदर्शवादानुसारं छात्राणां मनसि आध्यात्मिकचेतनायाः जागरणं कृत्वा ईश्वरस्य उपलब्धिः पाठ्यक्रमे स्यात्। अतो मानवीयानुभूतिः अभिज्ञताप्रदातृविषयाः पाठ्यक्रमे स्युः। तद्यथा -

१. पाठ्यक्रमस्य मूलाधारो जीवनस्य सर्वोच्चाधारो भवति अतः तत्सम्बन्धिविषयाः योजनीयाः।

२. पाठ्यक्रमो मानवानां चिन्तनेषु आदर्शेषु च आधारितः भवेत्।

३. पाठ्यक्रमो मानवजातेः अनुभवानां प्रतीकरूपेण भवितव्यः।

४. पाठ्यक्रमे संस्कृतेः सभ्यतायाः च प्रतिबिम्बः दर्शयितव्यः।

**निष्कर्षः -** शिक्षा आदिमकालादारभ्य विभिन्नदार्शनिकविचारधारासु प्रभावितो सञ्जातः आसीत्। परञ्च अस्योपरि आदर्शवादस्य अधिको प्रभावो दृश्यते। शिक्षाक्षेत्रे तु आदर्शवादं प्रप्रथमतया प्लेटो-कमेनियस-पेस्टालाजी-आदयः आनीतवन्तः। आदर्शवादानुसारं शिक्षा एका चेतनप्रक्रिया अथवा बौद्धिकप्रक्रिया भवति या बालके विद्यमानान् सद्गुणान् बहिरानयति, असद्गुणान् च निवारयति। अतः गुणानां विकासं कृत्वा आध्यात्मिकरूपेण प्राणिनं परिवर्तयति। सांस्कृतिकपरम्पराः ज्ञानस्य च सम्पादनाय शिक्षा एका प्रक्रिया। एनां च शिक्षाम् आदर्शवादः नितरां पोषयति नास्त्यत्र संशीतिः। आदर्शवादस्य महत्तमः सिद्धान्तः सत्यं शिवं सुन्दरम् इत्यादीनां भावनानां विकासः मानवमनस्सु करणीयः इति। अतो अस्माभिरपि शिक्षकैः आदर्शवादः अनुसर्तव्यो भवत्यधुना। इमं च निष्कर्षमत्र यत् आदर्शवादिशिक्षा बालकाय सुखं, शान्तिम् आत्मानुभूतिं च दातुमर्हति।

**सन्दर्भग्रन्थाः -** सिकरवारः प्रेमचदः, शिक्षायाः दार्शनिकसामाजिकाधाराः।
साहुः सोमनाथः, शिक्षायाः दार्शनिकाधाराः।

## बालपर्यावरणशिक्षा

**प्रज्ञापरमिता जेना**
शिक्षाशास्त्रिप्रथमवर्षम्

**उपोद्घातः** – परि आङ् उपसर्गयोः पूर्वकात् वृधातोः करणे ल्युट् प्रत्यये कृते सति पर्यावरणमिति शब्दस्य निष्पत्तिर्जायते। परितः विद्यमानानाम् आवरणं पर्यावरणमिति। परितः नाम अस्मान् परितः यानि तत्त्वानि यथा- जल-वायु-वृक्ष-पशु-पक्ष्यादयः सन्ति। तानि पर्यावरणमिति नाम्ना अभिधीयते। पर्यावरणशिक्षा नाम पर्यावरणमाध्यमेन प्रदीयमाना काचिद् शिक्षा। अस्यां पर्यावरणशिक्षायां नैकविधविषयास्सन्ति। परन्तु बालेभ्यो तादृशीं शिक्षां दातुं कथं शक्नुमः इति कश्चन विचारयोग्यो विषयः वर्तते, तदर्थम् आधुनिकसमाजे चपलमतिबालेभ्यो शिक्षाप्रदानाय अध्यापकैः काचित् नूतनशैली अनुसरणीया वर्तते। छात्राणां विषयावबोधनेन बालानां चिन्तनशक्तेः विकासो जायते। तस्माद् बालानां मनस्सु पर्यावरणसुरक्षायै समर्पणभावनायाः अभिवृद्धिर्जायते। अतः तद् मनसि निधाय सर्वैरपि अध्यापकैः स्वीयकार्ये अग्रेसरपूर्वकं भाव्यम्।

**पर्यावरणशिक्षायाः परिभाषा -** डॉ एन. डी. शर्मामहोदयानुसारं ‘‘मानवेषु पर्यावरणसुरक्षा-चेतनाविकासाय, ज्ञानसंग्रहार्थं, कौशलविकासाय समर्पणभावनायाः विकासार्थञ्च पर्यावरणशिक्षासाधनैः सुसज्जिता वर्तते’’। **ए. बी. सक्सेनामहोदयानुसारं** ‘‘पर्यावरणशिक्षा सा प्रक्रिया वर्तते या अस्मासु पर्यावरणविषये सचेतनं ज्ञानमवबोधनञ्च सम्पादयति विषयेऽस्मिञ्च सानुकूलं दृष्टिकोणं विकासयति। पर्यावरणस्य संरक्षणाय संशोधनाय च सन्नद्धीकरोति’’।

प्राथमिकविद्यालयेषु पठन्तः छात्राः प्रायशः सर्वेऽपि क्रीडासक्ताः भवन्त्येव अतः तादृशेभ्यो बालेभ्यः आधुनिकविधिप्रविध्यादीनां माध्यमेन विवधोपकरणानाञ्च माध्यमेन शिक्षा देया यतः एभिर्तेषाम् अवबोधो झटित्येव जायते यथा -

१. **कथाकथनम् -** बालाः जन्मतः स्वपितामहादितः कथाः श्रृण्वन्ति। श्रवणादनन्तरं तदेव सत्यमिति चिन्तयन्ति। अतः बालेभ्यो कथाः अत्यन्तं रोचन्ते। एतदेव मनसि निधाय अध्यापकाः स्वीयान् पाठ्यांशान् कथारूपेण लघुबालेभ्यो बोधयेयुः।

२. **हास्यकणिकाः -** बालाः क्रीडनेन सह हास्यकथाः श्रोतुं बहूत्सुकाः भवन्ति । अतः स्वीयविषयाणां पाठनसन्दर्भे अध्यापकाः छात्राणां रुचिवर्धनाय एतेषां हास्यकणिकानाम् उपयोगं कर्तुं शक्नुवन्ति । अध्यापकः यं कमपि पर्यावरणविषयं स्वीकृत्य हास्यकणिकया पाठयति चेद् छात्राः सोत्साहेन श्रृण्वन्ति एवम् आनन्दमनुभवन्ति ।

३. **दृश्यश्रव्योपकरणम् -** एतेषु प्रतिकृतिः, चित्रं, प्रक्षेपकयन्त्रं, दूरदर्शनं, सङ्गणकम् इत्यादीनि । साम्प्रतिके समाजे बालानां विषयावगमने सौविध्यकल्पनाय समेपि अध्यापकाः एतेषामुपकरणानाम् उपयोगं कुर्युः ।

४. **अभिनयः -** प्रायः अस्माभिर्दृष्टं स्यात् चलनचित्रेषु अथवा नाटकादिषु लघुबालाः अभनयं कुर्वन्ति । तेनाभिनयेन कश्चनबालः रामरूपेण अभिनयं करोति चेद् सः झटित्येव रामः कीदृशः आसीत्, तस्य के उत्तमगुणाः आसन् एतद्सर्वमपि आत्मसात् करोति । अतः अभिनयद्वारा एतेभ्यः शिक्षणं न केवलं वरमपि तु श्रेयस्करमपि वृणुते ।

५. **क्रीडाप्रदर्शनम् -** बालेभ्यो क्रीडाः सर्वदा रोचन्ते । तदर्थम् आधुनिकसमाजे शिक्षाक्षेत्रेषु सर्वत्र क्रीडायाः प्राधान्यं वरीवर्ति । अनया छात्राणां रुचेः उत्साहस्य चापि वर्धनं जायते । तद् मनसि निधाय यदि समेपि अध्यापकाः पाठयेयुः तर्हि तेषामवगमनं सुकरो भवेत् ।

**सन्दर्भग्रन्थसूची -** शर्मा कौशलेश, पर्यावरणशिक्षा ।

## समावेशात्मकशिक्षा

**बासन्ति हंसदा**

शिक्षाशास्त्रिप्रथमवर्षम्

**उपोद्घातः -** भारतीयसंविधानस्य 45 अ धारानुसारं सर्वकारेण 6-14 वर्षपर्यन्तं निःशुल्का अनिवार्या च शिक्षा कल्पनीयेति । परञ्च स्वतन्त्रताप्राप्तेः सप्तत्यधिकवर्षेष्वपि साक्षरता प्रतिशतं (2011 गणनानुसारं) 74 एव अस्ति । अनेन ज्ञायते यत् शिक्षायां बहवः जनाः समानावसरं न प्राप्नुवन्ति । एतादृशेषु प्रकृत्या उपहताः बालाः विविधकारणैर्शिक्षाक्षेत्रात् वञ्चिताः दृश्यन्ते । एतेषां शिक्षार्थं सर्वकारः बहुधा प्रयतते तदर्थं विशिष्टशिक्षा अन्तर्भवति ।

**समावेशात्मकशिक्षायाः सम्प्रत्ययः -** असमर्थानाम् उत दिव्याङ्गानाम् अथवा सामान्यात् विशिष्टानां छात्राणां भेदभावं विना सामान्यविद्यालयेषु प्रवेशं कल्पयित्वा वैयक्तिकावधानपूर्वकं

समवयस्कैः सह शिक्षावकाशानां व्यवस्थापनमेव समावेशात्मकशिक्षायाः प्रमुखं लक्ष्यम् । अर्थात् दिव्याङ्गानाम् (अन्ध-बधिर-मूक-शब्दहीन-शारीरकविकलाङ्ग-मानसिकविकलाङ्गादयः) पृथक् पृथक् विद्यालयेषु अध्यापनं विना सामान्यविद्यालयेषु प्रशिक्षितशिक्षकाणां मार्गदर्शने पठनपाठनमेव समावेशितशिक्षायाः आधारो वर्तते ।

**समावेशिकशिक्षायाःपारिभाषिकीकरणम्** – वस्तुतः विषयेऽस्मिन् नैकविधकृतशोधाःन विद्वद्भिर्परिभाषारूपेण प्रदत्तास्सन्ति । तत्र हेक्महोदयानुसारं 'विशिष्टबालाः असाधारणबालाश्च ते भवन्ति ये सामाजिक-शारीरिक-मानसिकदृष्ट्या वा बाधिताः भवन्ति । एतैर्साकं मापनेन केषुचिद् क्षेत्रेषु प्रतिभाशालिनः अपि अत्रैव अन्तर्भवन्ति ।

**समावेशिशिक्षायाः आवश्यकता महत्त्वञ्च -** आवश्यकतादृष्ट्या समावेशीशिक्षायाः बिन्दुशः विश्लेषणं कर्तुं शक्यते । तद्यथा -

१. समावेशीशिक्षाप्रणाल्यां भारतीयसंविधानस्य सर्वेभ्यो समानतया शिक्षेति उद्देश्यस्य प्राप्तिर्भवति ।
२. प्रणाल्यामस्यां दिव्याङ्ग-विशिष्टादयः सामान्यच्छात्रैः सह शिक्षायाः समानावसरान् प्राप्नुवन्ति ।
३. एते छात्राः शैक्षिक-सामाजिक-शारीरिक-व्यावसायिक-कार्यक्रमेषु सामान्यच्छात्रैः सह भागं ग्रहीत्वा सर्वाङ्गीणविकासाय अवसरान् प्राप्नुवन्ति । अस्यां प्रणाल्यां समावेशीशिक्षायां सर्वेऽपि छात्राः समीपस्थविद्यालयेषु प्रवेशं प्राप्तुं योग्याः भवन्ति ।
४. सामान्यच्छात्राः दिव्याङ्गैस्सह संवेदनशीलाः भवन्ति तथैव दिव्याङ्गाः अपि सामान्यच्छात्रैः सह विद्यालयेषु सहभागिनो भूत्वा सामञ्जस्यं प्राप्नुवन्ति । इदञ्च सामञ्जस्यपूर्णकौशलं तान् समाजे उषितुं प्रेरणां प्रयच्छति ।
५. शिक्षकाः छात्राणां विभिन्नताम् आश्रित्य नूतनोपकरणानां शिक्षणपद्धतीनाञ्च प्रयोगं कुर्वन्ति येन सर्वेषामपि छात्राणाम् अधिगमस्तरो वर्धते ।

**निष्कर्षः -** अन्यथासमर्थानां बालानां कृते येषां शिक्षा नितान्तमावश्यकी । तेषाम् अन्यथा सक्षमबालानां मध्ये शैक्षिकसमर्थताम् आनयन्ति । अतः प्रत्येकं विद्यालये एतेषां शिक्षा नितान्तमावश्यकी तान् सर्वान् अपि पाठयितुं अवसरान् प्राप्स्यन्ति ।

## बुद्धेः स्वरूपं सिद्धान्तश्च

**स्मिताराणी मिश्र**

शिक्षाशास्त्रिप्रथमवर्षम्

संसारेऽस्मिन् नैके जीवाः निवसन्ति तेषु जीवेषु मानवः बुद्धिकारणाद् एव श्रेष्ठः इति मन्यते। बुद्धिरेव मानवान् पशुभ्यः पृथक्करोति । यदा कश्चन बालः स्वीयं पाठ्यविषयम् अन्येभ्यो शीघ्रमवगच्छति तदा सः बुद्धिमान् इति उच्यते । प्राचीनकालाद् बुद्धिशब्दः तत्परता, तात्कालिकता, समायोजनं, समाधानादि क्षमतानां सन्दर्भे प्रयुज्यते स्म। अत्र मानसिकयोग्यता एव बुद्धिः सा च असमानतासमानतयोः प्रमुखं कारणमिति।

का नाम बुद्धिः? अस्मिन् विषये मनोवैज्ञानिकानां सर्वदा मतभेदः दृश्यते । एतद्दूरीकरणाय प्रसिद्धमनोवैज्ञानिकाः सर्वदा प्रयतन्ते। प्रत्येकमपि मनोवैज्ञानिकस्य बुद्धेः स्वरूपादिविषयेषु भिन्नं भिन्नं मतम्। तेषु कानिचन प्रसिद्धान्यत्र प्रस्तूयन्ते -

१. वुडवर्थमहोदयानुसारं बुद्धिः कार्यकरणस्य एकः विधिरस्ति।

२. टरमैनमहोदयानुसारं बुद्धिः अमूर्तचिन्तनस्य योग्यता इति।

३. वुडरोमहोदयानुसारं बुद्धिः ज्ञानार्जनाय एका क्षमता।

बुद्धिसम्बद्धाः एताः परिभाषाः महत्त्वपूर्णाः भवन्ति यतः एते मनोवैज्ञानिकाः बुद्धिविषये कृतभूरिपरिश्रमाः । एतदतिरिच्यापि अन्येषां मनोवाज्ञानिकानाम् एका सामान्या परिभाषा सम्मुखे आयाति तत्र तु बुद्धिः अधिगमस्य योग्यता, अमूर्तचिन्तनस्य योग्यता, समस्यासमाधानस्य योग्यता, अनुभवात् लाभोत्पादनस्य योग्यतादि रूपेण विधीयते।

**बुद्धेः सिद्धान्ताः** - बुद्धेः सिद्धान्तविषये मतैक्यं न दृश्यते तथापि केचन प्रमुखाः अत्र प्रस्तूयन्ते -

**एकत्वसिद्धान्तः** - अस्य बुद्धिसिद्धान्तस्य प्रवर्तकेषु बिने-टर्मन-स्टर्नमहोदयाः प्रमुखाः । सिद्धान्तोऽयम् एकतन्त्रसिद्धान्तरूपेणापि प्रसिद्धः । एतदनुसारं बुद्धौ केवलमेकमेव तत्त्वं प्रभावी भवति । यच्च व्यक्तीनाम् अन्यास्वपि क्रियासु सहाय्यं करोति । अर्थात् सर्वेष्वपि क्षेत्रेषु बुद्धिः समग्रयोग्यतारूपेण भवतीति। अयं प्रथमो सिद्धान्तः भवति तथापि अधुना सर्वेषामत्र अङ्गीकारो न भवति।

**द्वित्वसिद्धान्तः -** अस्य सिद्धान्तस्य प्रवर्तकः स्पियरमैनमहोदयः भवति। अस्य सिद्धान्तस्यानुसारं बुद्धौ तत्त्वद्वयं भवति सामान्यतत्त्वं विशिष्टतत्त्वञ्च। यत्र सामान्यतत्त्वं शिक्षणप्रशिक्षणेन न आयाति अपि तु मानवेषु सामान्यतया भवति। एतच्च केषुचिद् अधिकतया भवति केषुचिच्च अल्पतया। अत्र तु वंशानुक्रमः प्रभावी कारकत्वेन भवति इति । एवमेव द्वितीयतत्त्वस्य सम्बन्धः व्यक्तेः

विशिष्टकार्येण सह भवति । अस्याः विशिष्टयोग्यतायाः आर्जनं क्रियते । इमाः विशिष्टयोग्यताः समग्रबुद्धेः पञ्चाशत्प्रतिशतमेव भवन्ति ।

**बहुत्वसिद्धान्तः -** अस्य प्रवर्तकः थार्नडाइकमहोदयः अस्ति । अस्य मतानुसारं बुद्धौ नैकानि तत्त्वानि भवन्ति । केषुचिद् कार्येषु मानसिकक्रियाः इमाः मिलित्वा कार्यं कुर्वन्ति । यथा अनेकाभिः इष्टिकाभिः कस्यचिद् भवनस्य निर्माणं क्रियते तत्र तु प्रत्येकमपि इष्टिका कारकरूपा अर्थात् प्रत्येकमपि इष्टिकायाः अत्र स्वतन्त्रं योगदानं तथैव बुद्धेरपि, अर्थात् अनेकाभिः लघुमानसिकयोग्यताभिः कार्यं करोति बुद्धिः ।

**समूहतत्वसिद्धान्तः -** अस्य मतस्य प्रतिपादनं थर्स्टर्न महोदयेन कृतम् । यानि तत्त्वानि मानसिकयोग्यतासु तु नैव वर्तन्ते परं विविधासु क्रियासु समाविशन्ति तान्येव समूहतत्त्वानीति नाम्ना प्रसिद्धानि । तस्य मतानुसारं बुद्धिः अष्टभिः तत्वैः निर्मिता यथा प्रक्षेपणयोग्यता, अंकयोग्यता, शाब्दिकयोग्यता, वाक्शक्तिः, स्मरणशक्तिः, आगमनतर्कः, निगमनतर्कः, पर्यवेक्षणशक्तिः चेति ।

**निष्कर्षः -** बुद्धेः सिद्धान्तेषु जॉल्सनमहोदयस्य सिद्धान्तोऽपि प्रचलितो वर्तते । तस्य मतानुसारं यत् बुद्धौ प्रगतेर्कारणं वंशानुगतो भवति । तेन गौरवर्णानां बालानां बुद्धिः श्यामवर्णीयानामपेक्षया तीव्रा भवति इति प्रतिपादितम् । एवम्प्रकारेण मनोवैज्ञानिकाः बुद्धिविषये नैकेषां सिद्धान्तानां विषये प्रतिपादितवन्तः । वस्तुतः सर्वेषामपि सिद्धान्तानां गुणाः दोषाश्च विद्यन्ते परन्तु बुद्धिसिद्धान्तविषये किमपि निश्चितरूपेण वक्तुं न शक्यते । अतः मानवं दृष्ट्वा अस्य समीपे बुद्धिः अस्ति इति अनुक्त्वा एषः बुद्धिमान इति कथनीयम् ।

**सन्दर्भग्रन्थसूची -** शिक्षायाः मनोवैज्ञानिकाधाराः , डॉ बि .पद्ममित्रश्रीनिवासः ।
आधुनिकं शिक्षामनोविज्ञानम्, डा. लोकमान्यमिश्रः ।
अधिगमकर्ता का विकास एवं शिक्षण - अधिगमप्रक्रिया, एस. के. मङ्गल ।

## महर्षि अरविन्दस्य योगशिक्षादर्शनम्

**मनीष् कुमार् तिवारी**

शिक्षाशास्त्रिप्रथमवर्षम्

भारते काले काले धर्मस्य संस्कृतेश्च मानवतायाः विभूतयः अवतरिताः अभवन् यैः भारतस्य प्रतिष्ठा आविश्वे प्रतिष्ठापिता। एतेषु अन्यतमः महर्षिः अरविन्दः। एकविंशशताब्द्याः अन्ते भारतीयशिक्षा स्वस्य निम्नस्थितिं प्राप्तवती आसीत्। अनेन तदा तत्कालीनायाः संस्कृतेः उद्धरणार्थं कार्यं कृतं सो भवति श्रीअरविन्दः । एषः स्वधार्मिक-राजनैतिक-सामाजिक-दार्शनिक-शैक्षिकविचारेभ्यो च भारतीयान् तेषां न्यूनतायाः अवगमनाय विकासपथे अग्रेकरणस्य प्रयासं कृतवान्।

अरविन्दस्य विद्याभ्यासकाले एतस्य प्रतिभा विलक्षणा इति सर्वे ज्ञातवन्तः। विद्यायां तस्य प्रतिभां दृष्ट्वा एव शिक्षकाः तस्मिन् अधिकं स्निह्यन्ति स्म। अरविन्दः अपि साधुस्वभावः सदा चिन्तनमग्नः इव दृश्यते स्म। सप्तदशे वर्षे सेंटपॉलविद्यालयद्वारा किंग्सकॉलेजछात्रवृत्तिं प्राप्तवान् तथा कैम्ब्रिजविश्वविद्यालये अयं प्रविष्टः । तत्रत्यः प्रख्यातविद्वान् ब्रौनिंगमहोदयः अरविन्दस्य प्रतिभां ज्ञात्वा प्रोत्साहनं दत्तवान् । विवधभाषाणाम् अध्ययनेन सह अरविन्दः यूरोप्देशस्य इतिहासमपि पठितवान्। चतुर्दशवर्षीयः एव हेक्यूबादीनि काव्यानि लिखित्वा असामान्यां प्रतिभाम् आविष्कृतवान् । अरविन्दः स्वस्य योगसाधनस्य फलानि प्रकाशयितुम् अन्यानपि ग्रन्थान् योगसाधननिमित्तम् अरचयत् । एतेषु दिव्यजीवनम् इति ग्रन्थः प्रमुखो वर्तते । तथैव भिन्नयोगप्रकाशनादि अन्यानपि ग्रन्थान् रचितवान्। एतस्य सम्पूर्णं साहित्यम् इदानीं साहित्यरूपेण प्राप्तुं शक्यते।

एवमेव अरविन्दमहर्षिणा अस्योपरि विशिष्टाः ग्रन्थाः रचिताः । सर्वेष्वपि तस्य महान् सिद्धान्तः पूर्णयोगः उत समन्वययोगः इति प्रसिद्धः। अरविन्दमहर्षेः पूर्णयोगः जीवनस्य परिपूर्णतायै राजमार्गः । प्राचीनमहर्षिभिः प्रोक्तानां भारते अन्यत्र च सहस्रशः वर्षेभ्यः अनुष्ठितानां तथानुष्ठीयमानानाम् अनेकेषां योगप्रकाराणां निश्चितपरिशीलनं कृतवान्। न केवलं ग्रन्थानामध्ययनं अपि तु स्वीयकृतसाधनया अनेन पूर्णयोगप्रक्रिया आरब्धा। अयञ्च पूर्णयोगः मानवानां शारीरिक-मानसिक-आध्यात्मिकतत्त्वानि च लक्ष्यीकृत्य पूर्णतां प्रति याति।

समाधिस्थजनैः पूर्णयोगस्य अभ्यासः न करणीयः। पूर्णयोगस्यानुष्ठानेन क्वचिद् सहजतया समाधिस्थितिः भवति चेत् भूषणम् इति अरविन्दस्य साहित्यस्य परिशीलनेन ज्ञायते। एतादृशः पूर्णयोगः अरविन्देन मानवजातिहिताय दर्शितः । निश्चयेन वक्तुं शक्यं यत् यावत्कालपर्यन्तं

साधकत्वं भविष्यति तावत्कालपर्यन्तं पूर्णयोगः स्मरिष्यते एव । एतदर्थं महायोगिनः अरविन्दस्य प्रभावः विश्वे सर्वत्र दृश्यते । लक्षशः जनाः अरविन्दस्य साहित्यं पठन्ति तस्य योगमार्गमनुसृत्य जीवनं यापयन्ति । बहूनां जीवनं परिवर्तितम् । अतः तादृशः योगी भारतमातुः प्रियपुत्रेषु अग्रगण्यः इति कथनं सर्वदा समुचितमेव ।

**उपसंहारः -** अरविन्दस्य पूर्णजीवनं योगप्रस्थानम् एव । केवलं एकत्र वासं कुर्वन् मौनम् आश्रित्य योगसाधनं केचन कुर्वन्ति । अरविन्दस्तु योगप्रवृत्तिपटुः यतोहि स्वदेशस्य स्वराज्यस्य संस्कृतिं वैश्विकपटले स्थापितवान् । पूर्णजीवनं योगसाधनायां यापयित्वा योगरहस्यानि साक्षीकृतवान् । जीवनस्य माधुर्यं, प्रेमभावं, निःस्वार्थसेवायां परोपकारे च भवति इति दर्शितमनेन । अन्ते च अयं महायोगी 1950 तमे वर्षे दिसम्बरमासे पञ्चमदिनाङ्के भौतिकं शरीरं त्यक्त्वा समाधिमग्नः अभवत् ।

**सन्दर्भग्रन्थाः -**

१. पाण्डेय रामशकल, उदीयमान भारतीय समाज में शिक्षा ।
२. सिंह शिव बहादुर, श्री अरविन्द का शिक्षादर्शन ।
३. देवराज नन्दकिशोर, भारतीय दर्शन ।
४. भार्गव महेश एवं सिंह मधुरिमा, शैक्षिकदर्शन एवं विचारक ।

## सङ्गणकाधारितशिक्षा (Computer Based Education )

**मामालि राउत**

शिक्षाशास्त्रिप्रथमवर्षम्

सम्प्रति समाजस्य निर्माणे विज्ञानस्य प्रविधेश्च महत्त्वपूर्णा भूमिका वर्तते । सामाजिकजीवनेऽपि प्रतिक्षेत्रं सार्थक्यं प्राप्तुं विज्ञानस्य प्रविधेश्च सिद्धान्तान् परिणामाञ्च क्रियान्वयनं कर्तुं मानवाः प्रयतमानाः सन्ति । आधुनिके कालेऽस्मिन् यान्त्रिकयुगस्य प्रभावः अवलोक्यते । यान्त्रिकक्षेत्रे सङ्गणकस्य विशिष्टा भूमिका भवति, येन शिक्षाजगत्यपि अस्य आवश्यकता अनुभूता शिक्षाविशेषज्ञैः । भाविसंसारस्य स्वरूपं निर्मातुं एतदेकं शक्तिशाली विद्युत्यन्त्रम् । पञ्चत्रिंशत् वर्षेभ्यो पूर्वं विद्यालयेषु विश्वविद्यालयेष्वपि सङ्गणकं नासीत् ।

गणकानामप्युपयोगः अत्यन्तं सीमितमेव । यान्त्रिकयन्त्राणां (Mechanical Calculator) उपयोगः विश्वविद्यालयेषु स्नातकोत्तरकक्षासु केवलं क्रियमाणः आसीत् न तु अन्यत्र। अधुना तु गेहे गेहे सङ्गणकयन्त्रं विद्यते । मार्गे मार्गे सङ्गणकप्रशिक्षणकेन्द्राण्यपि दृश्यन्ते । प्राथमिकविद्यालयानामपेक्षया सङ्गणकयन्त्राणि इतस्ततः अधिकानि सञ्जातानि। अनेनैव अस्य यन्त्रस्य भारोऽपि निगदितुं शक्यम्।

**सङ्गणकस्य विकासः -** 1940 तमवर्षादनन्तरम् अद्यावधि सङ्गणकस्य विकासस्य प्रक्रिया निरन्तरं चलन्ती अस्ति। विद्युच्छक्तेः विकासेन सङ्गणकस्य विकासे महद्योगदानं समभवत् । सङ्गणकं येषु सिद्धान्तेषु कार्यं करोति, तत् अष्टादशशताब्द्याम् एकेन आङ्ग्लगणितज्ञेन चार्ल्स बाबेज्महाभागेन अवगतमासीत्। तदनन्तरं 1940 तमे वर्षे एकः अन्यः आङ्ग्लगणितज्ञः एल्. एन्. ट्रिगमहाभागः एतस्य प्रक्रियां निश्चिनोत् । ततः परमेव अमेरिकावास्तव्यः वैज्ञानिकः पीटर अतनासोफमहोदयेन सङ्गणकस्य विद्युत्सम्बन्धसिद्धान्ताः आविष्कृताः । अतो स एव सङ्गणकजनकः इति प्रसिद्धः । सूक्ष्मविधायकानां (मैक्रो प्रोसेसर) सङ्कलितमण्डलानां (इन्टिग्रेट्रेड सर्किट्स) च उपयोगेन आधुनिकसङ्गणकं 1972 तमे वर्षे निर्मितम्।

**सङ्गणकस्यार्थः** - एतत्तादृशमेकं यन्त्रं यत् मस्तिष्कस्य सर्वविधकार्यं कर्तुमर्हति । तादृशशुद्धतीव्रञ्च यन्त्रमेतत् याः सूचनाः प्रदत्तांशान् च विश्लिष्य शुद्धपरिमाणं प्रयच्छति । लैटिनभाषातः अस्य व्युत्पत्त्यनुसारं गणनयन्त्रमेतद् । अस्य अक्षरशः व्याख्यानमिदं भवितुमर्हति तद्यथा C = गणना (केल्क्युलेट), O = सञ्चालनम् (आपरेट), M = स्मृतिः (मेमरी), P = मुद्रणम् (प्रिंट), U = अद्यतनम् (अपडेट), T = सारणीनम् (टेबुलेशन), E = सम्पादनम् (एडिट), R = अनुक्रिया (रेस्पान्स्)।

**सङ्गणकमाध्यमेन शिक्षणम् -** आरम्भकाले सङ्गणकानि केवलं गणनार्थं मन्यन्ते स्म। किन्तु अनन्तरमनुभूतं यत् गणनायाः अपेक्षया अधिकं कार्यमपि अनेन साधयितुं शक्यमिति । अनेन जटिलाः समस्याः अपि समाधेयाः इत्यतः प्रत्येकं क्षेत्रे अस्योपयोगः आरब्धः अस्ति । अस्य शैक्षणिक उपादेयता निम्नवत् शक्यते - सङ्गणकद्वारा शिक्षाप्रदानेन सर्वे छात्राः युगपत् उपविशन्ति।

१. प्रत्येकं छात्रस्य साक्षात्सम्बन्धः सङ्गणकेन सह भूते सति आधुनिकविषयेषु तेषामधिकारसम्पादनं भवति।

२. अनेन ज्ञातविषयः दृढो जायते, यतः विविधप्रकारक विषयस्य उपस्थापनमनेन शक्यम्।
३. अधीतज्ञानस्य प्रसारं कर्तुमिदं महदुपयोगकारकं भवति, यतः स्वस्यज्ञानस्य प्रसारं क्षेत्रं च स्थापननिर्धारणादिसन्दर्भेषु कर्ता स्वतन्त्रो भवति तथैव उपयोक्तारः अपि।
४. केचन छात्राः अनेन स्वीकृतसाहाय्येन पठनेन सहैव धनमपि आर्जयन्ति, अतः परिस्थितिनिकषिस्थितेभ्यो (चैलेन्ज्ड अथवा निर्धनतायुक्ताः) अपि अवसरं कल्पयति।

**सन्दर्भग्रन्थः -** मिश्रः रमाकान्तः, शैक्षिकप्रविधिः।

## महात्मागान्धिमहोदयस्य शैक्षिकविचारः

**लिस्ना सि. जेम्स.**

शिक्षाशास्त्रिप्रथमवर्षम्

मानवस्य सर्वाङ्गीणविकासाय एव शिक्षा दीयते। शिक्षाप्रदानेन न केवलं बुद्धेः विकासः अपि तु व्यक्तेः सर्वविधविकास एव शिक्षेति। पुराकालेऽपि व्यक्तेः सम्पूर्णविकासमुपलक्ष्य शिक्षा दीयते स्म। यां शिक्षां वयं आर्जयामः सा शिक्षा न तु केवला व्यक्तेः उन्नयनाय अपि तु सम्पूर्णसमाजस्य सुराष्ट्रस्य च निर्माणाय भवति। व्यक्तित्वनिर्माणे अपि शिक्षायाः महद्योगदानमस्ति। उत्तमरीत्या शिक्षार्जनेन उत्तमनागरिकाः भवन्ति। कारणं तु व्यक्तेः निर्माणमेव शिक्षा, तर्हि समाजस्य निर्माणमपि सम्भवति। डॉ. सर्वेपल्लि राधाकृष्णन् महोदयेनोक्तं यत् शिक्षा नाम व्यक्तेः समाजस्य च निर्मात्री स्यात्। व्यक्तेः निर्माणेन समाजस्यापि निर्माणं भवति। दार्शनिकाः अपि वदन्ति शिक्षायाः प्रधानमुद्देश्यमस्ति व्यक्तौ आत्मत्वसम्पादनमिति। शिक्षायाः उद्देश्यं तु न केवलं कर्मकुशलता एवं विश्वस्य ऐक्यभावना अपि तु शिक्षा व्यक्तेः आत्मनि सुराष्ट्रनिर्माणाय उपकरोति इति डॉ सर्वेपल्लि राधाकृष्णन् महोदयेनोक्तम्।

महात्मागान्धिमहोदयस्य दृष्ट्या शिक्षा नाम बालके मनुष्ये च शारीरिक-मानसिक-आध्यात्मिकशक्तीनाम् उत्तमोत्तमसर्वाङ्गीणविकास एव शिक्षा। गान्धिमहोदयेन हरिजन् इति पत्रे लिखितं यत् शिक्षा इति पदेन मम अभिप्रायः बालकस्य क्षमतानां सर्वोत्तमविकासः। अर्थात् शारीरिक-मानसिक-आध्यात्मिकविकासः एव शिक्षा। हस्तकला माध्यमेन नूतनशिक्षा अपि पठनीया। महात्मागान्धिमहोदयस्य चिन्तनम् एवमासीत् छात्राः विद्यालयीयशिक्षया सह एकां हस्तकलामपि पठेयुः, तेन छात्राणां कौशलवर्धनम् एवं धनार्जनशीलता अपि भवति। स्वपरिश्रमेण धनमार्जयितुं सक्षमाः अपि भवन्ति। महोदयेन उक्तमस्ति यत् भारतस्य इदानीन्तनसमस्या धनाभावः

नास्ति अपि तु परिश्रमस्याभावः अत्र वर्तते। भारते परिश्रमेण यः धनार्जनं करोति सः समाजे श्रेष्ठः भवति। पुरोहितवर्गः शारीरिकश्रमं न करोति तथापि सः समाजे उन्नतस्तरे विराजमानो भवति। एतदेव एतस्य अवनतेः कारणमस्ति। अतः बाल्यादेव छात्राः अध्ययनस्य महत्त्वं, श्रेष्ठतां च ज्ञातुं हस्तकलां पठेयुः । अक्टोबरमासस्य 22-23 दिनाङ्कयोः 1973 तमे वर्षे अखिलभारतीयराष्ट्रियशिक्षासम्मेलने विद्यालयशिक्षया सह हस्तकलानामपि प्राधान्यं भवेत् इति प्रतिपादितम्।

**उपसंहारः -** आधुनिककाले शिक्षा अत्यावश्की एव। शिक्षां विना अस्मिन् लोके किमपि साधयितुं न शक्यते। अतः बाल्यादेव शिक्षा अवश्यं प्रदेया। तया शिक्षया बालकस्य समाजस्य च उन्नतिः भविष्यति। सा शिक्षा आधुनिककाले हस्तकलामाध्यमेनापि दातव्या। अनेन छात्राणां बुद्धेः कलायाः च विकासः अपि भविष्यति। छात्रेषु न केवलं पाठ्यविषयेषु अपि तु पाठेतरविषयेष्वपि रुचिः भवेत् । अतः महात्मागान्धिमहोदयेन उक्तं यत् छात्रेभ्यो विद्यालयशिक्षया सह हस्तकलाशिक्षा अपि पाठनीया इति। अतः इदानीं विद्यालयेषु हस्तकला अपि पाठ्यते। एवमनेन स्वपरिश्रमेण धनमार्जयितुं छात्राः सक्षमाः भवन्ति।

**सन्दर्भग्रन्थाः -** अग्रवालः बी. बी., आधुनिक भारतीय शिक्षा और समस्याएँ।

## पर्यावरण शिक्षा

**विनोदिनी नायकः**

शिक्षाशास्त्रिप्रथमवर्षम्

परि+आवरणम् इत्यनयोः शब्दयोः मेलनेन पर्यावरणमिति शब्दः निष्पन्नः यस्य शाब्दिकः अर्थः बहिः आवरणम् । अर्थात् अस्मान् परितः यानि प्राकृतिक-भौतिक-सामाजिक-आवरणानि सन्ति तानि सर्वाणि पर्यावरणम् इत्युच्यते। आङ्ग्लभाषायां Environment इति शब्दस्य उत्पत्तिः Environ + Ment इत्यनयोः शब्दयोः अर्थो भवति आवरणं चतुर्पाश्वात् । डॉ. वसुन्धरा रिहानीमहोदयया पर्यावरणम् इत्यस्य व्याख्यां कृत्वा उक्तमस्ति यत् पर्यावरणम् इति शब्दः परि आङ् उपसर्गपूर्वकं वरणार्थे वृङ् वुञ् च धातुभ्यां ल्युट् प्रत्ययो कृते सति निष्पन्नः अभवत् यस्यार्थः सर्वेभ्यो सर्वत्र आच्छादनकरणमिति।

प्रथमतः निकल्सनमहोदयेन जून् मासस्य 22 तमे दिनाङ्के 1972 तमे वर्षे फिनलैण्डदेशे सम्पन्नं पर्यावरणीय-अन्ताराष्ट्रियसम्मेलने (International Conference Environment

Future) स्वीये शोधपत्रे पर्यावरणशिक्षायाः आधारः प्रस्तुतः । पत्रानुसारेण तथ्यानां ज्ञानम् अभिवृत्तिषु परिवर्तनम् एवमाधारेण भवितुमर्हति । अस्य व्याख्यासन्दर्भे वक्तुं शक्यते यत् प्रप्रथमं तथ्यानां ज्ञानमावश्यकं परं च समस्यानां समाधानाय जनानाम् अभिवृत्तिषु परिवर्तनस्य आनयनं येन जनाः अनुसन्धानाय प्रवृत्ताः भवेयुः ।

पर्यावरणशिक्षा सा शिक्षा अस्ति यया विश्वसमुदायः पर्यावरणीयसमस्यामवगत्य समाधानम् अन्विषेयुः तथा च भविष्ये आगम्यमानाः समस्याः अवगच्छेयुः । वस्तुतः शिक्षा इयम् औपचारिकी नासीत् तथापि व्यवहारे आसीदेव । पर्यावरणसम्बद्धसंगोष्ठ्यां फिनिस् राष्ट्रियायोगेन यूनेस्कोसंस्थायै परिभाषेयं प्रस्तुता यत् पर्यावरणशिक्षा पर्यावरणस्य सुरक्षायै उद्देश्यानां प्राप्तये च साधनमिति ।

1899 तमे वर्षे आङ्ग्लदेशस्य इडनवर्गे पौट्रिकगार्डमहोदयः The outlook tower नामिकामेकां संस्थां स्थापितवान् । अस्याः संस्थायाः मुख्योद्देश्यमासीत् पर्यावरणशिक्षायां गुणवत्तासंवर्धनम् । एवमेव रूसोमहोदयस्य प्रकृति की ओर लौटो इति सिद्धान्तस्यापि तात्पर्यं भवति यत् प्रकृतिरेका अध्यापिका भवति, प्रकृत्या एव सर्वं शिक्ष्यते, अतः प्रकृतेः संरक्षणं कर्तव्यम्। अथ च जॉर्जपिकिनमार्समहोदयः स्वपुस्तके Man and Nature इत्यस्मिन् व्याख्यायति यत् मानवाः कथं स्वाभाविक्या क्रियया एव प्रकृतिः नश्यति । अस्य पुस्तकस्य प्रकाशनादनन्तरं संयुक्तराष्ट्र-अमेरिकायाः राष्ट्रपतिः रूजवेल्ट्महोदयः राज्यपालानां सम्मेलनमाहूय निर्दिष्टवन्तः यत् प्रकृतिसंरक्षणार्थं प्रयत्नः करणीयः । फलतः अद्यापि सः प्रकृतिसंरक्षणनियमः प्रचलति । प्रथमतः तत्रैव किन्लेविश्वविद्यालये 1965 तमे वर्षे पर्यावरणशिक्षा पाठ्यक्रमस्य अङ्गरूपेण स्वीकृता ।

संयुक्तराष्ट्रसंघेन स्वीडन्देशे स्टॉकहोमनगरे 1972 तमे वर्षे मानवपर्यावरणस्योपरि सम्मेलनमायोजितम् । अस्मिन् सम्मेलने शताधिकदेशानां प्रतिनिधयः भागं गृहीत्वा 26 सूत्रीयं महाधिकारपत्रं समुद्घोषितवन्तः ।

भारते वैदिककालात् पर्यावरणस्य संचेतना वर्तते । अथर्ववेदे सामवेदे च पर्यावरणस्य सम्बद्धाः मन्त्राः वर्तन्ते । यथा - यजुर्वेदे 19.43 मध्ये - **‘उभाभ्यां देव सवितुः पवित्रेण सेवनं च, मां पुनीति विश्वतः’ ।** अर्थात् सूर्यः स्वीयकिरणैः जलं तथा वृष्टिः अनयोः माध्यमेन सर्वत्र पवित्रतां प्रददाति । एवं च सूर्यस्य तापः प्रकाशः च सूक्ष्मकृमीः नश्यति । अतः वेदे सूर्यः देवता इति मन्यते । पुनः जगतः आत्मा भारतस्य संस्कृतौ जलस्य महत्त्वं दीयते । अतः जलस्य प्रमुखस्रोतः वरुणो पूजनीयः भवति । एवमेव सर्वाः नद्यः मातरः मन्यन्ते ।

**सन्दर्भाः -** पर्यावरणशिक्षा, उमासिंहः, संस्करणम् 2008 ।

डॉ. मदनमोहन झा, पर्यावरणस्य अर्थः ।

## साम्प्रतिकयुगे संस्कृतशिक्षणस्य महत्त्वम्

**सुश्रीस्मिता खुण्टिआ**
शिक्षाशास्त्रिप्रथमवर्षम्

समय एव करोति बलाबलम् अर्थात् समयानुकूलम् इदं जगत् परिवर्तनशीलम् । प्राचीनकाले एका एव भाषा आसीत् संस्कृतभाषा । यतोहि संस्कृतिप्रधानः अयं भारतदेशः । उक्तमपि भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा । पूर्वे अस्मिन् भारतवर्षे आर्याः वसन्ति स्म, तेषां संस्कृतिः आद्या वैदिकी च आसीत् । सर्वे जनाः संस्कृभाषायां वार्तालापम् अकुर्वन् । रामायणकालेऽपि संस्कृतभाषायाः प्राधान्यमासीत् । भगवतः रामचन्द्रस्य प्रेयान् सेवकः हनुमान् यदा सीतादेव्याः सन्धानार्थं लङ्कापुरीम् अगच्छत् तदा सीतादेवीं दृष्ट्वा सः अचिन्तयत् यत् सीतायै सन्देशः कस्यां भाषायां देयम् इति । तद्यथा रामायणे अस्ति -

**'यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृतम् ।**
**रावणं मन्यमाना मां सीता भीता भविष्यति ।।**

अनेन श्लोकेन सिध्यति यत् लङ्कापतिः रावणः वेदवेदाङ्गसंस्कृतज्ञः च आसीत् । परन्तु अयं भारतदेशः परिवर्तनशीलसंसारवत् खण्डविखण्डितो सञ्जातः । नवविंशतिः राज्यानि एवञ्च सप्तकेन्द्रशासिताञ्चलानि प्रदेशानि नूतनभारतस्य गाथां गीयन्ति । देशे वैदेशिकानाम् आगमनं जातं फलतो देशस्य संस्कृतेश्च वैपुल्यं समजायत । तथैव संस्कृभाषायाः अपि । तत्कारणेन इदानीम् आङ्ग्लभाषायाः प्रचुरो प्रचारः सञ्जातः । तदनुगुणं संस्कृतशिक्षामुपेक्ष्य सर्वत्र आङ्ग्लपद्धत्या शिक्षां प्रदातुं विद्यालय-महाविद्यालय-विश्वविद्यालयाश्च स्थापिताः । अतः राजकीयसेवालोभेन अधिकांशभारतीयजनैः आङ्ग्लाध्ययनम् आरब्धम् ।

**वर्तमाने संस्कृतशिक्षणस्य महत्त्वम् -** अस्याः संस्कृतभाषायाः विशेषणपदानि सन्ति सरला, मधुरा, गीर्वाणी, देववाणी, परिष्कृता, गभीरा इत्यादयः । अतः अस्याः भाषायाः शिक्षणमावश्यकं वर्तते । यदि संस्कृतशिक्षणं कुतः आगतः इति चिन्तयामश्चेत् ज्ञायते प्राचीनकालादेव इति । किमर्थमिति चेत् संस्कृतस्य शिक्षणं प्रशिक्षणञ्च पुराकालादेव जटाघनादिपाठेषु आसीदेव तद्यथा -

**'यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ।**
**तावत् संस्कृतशिक्षणं जगति प्रचलिष्यति ।।**

इयं संस्कृतभाषा हिमालयपर्वतात् विन्ध्याचलपर्वतपर्यन्तं विचारविनिमयस्य भाषा आसीत् । यदि सम्प्रति अस्याः भाषायाः महत्त्वं किम् अस्ति ? किमर्थम् अस्याध्ययनम् ? इति पश्यामश्चेद् कतिपय विचाराः मानसपटले आयान्ति । तद्यथा -

१. वसुधैव कुटुम्बकम् इति भावनां जागरयितुम्।
२. भारतीयभाषाणां संरक्षणार्थम् । तथा च शैक्षिकविकासाय भाषासाहित्यव्याकरणादीनां संरक्षणार्थम्।
३. मानवानां चरित्रनिर्माणार्थम् एवञ्च मानसिकविकासार्थम्। अनेन आनन्दानुभूतिः रसानुभूतिः आध्यात्मिकोत्कर्षञ्च जनयितुं संस्कृतशिक्षणम् आवश्यकम्।

सारः - अस्मिन् संस्कृतशास्त्रे ज्ञानं, विज्ञानं, दर्शनं, समाजशास्त्रं, गणितशास्त्रं, चिकित्साशास्त्रं, ज्योतिषं, राजनीतिशास्त्रं चेत्यादयः विद्यमानास्सन्ति । संस्कृतभाषायां विरचितैश्श्लोकैर्धुना जनाः प्रेरितास्सन्ति। अतः संस्कृतभाषा मानवानां चित्तं प्रगतिपथि सत्पथि च नेतुं समर्था वर्तते। न केवलं भारते अपि तु आविश्वे संस्कृतं प्रति श्रद्धाभावं प्रकटयन्त्यधुना समेपि राष्ट्राः। कारणं तु संस्कृतस्य यत्र विश्वं भवत्यैकनीडम् ईदृशी भावना सर्वानपि रञ्जयति विश्वसिति च समस्तलोकाः सुखिनो भवन्तु इति नैतिकतां प्रसारयितुं संस्कृतभाषा समर्था नान्यत्।

**सन्दर्भग्रन्थाः -**

१. शर्मा प्रो. च .ल .ना- . सिंहः फतेहश्च, संस्कृतशिक्षणं नवीनप्रविधयश्च।
२. झा उदयशंकरः, संस्कृतशिक्षणम्।
३. पाढी प्रमोदकुमारः, संस्कृतप्रबन्धशतकम्।

## शिक्षायाम् अनुशासनस्य आवश्यकता

**स्मृतिमञ्जरी राउत**
शिक्षाशास्त्रिप्रथमवर्षम्

शिष्टजनैः निर्मिता या जीवनशैली तस्याः अनुकरणमेव अनुशासनम् । अनुशासनं नाम शास्यते अनेन इति शासनम्। अनु उपसर्गपूर्वकं शास्-अनुशिष्टौ धातौ तस्मात् करणे ल्युट् प्रत्यये सति अनुशासनम् इतु रूपं सिद्धं भवति। सर्वेष्वपि क्षेत्रेषु अनुशासनस्य अतीवावश्यकता भवति। यदि मानवजीवने अनुशासनं न स्यात् तर्हि समग्रमपि जीवनं पशुवत् भावहीनो धर्मभ्रष्टश्च स्यात्। आङ्ग्लभाषायाम् अनुशासनाय Discipline इति शब्दः उपयुज्यते यस्यार्थो भवति अभ्यासः, नियमः, शिक्षा, व्यवस्था, अध्यापनं वा। मित्ररूपेणापि अस्य शब्दस्य उत्पत्तिरङ्गीक्रियते। लाटिन् भाषायां यस्यार्थो भवति गुरुः शिष्यसकाशात् आकाङ्क्षते यच्छिष्याः श्रद्धापूर्वकम् आदेशान्

पालयेयुः तथा च स्वजीवने आवश्यकवाञ्छितगुणानां विकासं कुर्युः । एवम्प्रकारेण डिसिप्लेन् इति शब्दस्य अर्थो भवति आचारेषु नियमितता सम्पादनमिति ।

तदेव टी. पी. नन् महोदयानुसारम् अनुशासनं नाम स्वभावनां शक्तीनाञ्च नियन्त्रणं वर्तते येन व्यवस्थायाः व्यवस्थितता परिदृश्यते । 'Discipline Consists in the submission of one's impulses and power to regulation which imposes from upon chaos' । एवञ्च प्राचीनकालादारभ्य भारते अनुशासनाय अतीवं महत्त्वं प्रदत्तं वर्तते । तत्र पुराणेषु श्लोकः अस्ति -

**लालयेत् पञ्चवर्षाणि दशवर्षाणि ताडयेत् ।**
**प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत् ।।**

एवं प्रकारेण गुरुकुलेऽपि आचार्याः छात्रान् अनुशासनविषये बहूपदेशान् ददाति स्म । तत्र यथा सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमदः, मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव इत्यादयः । परञ्च गच्छता कालेन परिवर्तनानि जातानि तानि अनुशासनमपि प्रभावितवन्तः इत्यतः विवधदार्शनिकवादेषु अनुशासनमपि भिन्नभिन्नरीत्या प्रतिस्थापितं वर्तते । तद्यथा आदर्शवाद्यनुशासनं, प्रकृतिवाद्यनुशासनं, व्यवहारवाद्यनुशासनं, यथार्थवाद्यनुशासनञ्च । एवं रूपेण हि आधुनिकेषु विद्यालयेषु अनुशासनस्य विवधप्रकाराः दृश्यन्ते । यथा दमनात्मकानुशासनं, प्रभावात्मकानुशासनं, मुक्त्यात्मकमनुशासनञ्च ।

अनेन ज्ञायते यत् अनुशासनस्य मुख्योद्देश्यं भवति आत्मनियन्त्रणस्य क्षमतायाः विकाससम्पादनम् । व्यवहारसम्बद्धसमस्यानाञ्च निवारणम् । प्रजातान्त्रिकाभिवृत्तेः विकासस्य सम्पादनम् । एवं रूपेण तत्र मुख्यं भवति छात्राणां सदाचारसम्पादनं येन अस्वाभाविकप्रवृत्तिषु शक्तिषु च नियन्त्रणम् ।

**निष्कर्षः -** अनुशासनं नाम मानवजीवने ये दोषाः दृश्यन्ते तान् वीक्ष्य तेषां निवारणं येनोपायेन जायते तन्नाम अनुशासनमिति । एवमेव शिक्षायां सर्वाङ्गीणविकासाय तथा सर्वविधलक्ष्यसिध्यर्थमपि अनुशासनस्य महती आवश्यकता वर्तते । एवञ्च शिक्षानुशानं नाम शिक्षारूपिणि वृक्षे यावदनुशासनस्य सेवनं भवति तावद् फलं कल्प्यते । अतः सर्वत्र शिक्षानुशासनस्यावश्यकता दृश्यते एव ।

## गणतन्त्रक्षेत्रे मनोवैज्ञानिकनिरीक्षणम्

**रङ्कनिधि कन्दपान**
शिक्षाशास्त्रिप्रथमवर्षम्

मनोविज्ञानशास्त्रं पुरातनं शास्त्रं विद्यते। इदं शास्त्रमादौ दर्शनशास्त्रेण सम्बद्धमासीत्। आरम्भे आत्मविज्ञानं, चैतन्यविज्ञानं, मस्तिष्कविज्ञानञ्चेति रूपेण स्वीकृतमिदं शास्त्रं कालान्तरे व्यवहारविज्ञानमिति पदे प्रतिष्ठितमभवत्।

**मनोविज्ञानं नाम किम्?** - मनोविज्ञानं नाम जीवस्य विविधासु परिस्थितिषु व्यवहारस्याध्ययनं यः करोति तत् मनोविज्ञानम्।

**मनोवैज्ञानिकनिरीक्षणपद्धतेः प्रकाराः** - मनोविज्ञाने चतस्रः निरीक्षणपद्धतयः सन्ति। यथा - स्थूलतया योजनाधारितापद्धतिः, निरीक्षणभूमिकाधारितापद्धतिः इति। १.औपचारिकनिरीक्षणम्, २.सहभागिनिरीक्षणम्, ३.अनौपचारिकनिरीक्षणम्, ४.असहभागिनिरीक्षणम् ।

**गणतन्त्रम् :-** गणतन्त्रं नाम लोकतन्त्रं वा प्रजातन्त्रम्। लोकानां वा प्रजानां शासनम्। लोकः - मानवाः तथा तन्त्रं नाम शासनम्, गणसमूहः एवम् एका शासनव्यवस्था अस्ति। यस्मिन् गणः वा लोकाः स्वीयशासकं स्वयमेव चिन्वन्ति।

**गणतन्त्रस्य परिभाषा -** गणतन्त्रस्य शासनप्रणाली यस्यां शासनशक्तिः एकस्मिन् व्यक्तौ अथवा वर्गविशेषे निहितं न भवति अपि तु गणे अथवा जनसाधारणे निहितं भवति। वर्तमाने शासनव्यस्थायाः स्वरूपं न केवलं दृश्यते अपि तु विभिन्नस्वरूपेषु यथा - शासनव्यवस्था, समाजव्यवस्था, आर्थिकव्यवस्था, जीवनदर्शनादिषु दृश्यते।

**गणतन्त्रं - शासनव्यवस्था -**

१. गणतन्त्रशासने जनानां प्रतिनिधित्वं भवति। अस्य आधारः दैविकम् अभूत्वा लौकिकं भवति।
२. गणतन्त्रं समाजस्य सार्वजनिकहितानां संरक्षणं करोति।
३. गणतन्त्रे सर्वकारः जनान् प्रति उत्तरदायि भवति।

**गणतन्त्रं - सामजिकव्यवस्था :-**

१. अस्मिन् गणतन्त्रम् एका व्यवस्था अस्ति। गणतन्त्रे प्रत्येकं व्यक्तेः जातिः, धर्मः, लिङ्गस्य भेदभावं विना सामाजिकजीवने समानतायाः स्थितिः भवति।

२. ह्यर्नशा महोदयानुसारं - गणतन्त्रीयसमाजः सः वर्तते यस्मिन् समानतायाः विचारस्य प्रबलता भवेत् तथा तस्मिन् समानतायाः सिद्धान्तः प्रचलितः भवेत्।

**गणतन्त्रस्य सिद्धान्ताः** - गणतन्त्रस्य सफलं न केवलं राजनैतिककारणैः भवति अपि तु गणतन्त्रीयसिद्धान्तं मानवजीवने प्रयोगसम्पादने भवति।

क) **समानता -** समानतासिद्धान्तेषु प्राधान्येन इमे विचाराः आपतन्ति। वर्गसंघर्षं परिसमाप्य विशिष्य जाति-धर्म-वर्ग-वर्ण-लिङ्गादि भेदविहीनस्य गणतन्त्रस्य समाजस्य स्थापनम्। विशिष्य राज्यं कमपि नागरिकं प्रति केवलं धर्मस्य मूलवंशस्य जातेः लिङ्गस्य, समसंरक्षणात् वा वञ्चनं न कुर्यात्।

**गणतन्त्रन्यायव्यवस्था -**

१. गणतन्त्रीयशासने सर्वेऽपि समानाः।

२. सर्वेषां कृते न्यायव्यवस्था समाना भवेत्।

३. विशिष्य गणतन्त्रे जाति-धर्म-वर्ण-लिङ्गादिवर्गविहीनस्य न्यायव्यवस्था स्यात्।

**गणतान्त्रिकी शिक्षायाः गुणाः -**

१. जनानां मूल्यानां विकासः।

२. स्वतन्त्रतायाः संरक्षणम्।

३. देशभक्तेर्भावनायाः उदयः।

४. स्नेहसहयोगयोः भावनाद्वारा परिवारसमाजयोः साहाय्यभावनायाः विकासः।

५. व्यावसायिककुशलतायाः विकासः।

६. नेतृत्वगुणानां विकासः।

**सहायकग्रन्थसूची -**

१. शिक्षायाः दार्शनिक-सामाजिकाधाराः - सोमनाथ साहु।

## मूल्यशिक्षा – श्रीनारायणगुरुदेवस्य योगदानम्

**प्रसन्ना. ई. के.**

शिक्षाशास्त्रिप्रथमवर्षम्

केरलीयसामाजिकस्तरः अत्युन्नतः विराजते। केरलेषु विद्यमाना अनेके सामाजिक-परिष्कर्तारः एव अस्य निर्देशकाः। इतरप्रदेशेषु इदानीमपि विद्यमानानि सामाजिकासमत्वानि केरलेषु तेषां परिष्कर्तृणाम् अश्रान्तपरिश्रेमेणैव गतानि। तेषु समाजपरिष्कर्तृषु नवोत्थाननायकत्वेन प्रशस्तः भवति श्रीनारायणगुरुदेवः। जीवने अनुष्ठेयानि मूल्यानि गुरुः एवं प्रतिपादितवान्।

**अहिंसा सत्यमस्तेयस्तथैवाप्यभिचारिता।**
**मद्यवर्जनं चैवं पञ्चधर्मास्समासतः।।**

अस्मिन् भौतिकयुगे मानवाः भौतीकीमुन्नतिं कर्तुमुद्यताः सन्ति। विज्ञानबलेन ते ईश्वरमपि जेतुमिच्छन्ति। किन्तु तथापि नास्ति शान्तिः क्वचित्। अहिंसा, सत्यम्, अस्तेयम्, अप्यभिचारिता, मद्यवर्जनम् इति धर्माः पञ्चविधाः भवन्ति। एते अहिंसादयः भावाः यदा मानवस्य हृदि तिष्ठन्ति तदा सः सत्कार्यं करोति। अन्यथा सः स्वार्थेन प्रेरितः अनेकान् अधर्मान् करोति। अतः अहिंसादीनाम् आचरणं जीवने कुर्युः इति गुरुदेवः उद्बोधितवान्।

**कस्यापि प्राणिनो वत्साः शरीरप्राणचेतसाम्।**
**अपीडनमहिंसा स्यात् मनोवाङ्मयकर्मभिः।।**

मनसा, वाचा, कर्मणा अन्यान् मा पीडयेयुः इत्थमस्ति अहिंसायाः धर्मः।

**सति साधु भवेत्सत्यं सत्यं ब्रह्म सनातनम्।**
**सत्ये तिष्ठति लोकोऽयम् वदेत्सत्यं न चानृतम्।।**

अस्मिन् जगति परत्र च सत्यम् आश्रयणीयम्। सत्यमेवैकं साराख्यं वस्तु। सत्येन विना सर्वं शून्यम्। अतः सत्यमेव वदेत् नानृतम् इति उद्घोषयन्ति श्रीनारायणगुरुदेवः।

**दिवाप्यन्धं तमः पुंसो व्यभिचारमुपेयुषः।**
**तस्मान्नियतिदत्तं यत् सुखं तच्च विनश्यति।।**

यः व्यभिचारी भवति सः सर्वदा अन्धकारे एव तिष्ठति। दिवापि निशा इव भाति। तेन प्रकृतिदत्तं सुखमपि न अनुभूयते।

**बुद्धेर्वैकल्यजनकं महामित्युच्यते बुधैः।**

**मद्यसेवां न कुर्वीत मद्यं विषसमं विदुः।।**

मद्यं विषतुल्यं बुद्धेः हानिजनकं च भवति। अतः मद्यपानं मा कुर्युः।

**जातिरेका मनुष्याणाम् मतमेकमनिन्दितम्।**

**देवोप्येक समासेन जातिरादौ निरूप्यते।।**

एको जातिः, एको धर्मः, एको देवः मनुष्याणाम् इति श्रीनारायणगुरुदेवस्योक्तिः अत्यन्तं प्रसिद्धमेव। तदा केरलराज्ये नैकाः जातयः नैकानि मतानि आसन्। उन्नतजातिः, नीचजातिः, अस्पृश्यता इत्यादीनि सामाजिकानिष्टानि सर्वजनान् अपीडयन्। तस्मिन् समये नारायणगुरुः अस्य मूलविनाशाय उद्यममकरोत्। सामाजिकविरोधाभासान् नियन्त्रयितुम् अनेकानि आन्दोलनानि अकरोत्। श्रीनारायणगुरुदेवस्य काले समाजे सर्वेषाम् आराधनास्वातन्त्र्यं न आसीत्। देवताराधनया विद्याभ्यासेन च समाजोद्धारणं साध्यमिति ज्ञात्वा सः देवालयान्, विद्यालयान् संस्थाप्य सर्वान् पठनाय प्रचोदितवान्। एकदा गुरुदेवः अरुविप्पुरम् इति स्थाने एकां शिवप्रतिष्ठाम् अकरोत्। तस्मिन्नवसरे प्रतियोगित्वेनागतानां पुरतः सः एतत् अस्माकं देव एव इत्युक्तवान्। पुनः तत्र एवं लिखितवान् जातिभेदं मतद्वेषं विना यत्र नराः समे सोदरत्वेन तिष्ठन्ति मातृकास्थानमप्यदः इति।

**मितनिद्रा मिताहारो मितवस्त्रपरिग्रहाः। मितभाषणमेकैकं भूषणं ब्रह्मचारिणः।।**

एवं मितेन हितेन सारेण च सम्भाषणेन विनयेन मितनिद्रया, मिताहारेण, मितवस्त्रपरिग्रहेण च सर्वेषां तेषाम् आनन्दं जनयामास।

**सान्दर्भिकग्रन्थसूची** :-

१. श्रीनारायणगुरुः -श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः - कोल्लम्।

२. नारायणगुरोः लघुकृतयः - व्याख्यानम् - गुरुप्रसादः।

# पर्यावरणस्वास्थ्ययोः सुरक्षा

**रस्मिरेखा पात्र**

शिक्षाशास्त्रिप्रथमवर्षम्

**पर्यावरणम् -**

परितः विद्यमानानां वनस्पतीनां वृक्षाणां जीवानां जल-स्थल-वायूनां, सरोवराणां नदीनां सागरादीनां जीवनाध्ययनकार्यक्रीडा - कृषि - औषधोद्योगादिस्थानानां समष्टिरूपं पर्यावरणं भवति।

पर्यावरणेन मानवानां जीवधारिणां वनस्पतीनां वृक्षादीनाञ्च जीवनाय अनुकूलपरिस्थितयः समुपलभ्यन्ते। पर्यावरणेन जीवावरणं जीवमण्डलं वा केवलं पृथिव्यामेव दृश्यते। विविधप्रकाराणां पर्यावरणीयतन्त्राणां मध्ये सन्तुलनस्य कारणेन जीवनाय आनुकूल्यपरिस्थितयः समुपलभ्यन्ते। अत्र किञ्चिदपि असन्तुलनं कुसमायाति चेत् पर्यावरणीयचक्रेषु तन्त्रेषु वा स्थायीरूपेण हानिः जायते।

**स्वास्थ्यं नाम किम्?** - विश्वस्वास्थ्य-सङ्घटनानुसारं स्वास्थ्यं नाम जीवनस्य शारीरिक-मानसिक-सामाजिकलक्षणेषु स्थिरः व्यवहारः रोगात् अशक्तात् च मुक्तस्थितिः भवति।

**चरकमतानुसारम् :- समदोषः समग्राहि समाधातुः मलाक्रयः।**

**प्रसन्नात्मेन्द्रियमनः स्वस्थ इत्यभिधीयते।।**

सुपोषणयुक्तानां खाद्यपदार्थानां जलस्य प्राणवायोश्च उपभोगेन शारीरिकव्यायामैः योगेन च अस्वास्थ्ये सति चिकित्सेन परमर्शितानाम् औषधानाम् उपभोगेन सेवनेन वा, केषुचित् शल्यचिकित्सया च स्वास्थ्यं वर्धत इति सर्वैः ज्ञातमेव। मानवस्य जीवनाञ्च स्वास्थ्यवर्धकाः कारकाः बहवः सन्ति। यथा –

१. आहारपोषकाः।

२. वायौ प्राणवायुः।

३. औषधानि।

४. रम्या प्रदूषणरहिता च प्रकृतिः।

५. परिवारः मित्राणि च इत्यादयः।

**पर्यावरणीयस्वास्थ्यं नाम किम्? -** पर्यावरणीयस्वास्थ्यं नाम मानवानां जीवधारिणाञ्च स्वास्थ्यस्योपरि पर्यावरणीयतत्त्वानां परिस्थितीनाञ्च प्रभावस्य अध्ययनं भवति। 'Environmental health means study of how the environmental affects the human beings and organisms health'. पर्यावरणीयतत्त्वानां नैसर्गिकतायां वा असन्तुलनं कुसमायाति चेत् जीवनपरिस्थितिषु विषमता कुसमायाति। फलतः प्राकृतिकप्रकोपानां फलं मानवाः जीवधारिणश्च अनुभोक्तव्यं भवति। प्राकृतिकापदा नाम मानवस्य जीवनञ्च जीवन-परिस्थितिषु प्रतिकूलजन्यं हानिकारकं रोगकारकं वा पर्यावरणीयतत्त्वानां प्रकोपेन मानवानां जीवधारिणाञ्च स्वास्थ्यस्योपरि कियान् नकारात्मकप्रभावः भवतीत्यस्याध्ययनं क्रियते।

पर्यावरणीय-अवयवेषु विकृतेः कीदृशानां रोगाणां जन्म जायते। तेषां प्रदूषणजन्यरोगाणां नियन्त्रणं निवारणं निदानञ्च कथं करणीय इत्यस्य अध्ययनं अत्र क्रियते। एतेषां रोगाणां उद्भवात्पुर्वमेव शाश्वतरीत्या निर्मूलनाय मानवसमाजेन के के विधयः अनुष्ठेयाः? के च नैवानुष्ठेयाः? इत्यस्याध्ययनञ्च अत्र विधीयते।

**सन्दर्भग्रन्थसूची -** पर्यावरणशिक्षा - माताप्रसादशर्मा - जयपुरम्।
शिक्षायाः दार्शनिक-सामाजिकाधाराः - सोमनाथ साहु।

## शिक्षाक्षेत्रे मार्गदर्शनम्

**राघवेन्द्र नरसिंह गावंकरः**
शिक्षाशास्त्रिप्रथमवर्षम्

**उपक्रमः -** शिक्षायाः उत्पत्तिः "शिक्ष्" धातुना अभवत्। विद्याप्राप्तिः अथवा ज्ञानार्जनम् इत्यर्थः। क्षेत्रे इत्युक्ते शिक्षायां इत्यर्थः।

**मार्गदर्शनम् -** इह जगति सर्वे जनाः स्वस्य इच्छानाम् आवश्यकतानाञ्च पूर्तये वातावरणे अनेकान् क्लेशान् अनुभवन्ति। मानवः जन्मतः मृत्युपर्यन्तं समस्याः दूरिकर्तुं निरन्तरं प्रयासं करोति। तदर्थं सः योग्यताः, सामर्थ्यानि च विकासयति। सः स्वस्य पूर्वज्ञानम् अनुभवञ्च आश्रित्य समस्यायाः दूरिकरणार्थं प्रयासं करोति। परन्तु कदाचित् सः लक्ष्यप्राप्तये असमर्थः भवति। तदानीं मार्गः न दृश्यते। तादृशावस्थायां सः ज्येष्ठान् आश्रयति, तेषां सूचनाश्च पालयति एतदेव मार्गदर्शनम्। शिक्षाक्षेत्रे मार्गदर्शनस्य महत् स्थानं वर्तते। मार्गदर्शनेन विना छात्रः अग्रे गन्तुम् असमर्थः इत्यपि वक्तुं शक्नुमः।

**परिभाषा** – स्किन्नर् महोदयस्य मते "युवकेभ्यः स्वस्य विषये, अन्यैः सह, परिवेशेन सह सामञ्जस्यं सम्पादयितुं साहाय्यप्रदानप्रक्रिया एव मार्गदर्शनमिति वक्तुं शक्यते" ।[1] "Guidance is a process of helping young persons to learn to adjust to self, to others and to circumstances"- Skinner।

जोन्समहोदयस्य मते "कश्चित् मनुष्यः अन्यस्मै विकल्पानां चयने, सामञ्जस्ये, समस्यापरिष्काराय च क्रियमाणसाहाय्यं मार्गदर्शनम् इति उच्यते" ।[2] "Guidance is the help given by one person to another in making choices, adjustments and in solving problems" – Jones।

प्रत्येकं छात्रस्य समस्यायाः कारणानि विभिन्नानि भवन्ति । शिक्षाक्षेत्रे केषाञ्चन जनानां मतानुसारेण मार्गदर्शनस्य त्रयः प्रकाराः निरूपिताः वर्तन्ते। ते यथा -

1. शैक्षिकमार्गदर्शनम्।
2. व्यावसायिकमार्गदर्शनम्।
3. वैयक्तिकमार्गदर्शनम्।

**शैक्षिकमार्गदर्शनम् -** शैक्षिकविकासे छात्रेभ्यः साहाय्यप्रदानं शैक्षिकमार्गदर्शनम् इत्युच्यते। कः विषयः ? कः विद्यालयः ? किं ग्राह्यम् ? इत्यादि बहवः प्रश्नाः छात्राणां मनांसि उद्भवन्ति। कदा इत्युक्तौ छात्राः प्राथमिकविद्यालयात् माध्यमिकविद्यालयं, माध्यमिकविद्यालयात् महाविद्यालयं, ततः विश्वविद्यालयं च गच्छन्ति । तदानीं समस्याः उद्भवन्ति । अतः तासां निवारणाय शैक्षिकमार्गदर्शनम् उपकरोति।

छात्रेभ्यः कथं प्रदीयते ? इत्युक्ते तत्रादौ प्रत्येकं छात्रस्य स्वास्थ्यम्, बुद्धिशक्तिः, अभिरुचयः, शैक्षिकोपलब्धिः, मित्रवृन्दः, पूर्वतनविद्यालयः, पारिवारिकपृष्टभूमिः इत्यादिविषयान् संगृह्णीयात् । तदर्थं वैयक्तिकबुद्धिपरीक्षाः, अभिरुचिपरीक्षाः, निरीक्षणम्, साक्षात्कारः, प्रश्नावली इत्यादीनां प्रयोगः कर्तुं शक्यते। ततः परं प्राप्तविषयाणां विश्लेषणं कृत्वा योग्यमार्गदर्शनं दद्यात्। तदनन्तरं मार्गदर्शनस्य प्रभावेण छात्रस्य प्रगतेः मूल्याङ्कनं कुर्यात् । एतत् मूल्याङ्कनमाश्रित्य अग्रिममार्गदर्शनव्यवस्थां कल्पयेत्। अत्र त्रीणि सोपानानि सन्ति। तद्यथा – संग्रहणं, मार्गदर्शनं, अनुवर्तनकार्यक्रमः इति।

**व्यावसायिकमार्गदर्शनम् -** साम्प्रतिकसमाजे अनेके छात्राः शिक्षां प्राप्य उद्योगप्राप्तये महत् कष्टम् अनुभवन्ति। समाजे जीवनधारणाय मौलिकावश्यकताः पूरयितुम् अपि असमर्थाः भवन्ति। अतः तादृशेभ्यः छात्रेभ्यः व्यावसायिकमार्गदर्शनं महते उपकाराय भवति। तदर्थं प्रत्येकं शिक्षासंस्थासु

छात्रेभ्यः व्यावसायिकमार्गदर्शनं स्वीयसामर्थ्यानुसारं व्यावसायिकचयनं, चिताय व्यवसायाय उपयुक्तप्रशिक्षणप्रदानम् इत्यादि कार्येषु क्रियमाणं सादृश्यं एव व्यावसायिकमार्गदर्शनम् इति कथ्यते। व्यावसायिकमार्गदर्शनं प्राप्य छात्रः महदानन्देन कार्यं कुर्वाणः स्वस्य समाजस्य राष्ट्रस्य च आर्थिकविकासाय प्रयतते ।

छात्रेभ्यः कथं प्रदीयते ? इत्युक्ते छात्रेभ्यः व्यवसायिकमार्गदर्शनात् पूर्वं मार्गदर्शकः आदौ छात्राणां स्वभावाः, योग्यताः, विशेषताः, पारिवारिकसमस्याः इत्यादि विषयान् सङ्कलय्य सामूहिक-वैयक्तिकमार्गदर्शनस्य आयोजनं कुर्यात् । तस्मात् सम्भाषणेन करपत्रेण पुस्तकेन विविधव्यवसायानां व्यावसायिकावसरणाञ्च ज्ञानं दद्युः । इत्थं यावत् कालपर्यन्तं छात्रः कस्मिश्चित् व्यवसाये न प्रविशति तावत् साहाय्यं करणीयम् । अनन्तरं तस्य मूल्याङ्कनं कुर्यात् ।

**वैयक्तिकमार्गदर्शनम् -** इदानीन्तन कालः प्रतिस्पर्धात्मककालः वर्तते । अतः स्वीयलक्ष्यप्राप्तये छात्राः निरन्तरं प्रयासान् कुर्वन्ति । कृते प्रयत्ने सापेक्षिकफलम् अप्राप्य क्लेशम् अनुभवन्ति । एतद् विशिष्य किशोरावस्थायां सामाजिकसमस्याः, सांवेगिकसमस्याः अधिकाः भवन्ति । अतः तादृशेभ्यः छात्रेभ्यः वैयक्तिकमार्गदर्शनं बहुधा उपकरोति । कस्यचन छात्रस्य विकासे समायोजने सम्बद्धानां समस्यानां दूरीकरणाय क्रियमाणं साहाय्यम् एव वैयक्तिकमार्गदर्शनम् इति उच्यते । शैक्षिकमार्गदर्शनम्, व्यावसायिकमार्गदर्शनम् अपि अत्र अन्तर्भवति । वैयक्तिकमार्गदर्शनं असामान्येभ्यः छात्रेभ्यः कुसमायोजितछात्रेभ्यः उपकाराय भवति ।

छात्रेभ्यः कथं प्रदीयते ? वैयक्तिकमार्गदर्शनात् पूर्वं मार्गदर्शकः छात्रस्य सम्पूर्णं दत्तांशम् एकत्रीकुर्यात् । तदनन्तरं छात्रस्य शारीरिक-बौद्धिक-सामाजिक-सांवेगिक-शैक्षिकोपलब्धि-अभिरुचयः इत्यादि विषयान् सञ्जानीयात् तस्मात् छात्रेभ्यः मार्गदर्शनं कृत्वा तेषां मूल्याङ्कनं कुर्यात् ।

**उपसंहारः -** प्रतिस्पर्धात्मकयुगेस्मिन् बह्वीभ्यः समस्याभ्यः छात्रान् बहिरानयनाय एकम् एव उपायं समुचितमार्गदर्शनम् । अनेन मार्गदर्शनेन सर्वे छात्राः स्वीयकार्यं कुर्वन् आत्मनः, समाजस्य, देशस्य च सर्वविधविकासं कर्तुं समर्थः भवति इत्यत्र नास्ति संशयलेशः अपि ।

**साहाय्यकग्रन्थाः -**

1. शिक्षामनोविज्ञानम्  - डा. फतेहसिंहः ।
2. शिक्षायाः मनोवैज्ञानिकाधाराः - डा  बि. पद्ममित्रश्रीनिवासः ।

## ADDRESSES OF SHIKSHA-SHASTRY II YEAR STUDENTS

**01. ARCHANA PATRA**
D/O PRADIP KUMAR PATRA,
AT - ANANDAPUR,
P.O. - PATRASAHI,
KEONJAR DISTRICT,
ODISHA - 758 021
MOB - 7008349632.
E-MAIL - archanapatra68@gmail.com

**02. RANJITA KANDI**
C/O NABAGHAN KANDI,
AT/PO -BIRATUNG,
PS - GOP,
PURI DISTRICT,
ODISHA - 752 116.
MOB - 9777864883.
E-MAIL - ranjitakandi456@gmail.com

**03. PRATHEEKSHA K. P.**
D/O PREMAVALSALAN K. P.,
KOONATH HOUSE,
P.O. - KANDASSANKADAVU,
KARAMUCK,
THRISSUR,
KERALA - 680 613
MOB - 8086905196.
E-MAIL - pratheekshagudoos99@gmail.com

**04. MANJULATA SAHOO**
C/O DASARATHI SAHOO,
AT/PO - BARABATI,
PS - DHARMASALA,
JAJPUR DISTRICT,
ODISHA - 755 008.
MOB - 7504129906.
E-MAIL - sahookarishma1992@gmail.com

**05. ROZALIN MOHARANA**
C/O BASUDEV MOHARANA,
AT - MANGALA PATANA,
PO - SHRI VIHAR,
PS - SEA BEACH,
PURI DISTRICT,
ODISHA - 752 003.
MOB - 9556871294, 8637245038.
E-MAIL - rozalinmoharana@gmail.com

**06. AMRITA BARIK**
C/O HARENDRANATH BARIK,
AT/PO - BHIMPUR,
VIA - RASALPUR,
BALASORE DISTRICT,
ODISHA - 756 021
MOB - 9439426499.

**07. BHANUMATI DAS**
C/O GADADHAR DAS,
AT - MARDARAJPUR,
PO - KHALISAHI,
PS - KHANDAPADA,
NAYAGARH DISTRICT, ODISHA - 752 077
MOB - 7994940665.
E-MAIL - bhanumatidas182@gmail.com

**08. BISMINI PRADHAN**
C/O GADADHARA PRADHAN,
AT - NALKULI, PO - MANIKULA,
VIA - SUNHAT, PS - SADAR,
BALASORE DISTRICT,
ODISHA - 756 002,
MOB - 7008865006.
E-MAIL - bisminipradhan4@gmail.com

**09. SASMITA MISHRA**
D/O UMESH CHANDA MISHRA,
C/O S. P BHABANI SHANKAR
MISHRA,
PO - CALTAX (RAILWAY STATION),
AT - CALTAX, HATA ROAD,
DHENKANAL DISTRICT,
ODISHA - 759 013,
MOB - 9438167523.
E-MAIL - s.mishrasasmita@gmail.com

**10. ROJALIN BISWAL**
C/O BHARATA CHANDRA BISWAL,
AT - KHALIBANDHA,
PO - TARAVA, PS - SADAR,
VIA - DHENKANAL RAILWAY
STATION, DHENKANAL DISTRICT,
ODISHA - 759 013,
MOB - 9439576531.
E-MAIL - rojalin.66335@gmail.com

**11. PRASWASINI SAHU**
C/O PRADEEP KUMAR SAHU,
AT/VIA - PALIABINDHA,
PO - BARUNEI, PS - TIHIDI,
BHADRAK DISTRICT,
ODISHA - 756 167,
MOB - 9937902104.
E-MAIL - praswasinisahu43@gmail.com

**12. SUBHASHREE BARIK**
C/O RABINDRANATH BARIK,
AT - PURANAPANI,
PO - BHIMTALI, PS - UDALA,
MAYURBHANJ DISTRICT,
ODISHA - 757 041,
MOB - 8598084061, 8328918176.
E-MAIL - subhashree2200@gmail.com

**13. JAYSHREE PRADHAN**
C/O UPENDRA PRADHAN,
AT - JARADA,
P.O. - PEDAGADI,
P.S. - KAPTIPADA,
MAYURBHANJ DISTRICT,
ODISHA - 757 040.
MOB - 8480810529
E-MAIL - jayshreepradhan416@gmail.com

**14. SMITARANI SAMAL**
C/O BRAHMANANDA SAMAL,
AT - CHOICE COLLECTION
TOWNSHIP,
P.O & P.S. - NALCONAGAR,
VIA - ANGUL,
ANGUL DISTRICT,
ODISHA - 759 145.
MOB - 7873754236
E-MAIL - smitaranisamal92@gmail.com

**15. JASODA DAS**
C/O BISHNU CHARAN DAS,
AT - BANKI,
P.O. & VIA - BIJATALA,
MAYURBHANJ DISTRICT,
ODISHA - 757 048.
MOBILE - 8917440620
E-MAIL - jasodadas169@gmail.com

**16. BHAGYASHREE MANDAL**
C/O KISHORE KUMAR MANDAL,
AT & PO - BADMOUDA
P.S. & VIA - GORUMAHISANI,
MAYURBHANJ DISTRICT,
ODISHA - 757 042.
MOBILE - 8917599112
E-MAIL - bhagyashreemandal11@gmail.com

**17. SUNITA PATRA**
C/O MADANMOHAN PATTNAIK,
AT - OLD SADAR THANA LANE,
PURI,
PURI DISTRICT,
ODISHA - 752 001
MOBILE - 7902262382
E- MAIL - sunitapatra00@gmail.com

**18. SWAGATIKA DAS**
C/O KUMAR CHARAN DAS,
AT - BHABANIPUR,
PO - ARIKAMA,
BLOCK - BOLGARH,
KHURDHA DISTRICT,
ODISHA - 752 064.
MOBILE - 8637289293
E- MAIL - swagatikadas955@gmail.com

**19. SAUBHAGY MANJARI SAHOO**
C/O ASHOK KUMAR SAHOO,
AT - NAGAPUR,
PO- LATHIPADA,
NAYAGARH DISTRICT,
ODISHA - 752 079,
MOBILE - 9776871116
E- MAIL - saubhagymanjarisahoo@gmail.com

**20. ABHINAND C. K.**
KANAYI HOUSE,
PO - PILICODE,
KASARAGOD,
KERALA - 671 310.
MOBILE - 8589924160
E- MAIL - ckabhinandc.k@gmail.com

**21. ABHIJITH RAJENDRAN**
PUTHENPURAKKAL HOUSE,
PO - POOVANTHURUTH,
KOTTAYAM,
KERALA - 686 012
MOBILE - 9048038619, 8137937099
E-MAIL - abhijith8619@gmail.com

**22. RUDRA NARAYAN MAHAPATRA**
AT & PO - SARAPAL,
PS - KUNDHEIGOLA, VIA - REAMAL,
DEOGARH DISTRICT,
ODISHA - 768 109
MOBILE - 9938585549
E-MAIL - mahapatrarudra9@gmail.com

**23. SASMITA KUMARI SAHOO**
C/O ASHOK KUMAR SAHOO,
AT - NAGAPUR, PO - LATHIPADA,
VIA - MANADHATAPUR,
NAYAGARH DISTRICT,
ODISHA - 752 079
MOBILE - 9348833264
E-MAIL - sasmitakumarisahoo00@gmail.com

**24. SARADA BHARATI**
C/O SHIVA PRASAD KHATEI,
AT & PO - KURAL, VIA - KURAL,
NATAGARH DISTRICT,
ODISHA - 752 090
MOBILE - 9777597628
E-MAIL - bharatisarada96@gmail.com

**25. SWATHYLAKSHMI K. U.**
KIZHAK KOODAN HOUSE,
PO - VARANDARAPPILLY,
THRISSUR DISTRICT,
KERALA -680 303
MOBILE - 9847033115
E- MAIL - swathilakshmiku@gmail.com

**26. GALEEL T.**
THAYYIL KODI HOUSE,
NEAR RAILWAY GATE,
PARAPPANANGADI,
MALAPPURAM - 676 303.
MOBILE - 9496806638
E- MAIL - galeel333@gmail.com

**27. MAYAKRISHNAN**
D/O KRISHNAN KUTTY P. A.,
POOKKATT HOUSE,
PO - ANTHIKAD,
THRISSUR DISTRICT,
KERALA - 680 641
MOBILE - 9656640053
E- MAIL - mayakrishnanp2011@gmail.com

**28. NIVYA BABU**
ARAYAM PARAMBIL HOUSE,
PO - VELLANCHIRA,
CHALAKKUDY, THRISSUR DIST,
KERALA - 680 697
MOBILE - 7356011032
E- MAIL - nivyababu2017@gmail.com

**29. SARANYA K. R.**
D/O RAVI K. K.,
KIDANGOOR HOUSE,
PO - CHOONDAL,
PUTHUSSERY, THRISSUR DIST,
KERALA - 680 502
MOBILE - 9645827972
E-MAIL - saranyakrasv@gmail.com

**30. LEETHU THOMAS**
D/O THOMAS P. L.,
PUTHUKARA HOUSE,
PO - WADAKANCHERY,
THRISSUR DISTRICT,
KERALA - 680 623
MOBILE - 9605888214
E-MAIL - leethuthomas1993@gmail.com

**31. NIRANJANA M. N.**
MUDATHILY HOUSE,
MANAKKODY - P.O.,
THRISSUR DISTRICT,
KERALA - 752 104.
MOBILE - 7559952059

**32. PRAVEENA SURESH**
VADAKKETHAYIL HOUSE,
PO - THANDORAPPARA,
VIA - KAYANNA,
KOZHIKODE DIST,
KERALA - 673 526
MOBILE - 9526135736
E - MAIL - praveenasuresh1996@gmail.com

**33. SARANYA C. E.**
CHENNIKKOTTUKUNNUMMAL (H)
VIA - KAKKODI,
PO - KURUVATTOOR,
KOZHIKODE DISTRICT,
KERALA - 673 611
MOBILE - 9656929214
E-MAIL - saranyack2014@gmail.com

**35. MANASMITA ROUT**
C/O RAMACHANDRA ROUT,
AT / PO - RAIPUR,
VIA - GHANTESWAR,
P.S. - BANSADA,
BHADRAK DISTRICT,
ODISHA - 756 129
MOBILE - 9938800513, 8249157558
E- MAIL - manasmitarout66@gmail.com

**36. ANJANA SOMAN**
C/O ANIRUDHAN V. V.,
VALLUPARAMBIL HOUSE,
PO - PULIYANAM,
PEECHANIKKADU,
ANGAMALY,
ERNAKULAM DISTRICT,
KERALA - 683 572
MOBILE - 9074313004
E- MAIL - anjanasoman.y@gmail.com

**38. MUKTIKANTA JENA**
C/O GHANASHYAM JENA,
AT - PUSKURA,
PO - PANCHUPALLI,
VIA - SALAPADA,
KEONJHAR DISTRICT,
ODISHA - 758 020
MOBILE - 7077828815
E-MAIL - mukti25696@gmail.com

**39. SARADA PRASAD NATH**
C/O BIJAYA KUMAR NATH,
AT - BALIPARI,
PO - CHATUA, VIA - KUJANG,
JAGATSINGPUR DISTRICT,
ODISHA - 754 141
MOBILE - 6370132510
E - MAIL - saradaprasadnath9@gmail.com

**40. SAHADEV PRADHAN**
C/O GOBINDA PRADHAN ,
AT - BUDEDIPADA,
PO - TIANGIA,
VIA - G. UDAYAGIRI,
KANDHAMAL DISTRICT,
ODISHA - 762 100
M OBILE - 8895188823
E- MAIL - belalasena008@gmail.com

**41. NARENDRA KUMAR JENA**
C/O MURALIDHAR JENA,
AT - BANIKA,
PO - TUKUNA,
P.S. - GHASIPUR,
KEONJHAR DISTRICT,
ODISHA - 758 020
MOBILE - 78943264487
E- MAIL - jenanarendra002@gmail.com

**42. TONI PRIYADARSHANI SOREN**
C/O SHYAM SUNDAR SOREN,
AT - BHALIADIHA,
P.O. - SAHARPADA,
P.S. - PATNA,
KEONJHAR DISTRICT ,
ODISHA - 758 016
MOBILE - 8480292014
E-MAIL - toni1995soren@gmail.com

**43. RANAPRATAP PANDA**
C/O SITARAM PANDA,
AT - BANJIPALI,
P.O. - CHICHINDA,
VIA - BHEDEN,
BARGARH DISTRICT,
ODISHA - 768 104.
MOBILE - 9937145420
E-MAIL - ranapratap357@gmail.com

**44. SANTOSH KUMAR SARDAR**
C/O GANGADHAR SARDAR,
AT - KANIPOSHI,
P.O. - KATHABAUNSULI,
VIA - JHUMPURA,
KEONJHAR DISTRICT,
ODISHA - 758 031
MOBILE - 7682065268
E-MAIL - santoshkumarsardar@gmail.com

**45. HARIPRIYA P. H.**
D/O HARIDAS P. K.,
PULIKKAL HOUSE,
P.O. - VADAKKUMMURI,
CHEMMAPPILLY,,
THRISSUR DISTRICT ,
KERALA - 680 570
MOBILE - 8594084112
E-MAIL - sumanaharidas@gmail.com

**46. BASANTI HANSDAH**
C/O PARBATI HANSDAH,
B. B. MESS, WARD NO - 25,
AT - CHHANCHA,
PALABANI (P.O.),
P.S. - BARIPADA,
MAYURBHANJ DISTRICT,
ODISHA - 757 001
MOBILE - 9439288105
E-MAIL - sorengaichand0507@gmail.com

**47. JYOTHSNA P. P.**
PRANAVAM HOUSE,
EYYAMKODE (P.O.),
KOZHIKODE DISTRICT,
KERALA - 673 504
MOBILE - 8943636191
E-MAIL - jyotsnapavithran214@gmail.com

**48. MIDHUN M. S.**
MANIKKATH HOUSE,
MANDIPULAM (P.O.),
MANJOOR,
THRISSUR DISTRICT,
KERALA - 680 312.
MOBILE - 8086824663
E-MAIL - midhunms821@gmail.com